सरस्वत्येव मीमांसा यैर्द्दत्ता परमार्थतः ॥ मुनिं कात्यायनं कर्कं पितृभूतिं तथादिमान् ॥ ५ ॥
यशोगोपिभर्त्तृयज्ञभाष्यकृतोपरानपि ॥ पद्धत्यादिप्रणेतॄंश्च जनकं वेददान्गुरून् ॥ ६ ॥
वेदार्थयज्ञविद्यैया [द्यावा] ददुः सम्राट् सुताः स्वयम् ॥ संम्राजोग्निचितस्स्यक्तसर्वसंगमदास्तु तान् ॥ ७ ॥
वाचस्पत्यभिधान्नत्वा परमात्मानमप्यथ ॥ यज्ञज्ञानां गुरुर्यस्तु कर्मपप्रविस्तया ॥ ८ ॥
एकैकदेशदानन्यान्गुरून् बुद्धिविवृद्धये ॥ प्रणम्य क्रियते यत्नः कातीयसूत्रसंस्थितः ॥ ९ ॥
भाष्यस्त्पेऽत्र संदिग्धं सर्वं निर्णेष्यते मया ॥

च.-द्विरभ्यास उक्तार्थः ।

रुद्रसंख्यैरभिषिक्तो वाजपेयैस्त्रिरग्निचित् ॥ एकाशीतिं च सोमान्य ईजे भाष्यपरोपि सन् ॥ १ ॥
सम्राजां वंशजो यस्य वाचस्पतिरिवार्यवित् ॥ वाचस्पतिरुपादानं योगित्वात्तमवाश्रयः ॥ २ ॥
अनेकक्रतुयाजित्वादीयसोपि निवारकः ॥ अन्यत्र गमनस्यासौ श्रीअनन्ताभिधः स्वराट् ॥ ३ ॥
सुखेशबोधनात्सांश्चि [त्सचि] दानंदोमृत एव यः ॥ सोनुगतार्थनामा मे गरीयान्केशवामृतः ॥ ४ ॥
अंत्यं जन्मेदं येषां येनैतेनुभवामृताः ॥ अथवान्वीश्वरं ते स्युर्ज्ञानाद्वानुभवामृताः ॥ ५ ॥
इति श्रीसम्राट्स्थपतिमहायाज्ञिकश्रीश्रीअनंतकृते कात्ययनसूत्रभाष्ये चतुर्विंशोध्यायः ॥

## ३७ कात्यायनश्रौतसूत्रभाष्यम्-कर्कः ।

आ.–प्रणतसुरासुरभासुरकिरीटकोटिप्रमृष्टचरणाय ॥ गजवदनाय नमस्ते सिद्धेः सदनाय विघ्नकदनाय ॥ १ ॥
यस्य लीलावशेनेदं जन्मस्थितिलयं व्रजेत् ॥ आनंदैकरसं वंदे तमुमासहितं शिवम् ॥ २ ॥
ऊर्जितानंदगहनां सर्वदेवस्वरूपिणीम् ॥ परां वाग्रूपिणीं वंदे महानीलसरस्वतीम् ॥ ३ ॥
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ४ ॥
भाष्याणि सम्यगालोच्य विचार्य च पुनःपुनः ॥ क्रियते बालबोधार्थं सूत्रभाष्यमतिस्फुटम् ॥ ५ ॥.........

## ३८ कात्यायनसूत्रस्य भाष्यम्-गर्गाचार्यः ।

आ.–अथ पूर्वां पौर्णमासीं पूर्वां पंचदशीमुत्तरां प्रतिपदं अन्याधानं करोतीति शेषः ॥
च.–एतदुक्तमंतिमं सूत्रं नारायणपुरुषस्य नारायणपुरुषसूत्रमित्येतस्य संज्ञम् ॥
इति कात्यायनसूत्रस्य संक्षिप्तभाष्ये चतुर्विंशोऽध्यायः समाप्तः ॥

## ३९ पारस्करगृह्यसूत्रं सभाष्यम्-भा० जयरामः ।

आ.–श्रीमत्केशववाग्गणाधिपपदद्वंद्वप्रभाभासुरस्वान्तोत्साहविजृम्भितामलमतिग्राह्ये च गृह्ये कृतेः ॥
दृष्ट्वा कर्कमुखैः कृतानि बहुशो भाष्याणि गुह्यानि तद्देशार्थं स्वमतेरिदं जयपरो रामो लिखत्यादरात् ॥ १ ॥
कृतिसूनुपदाम्भोजपरागोद्भूसरालकः ॥ जयरामश्च मेवाटो भारद्वाजसगोत्रकः ॥ २ ॥
श्रीमन्मान्दिकमाधवश्रुतिसुधासिंधोर्विगाहाप्तद्वेद्यस्तत्कृपयाभवद्द्विजवरः श्रीकेशवस्तादृशः ॥
तत्पादद्वयकस्पृशा कृतमिदं कातीयगृह्यस्य सद्भाष्यं सज्जनवल्लभं च जयरामेण प्रसादाद्गुरोः ॥ ३ ॥
आचार्यापरनामधेय इति यो दामोदरोभूद्द्विजो भारद्वाजसगोत्र आत्मरतिरस्याप्यात्मजस्तादृशः ॥
नाम्ना श्रीबलभद्र आत्मसुयशास्तस्सूनुनैतत्कृतं भाष्यं सज्जनवल्लभं जययुजा रामेण मत्याप्तये ॥ ४ ॥
पाठे योभूद्विसंवादो गृह्यसूत्रे समंत्रके ॥ उपेक्षितः स विदुषां मनसाज्ञापि युक्तितः ॥ ५ ॥
प्रयुक्ता अन्यथा मंत्रा न भवन्त्यर्थसाधकाः ॥ संसाधयन्ति सर्वार्थान्यथावत्पठिता यदि ॥ ६ ॥
नानाशाखीयमंत्राणां पाठशुद्धौ स्वपाठकाः ॥ व्याख्यातारः प्रमाणं स्युरित्येतच्छिष्टनिश्चयः ॥ ७ ॥
अतस्तत्तत्स्वशाखीयमंत्राणामग्र्यपाठकान् ॥ दृष्ट्वा सुबोधं गृह्यस्य भाष्यं वै लिख्यते स्फुटम् ॥ ८ ॥
तत्क्षंतव्यं सुनिपुणैः स्वबाले चापलं यथा ॥ मया च स्वीयबोधाय क्रियते तनु तद्विदाम् ॥ ९ ॥
च.–श्रीमान्मान्दिकमाधवश्रुतिसुधासिंधोर्विगाहाप्तद्वेद्यस्तत्कृपयाभवद्द्विजवरः श्रीकेशवस्तादृशः ।
तस्यांघ्रिद्वयकस्पृशा कृतमिदं कातीयसूत्रस्य सद्भाष्यं सज्जनवल्लभं सुविदुषां प्रेष्ठं शिवप्रीतये ॥

ककादिद्विजवर्याणां दृष्ट्वा भाष्याणि भूरिशः ॥ उपचेतुं तदुच्छिष्टं जयरामोऽलिरवत्स्फुटम् ॥ ५ ॥
शशीन्दुरसचन्द्रेब्दे मासीषे प्रथमे दले ॥ त्रयोदश्यामिन्दुयुति [ जि ] प्रालेखीदं सतां प्रियम् ॥ ६ ॥
इति श्रीमत्कातीयगृह्यसूत्रभाष्ये सज्जनवल्लभाख्ये जयरामकृतौ तृतीयकांडविवरणं समाप्तम् ॥ संवत् १९१० ॥

## ४० पारस्करसूत्रभाष्यम्–भास्करः ।

ए.–इति राघवेंद्रारण्यश्रीचरणचरणाब्जचंचरीकैर्भास्करभट्टै रचिते अर्यभास्कराभिधे पारस्करसूत्रभाष्ये तृतीयः कांडः समाप्तः ॥

## ४१ पारस्करमन्त्रभाष्यम्–मुरारिमिश्रः ।

आ.–प्रणम्य पूर्वं पुरुषं पुराणं तथैव कात्यायनपादपद्मम् ॥ तनोमि पारस्करमंत्रभाष्यं मुरारिमिश्रः पृतगृह्यभाष्यात् ॥ १ ॥
गृह्यप्रकाशाभिधभाष्यगर्भाच्छ्रीवेदमिश्रैर्विधिवत्प्रणितात् ॥
आकृष्यबन्धुं विविधानि मंत्रे [ विदधाति मन्त्रै ] मुरारि मिश्रः श्रुतितो विविच्य ॥ २ ॥ त्वन्नो अग्न इत्यादि ॥
ए.–इति श्रीवेदमिश्रप्रणीतगृह्यप्रकाशभाष्यादाकृष्य मंत्रभाष्यं पृथकृत्य तृतीयकाण्डस्य मुरारिमिश्रः समाप्तिमगमत् ॥

## ४२ पारस्करगृह्यसूत्रव्याख्या–विश्वनाथः ।

आ.–गर्गसिद्धान्तपद्मानां प्रकाशोदयहेतवे ॥ मार्त्तण्डाय नृसिंहाय पित्रे श्रीगुरवे नमः ॥ १ ॥
गङ्गादेवीमहं वन्दे ज्ञानदां मातृरूपिणीम् ॥ जातं यस्याः पयःपानात्सरस्वत्यवगाहनम् ॥ २ ॥
पारं शास्त्रसमुद्रस्य तच्चैतल्लिख्यते यतः ॥ स्वकल्पितत्वशङ्कात्र न कार्या विबुधैरतः ॥ ३ ॥
तर्कशास्त्रं च मीमांसा यद्रक्षायै प्रयोजिते ॥ तातैस्तमपि वन्देऽत्र गर्गं वेदार्थवित्तमम् ॥ ४ ॥
अधीत्य सकलं शास्त्रं श्रीनृसिंहाज्जगद्गुरोः ॥ तन्यंते विश्वनाथेन गृह्यसूत्रप्रकाशिका ॥ ५ ॥
अथैतद्भाष्यं नारब्धव्यं विषयाभावात् तथाहि तत्किं सूत्रार्थप्रकाशकं वा सूत्रादनधिगतार्थबोधकंवा
ए.–तत्र शरीरदोषं त्यक्त्वा मुखादिमन्त्रातः [मात्रतः] परिपठितुं ममास्त्वित्याशीः [शिः] प्रार्थनम् । एतत्सर्वम्ममास्त्विति मन्त्रार्थः तिष्ठत्विति वीप्सा काण्डसमाप्तिज्ञापनार्थम् ।
अभून्तंद [ न्नंदपु ] रे मुञ्जो नागरो गोत्रकाश्यपे ॥ लक्ष्मीधरोऽभवत्तस्मात्सूर्य्यदत्तस्तु तत्सुतः ॥ १ ॥
तस्मादाशाधरो जातो नारसिंहाभिधस्ततः ॥ तत्सुतेन कृतं भाष्यं विश्वनाथेन धीमता ॥ २ ॥
पारस्करस्य गृह्यस्य पञ्चखण्डावशिष्टकम् ॥ गरिष्ठं सर्वभाष्येषु बह्वर्थनिर्णयान्वितम् ॥ ३ ॥
महादेवजगन्नाथपुत्रपौत्रप्रपौत्रकैः ॥ गोपनीयं निरीक्ष्यं च पठितव्यं समाहितैः ॥ ४ ॥ – – – – – – –
नारसिंहाग्रतोऽ [ जोऽ ] नन्तरस्तस्य यो वै प्रपौत्रकः ॥ ५ ॥
लक्ष्मीधराऽभिधस्तंभतीर्थात्काश्यां समागतः ॥ उपहासं पुरस्कृत्य न्हियङ्कृत्वा तु पृष्ठतः ॥ ६ ॥

भाष्याण्यन्यानि वालोक्य पञ्चखण्डान्यलीलिखत् ॥ तेनै वात्रास्य भाष्यस्य पूर्त्तिर्ज्जाता यथा तथा ॥ ७ ॥
संवन्नेत्रग्रहकला १६९२ मितेऽब्दे चोत्तरायणे ॥ समाप्तिमगमद्भाष्यं माघे भूते सिते कुजे ॥ ८ ॥
इति श्रीमत्सर्वविद्याविशारदपण्डितश्रीनारसिंहसुतपण्डितश्रीविश्वनाथकृते पारस्करगृह्यसूत्रव्याख्याने तृतीयं काण्डं समाप्तम् ॥

## ४३ पारस्करगृह्यसूत्रव्याख्या-हरिहरः ।

आ.–इष्टापूर्त्तिक्रियासिद्धिहेतुं यज्ञभुजाम्मुखम् ॥ अग्निस्त्रयीं वचःसारं वन्दे वागधिदैवतम् ॥ १ ॥
पारस्करकृते गृह्यसूत्रे व्याख्यानपूर्विकाम् ॥ प्रयोगपद्धतिङ्कुर्वे वासुदेवादिसम्मताम् ॥ २ ॥
अथातो गृह्यस्थालीपाकानां कर्म्म ॥ अथ श्रौतकर्म्मविधानानन्तरम्
च.–सर्वं मे मनसि तिष्ठतु स्थिरीभवतु अत्र वीप्सा अर्थभूयस्त्वप्रतिपादनार्था ग्रन्थसमाप्तिज्ञापनार्था वा इतिसूत्रार्थः ॥
इति अग्निहोत्रिहरिहराणां कृतिरियम् ॥
इत्यग्निहोत्रिहरिहरविरचितायाम्पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ तृतीयः काण्डः समाप्तः ॥

## ४४ नवकण्डिकाभाष्यम् ।

आ०–ब्रह्मधर्मप्रकाशार्था यत्सामा वेदराशयः ॥ षड्भिरंगैर्युताः श्वासा ब्रह्म तच्छ्रेयसे स्तुमः ॥ १ ॥
गजाननस्यादिविसर्गकाले स्तोत्रं विधात्रा विहितं निशम्य ॥ हर्षाश्रुवृत्तानि शुभावहानि निघ्नंतु विघ्नं मम बृंहितानि ॥ २ ॥
कात्यायनेन मुनिना यदगादि सहा [महा] र्थवत् ॥ श्राद्धसूत्रमतिस्पष्टैर्विवृणोमि पदैरहम् ॥ ३ ॥
तस्य तावदिदमादिसूत्रम्–अपरपक्षे श्राद्धं कुर्वीत ॥
च.–असीदसीम्नवसुधामरमुख्यभूतः सत्कर्मणां प्रवरपात्रतया प्रसिद्धः ॥
संकर्षणेतिविदितः प्रथितोरुकीर्त्तिमुद्योतयन्सुकृतिनां प्रथमावतारः ॥
तस्यात्मजः सकलशास्त्रपरायणोपि यः पक्षपातमधिकं कृतवान्कृतीन्द्रः ॥
आन्वीक्षिकीरहसि तेन विनिर्मितायामांरतां [ निर्मितोऽयमारतां ] तमोपनयने पितृकर्मदीपः ॥ – – – – –
श्राद्धदीपः कृतीन्द्राणां तनोतु मुदमुत्तमाम् ॥ १ ॥ इति नवकंडिकाभाष्यं समाप्तम् ॥ संवत् ॥ १८११ ॥

## ४५ प्रतिज्ञासूत्रवृत्तिः-केशवाचार्यः ।

आ.–श्रीमत्कात्यायनं वन्दे मुनिश्रेष्ठं च याजुषम् ॥ यस्तेने कल्पशास्त्रन्तं याज्ञवल्क्यसुतं गुरुम् ॥ १ ॥
अथ प्रातिशाख्यसूत्रकथनानन्तरं प्रतिज्ञा विधास्यते इति शेषः ॥ प्रतिज्ञायते शेषसंस्कारो यया सा प्रतिज्ञा ॥
च.–इति केशवाचार्यविरचितप्रतिज्ञासूत्रवृत्तौ तृतीयकंडिका समाप्ता ॥

## ४६ मौनसूत्रम्-देवभद्रः ।

आ.-अथ यजुर्वेदाम्नाये वाजसनेयके माध्यन्दिनीयेन्येन मौनेन हस्तेनास्मदीयेनाधी भाना स [यमानानांसं]
हितामंत्राणामवगमं गौतमो देवभद्रपाठकोहं ब्रवीमि धर्मार्थकाममोक्षाख्यानि चत्वारि यद्वत्पात्राणि विकसितानि तानि
तेषु प्रत्येकं चन्द्रादितिथ्यन्ता अ (व) बोध्या (:) संज्ञास्ता यदुपदेशेन च सुधीः परहस्तताः कंडिका विजानातु ॥
चंद्र इषे त्वाग्रावग्निर्यज्ञो देवानां द्वे जुषाणो बर्हि

च.-सविता वरुणो हिरण्मयेन पात्रेणोम् खं ब्रह्माष्टाविंशंशतिरष्टपंचाशन्मोक्षपात्रे पंचशती चतुर्दश पंचविंशं.शत्यूना द्विसाहस्री
पंचविंशं.शत्यूना द्विसाहस्री ॥ १६ ॥
ढुंढिराजप्रसादेन सूत्रं चेदं मया कृतम् ॥ वैदिकास्तेन तुष्यन्तु विप्रा माध्यंदिनीयकाः ॥
अध्येतव्यमिदं सूत्रं विप्रैर्माध्यंदिनीयकैः ॥ मौनेनाधीतमंत्राणां क्षिप्रं ज्ञानाभिलाषिभिः ॥
मुहुर्मुहुः प्रार्थयेहं दुर्जनान्दुष्टमानसान् ॥ मत्कृतं सूत्रमेतत्तु न नष्टव्यं कदाचन ॥
एषा मत्सूत्रगा विद्या गोप्यैव फलदा भवेत् ॥ अन्यथा विफलैव स्यादिति मद्वचनं कुरु ॥
शिष्यं मित्रं छलं दुष्टं प्रभुं बालं न बोधयेत् ॥ सच्छिष्यं शिक्षयेद्वाथ स्वगृह्यानेव बोधयेत् ॥
यश्च श्रमः समुत्पन्नः सूत्रस्यास्य कृतौ मयि ॥ गजाननविभुस्तेन प्रीयतां मम दैवतम् ॥
इति श्रीमन्महायाज्ञिकनागरज्ञातीयपाठकश्रीरामचंद्रसूनुमहायाज्ञिकगंगाधरपाठकवंशसंभूतपाठकश्रीविलभद्रात्मज-
देवभद्रविरचिते माध्यंदिनीसंहिताया मौनमंत्रसूत्रे चतुर्थोध्यायः ॥ सूत्रं च समाप्तम् ॥

## ४७ कात्यायनशुल्वसूत्रभाष्यम्-गंगाधरः ।

जयत्येको जगत्यां श्रीहरिशंकरदीक्षितः ॥ त्रयीसारविवेक्तृश्रीरामचंद्रगुरोर्गुरुः ॥ १ ॥
रामचंद्रगुरुन्नत्वा गर्गकर्कादियाज्ञिकान् ॥ श्रीकात्यायनशुल्वस्य कुर्वे भाष्यमिदं स्फुटम् ॥ २ ॥ रज्जुसमासं वक्ष्यामः

च.-इति शुल्वभाष्ये सप्तमी कंडिका ॥
रामचंद्रतनूजेन श्रीगंगाधरशर्मभिः ॥ पितृचरणैः सूत्रेऽस्मिन् कातीये शुल्वसंज्ञके ॥ १ ॥
विवृतं यत्ततः शिष्टं तदिह विवृतं मया ॥ गंगाधरतनूजेन रामकृष्णेन धीमता ॥ २ ॥
नागरज्ञातिसंज्ञेन काशीपुरनिवासिना ॥ याज्ञिकास्तेन तुष्यंतु प्रीयतां यज्ञभुग्विभुः ॥ ३ ॥
यदत्रसौष्टवं किंचित्तद्गुरोरेव केवलम् ॥ यदत्रासौष्टवं किंचित्तन्ममैव गुरोर्नहि ॥ ४ ॥
इति श्रीमन्महायाज्ञिकपाठकश्रीरामचंद्रसूरिसूनुमहायाज्ञिकपाठकश्रीगंगाधरकृतं कात्यायनशुल्वसूत्रभाष्यं समाप्तम् ॥

## ४८ कर्मप्रदीपिका-रामचन्द्रः ।

आ.-सात्राजोग्निचितो नत्वा विद्याकरगुरोः पदे ॥ रामः पद्धतिमाधत्ते सोमे कर्मप्रदीपिकाम् ॥ १ ॥
च.-इति सम्राट्स्थपतिरग्निचित्सूर्यदासात्मजस्य विशालाक्षीसूनो रामचंद्रस्य कृतौ कर्मदीपिकायां पद्धतावग्निष्टोमः समाप्तः ॥

## ४९ अग्निष्टोमः श्रौतमार्तण्डीयः-मार्तण्डसोमयाजी ।

आ.-प्रणम्य शारदां साम्बं स्वप्रकाशगुरूनपि । मार्तण्डसोमयाजी तु कुर्वे सोमादिपद्धतिम् ॥ १ ॥
अथ विच्छिन्नसोमपीथदौत्राह्मण्यनिरासार्थमैन्द्राग्नं पशुमादौ
च.-मण्डपमध्वर्यवे तुभ्यमहं सम्प्रददे ॥ इति मार्तण्डसोमयाजिकृतश्रौतमार्तण्डाग्निष्टोमप्रयोगः समाप्तः ॥

## ५० अश्वमेधयज्ञपद्धतिः-पाठकमहानन्दः ।

आ.- अश्वमेधमखस्येह पद्धतिः सर्वसम्मता ॥ वीरभद्रात्मजेनेयं महानन्देन तन्यते ॥ १ ॥
अथ सम्भाराः कुङ्कुम शेर १ फोफल शेर ।०५।.........(एवंसम्भारसंग्रहविषयकपत्रदशकम्)
अथ कात्यायनसूत्रानुसारेणाश्वमेधः—राजयज्ञोऽश्वमेधः सर्वकामस्य अभिषेकादिगुणवान् क्षत्रियो राजेत्युच्यते।
च.-याज्ञिकानां मते निरूढवत्पशुवरधेनूनामन्यतरदक्षिणाः ।
श्रौतानुष्ठानगीर्वाणगुरुभिर्गुरुभिर्भुवि ॥ पाठकश्रीमहानन्दैः स्मार्तेतिनिपुणैरयम् ॥
अश्वमेधाख्ययज्ञस्य प्रयोगस्त्वतिनिर्मलः ॥ निरमायि सतां तुष्टयै नितरां स जयत्वलम् ॥
इति श्रीमन्महायाज्ञिकधुरन्धरपाठककुलप्रदीपपाठकश्रीवीरभद्रात्मजपाठकश्रीमहानन्दविरचितोऽश्वमेधप्रयोगो विद्द्वराणां श्रौतस्मार्तकर्मनिपुणानां सन्तोषाय चिरं भूयादितिशिवम् ॥ संवत् १८६१ वर्षे ॥ श्रीमन्नागरज्ञातीय पण्डितोपनामकचन्द्रदेवात्मजपंडितोपनामककाह्नदेव ————

## ५१ इष्टकापूरणभाष्यम्-याज्ञिकदेवः ।

आ.-द्वैमातुरन्नमस्कृत्य सर्वाभीप्सितदायकम् ॥ इष्टकापूरणस्याहं कुर्वे विवृतिमुज्ज्वलाम् ॥ १ ॥
अथातः सुपर्णचित्यस्याग्ने × कातीयसूत्रशेषमृजुपक्षस्यानुव्याख्यास्यामः
च.-इति श्रीसम्राट्स्थपतिः अग्निचिदेकोनत्रिंशत्क्रतुकृत्महायाज्ञिकप्रजापतिसूनुना याज्ञिकदेवेन कृतं पूरणभाष्यं समाप्तम्॥

## ५२ कातीययजुर्वेदमञ्जरी-कालनाथः ।

आ.-यः शिवो नामरूपाभ्यां या देवी सर्वमंगला ॥ तयोः संस्मरणात्पुंसां सर्वत्र जयमंगले ॥
———— दवनौ वनिपकानां सुरशाखी सुकृती ततः क्षितिशात् ॥
सहदेवनराधिपो यदोजःप्रतिबिंबा ननु भानवा उवा [इवा] याः ॥ १ ॥
असीदमुष्याच्चबलप्रतापः श्रीहंसपालः प्रतिपक्षपालः ॥ वांछाधिकं दानमुदीक्ष्य यस्य पंचत्वमापुः किमु कल्पवृक्षाः ॥२॥
ततोजनि श्रीमहसां निदानं सन्मंगलो मंगलभूमिपालः ॥ पदत्रयं येन हरेः पवित्रं कीर्तिप्रसूनैरमहि प्रगल्भैः ॥ ३ ॥
तस्मादितस्सारकलाविलासः श्रीवीरवालो जगदेकपालः ॥ आसीदनासीददधो मघोनःसंस्पर्द्धमानः क्रतुभिः शतेन ॥ ४ ॥
गुणाल्वाले धनसत्त्वबीजान्निरंतरं दानजलावसेकैः ॥ उदीयमाना निजवंशमुच्चैरालंब्य यत्कीर्तिलता जजृम्भे ॥ ५ ॥

तस्मादभूदरिविभूतिविभूतलक्ष्मीरक्षीणपुण्यविभवो जसपालदेवः ॥
निर्वैरि यः क्षितितलं प्रविधाय शांतो रामाश्रयात्परशुराम इवाभिरेमे ॥ ६ ॥
नीहारहारहरहासविकासिकाशनीकाशनिर्भरमनोहरकीर्तिवल्पः ॥
दिग्दंतिदंतवलनक्रमतो वितानाः पुष्यंति तारकमिपादधुनापि यस्य ॥ ७ ॥
लक्ष्मीपतिप्रणयकेलिगृहादमुष्माद्दुग्धांबुधेरमृतभानुरिवोदयासीत् ॥
भूभृत्किरीटनिवहेषु पदं दधानः — — कलाभिरमलो मरुराजदेवः ॥ ८ ॥
यस्य प्रतापतपने समुदीयमाने वैरिक्षितीशकमलावलयो निमीलाम् ॥
स्वैरं प्रयान्त्यपि च बान्धवकैरवाली पद्माश्रयां मुदमुपैति विचित्रमेतत् ॥ ९ ॥
निर्दूषणा प्रियतमापि गृहादनेन लक्ष्मीविनोदनवशंवदमानसेन ॥
निष्कासितास्ति कुरुकं त्विति किं प्रवक्तुं कीर्तिः परिभ्रमति दिग्वलयं यदीया ॥ १० ॥
दानैर्निवृत्तिपदवीं नयतोर्थिनश्च प्रत्यर्थिनं च न श्वरं [शिरः] प्रणयं दधानः ॥
यः संसदि स्फुरति चाद्भुतमंत्रशक्तिविस्मापितामरगुरुर्गुणरत्नभूमिः ॥ ११ ॥
यो निश्चिनोति विदुषामपि संशयेषु धर्मे श्रुतिस्मृतिगतानभिधेयभावान् ॥
यश्चातनोति निखिलासु कलास्वभिज्ञो यज्ञान [न्न] यज्ञमहितानहितापकारी ॥ १२ ॥
स यजुर्मंजरीं रम्यां करोति कृतिनाम्मुदे ॥ नानाविधफलव्यूहप्रसवोल्लासितश्रियम् ॥ १३ ॥
विविच्य भाष्यं विविधांश्च कल्पानेतस्य तोषाय मुदा व्यतानीत् ॥
भट्टस्वयंभूतनयोत्र विद्वाञ्श्रीकालनाथः सहकारिभावम् ॥ १४ ॥
व.:-इति रणदीक्षाप्रकारः चतुर्थः ॥

## ५३ कात्यायनीयस्नानसूत्रपद्धतिः-हरिहरः ।

आ.:-प्रणतोस्मि हरेरंघ्रिसरसीरुहमादरात् ॥ यज्जगत्पावनं पाथः प्रासोष्टामरसैंधवम् ॥ १ ॥
कात्यायनकृतस्नानविधेर्व्याख्यापुरःसरम् ॥ विधास्ये पद्धतिं विद्वत्सदाचारद्विजप्रियाम् ॥ २ ॥
म.-महालयविधौ तीर्थे तथा तर्पणे ॥
इति श्रीमिश्राग्निहोत्रिहरिहरकृतौ कात्यायनोक्तस्नानविधिसूत्रव्याख्यानपूर्विका स्नानपद्धतिः समाप्ता ॥

## ५४ गृह्यपद्धतिः-भास्करदीक्षितः ।

आ.:-अथ यजुःशाखीयगृह्यपद्धतिर्लिख्यते तत्रादौ स्वस्तिवाचनम् ओम्स्वस्ति
अ.-ततः परस्पराङ्के बालकौ दत्त्वा अभिषेकतिलकमन्त्रपाठाद्यमाशिर्ग्रहणं विधाय पुनः स्वस्वबालकं गृहीत्वा स्वस्वावासं
व्रजेतामिति शान्त्या शुभं स्यात् ॥

## ५५ गृह्याग्निसागरः-नारायणभट्टः ।

आ.–नत्वा कृष्णपदांभोजं गणेशं शंकरं शिवम् ॥ लक्ष्मीधरं च पितरं भट्टं नारायणं तथा ॥
यथाज्ञानं विचार्याथ पक्षं शिष्टैरनुष्ठितम् ॥ त्रीणि सूत्राणि तद्ग्रंथानालोच्यान्यांश्च भूरिशः ॥
आरडेरुपनामा वै भट्टनारायणः सुधी : ॥ गृह्याग्निसागरं चैव कुरुते शिष्टतुष्टये ॥
च.–बौधायनमताद्द्रव्यविकल्पः ॥ इति श्रीमदारडोपनामकलक्ष्मीधरभट्टसूरि (सूनु) नारायणभट्टकृते गृह्याग्निसागरे स्थालीपाकादिप्रायश्चित्तविषयनिरूपणं समाप्तम् ॥

## ५६ चयनपद्धतिः-रामवाजपेयी ।

आ.–सत्राजोग्निचितो नत्वा विद्याकरगुरोः पदे ॥ रामः पद्धतिमाधत्ते चयने कर्म्मदीपिकाम् ॥ १ ॥
च.–इति श्रीरामवाजपेयिकृतायां कर्मदीपिकायां चयनपद्धतिः समाप्ता ॥

## ५७ चातुर्मास्ययागपद्धतिः ।

आ.–वन्दे विनायकं रामं श्रीपतिं च सरस्वतीम् ॥ तेजस्विनीं गुरुं चैव सर्वाभीष्टार्थसिद्धये ॥ १ ॥
रामं सीतामुखाब्जे करधृतकमलं साम्यमालोकयन्तं प्रोद्यत्सूर्यैर्नृसिंहं नखदशनमितैर्विघ्नदैत्यं दहन्तम् ॥
शम्भुं दिव्यैः सुनृत्यैः स्मितशुचिवदनैः पार्वतीं नन्दयन्तं ब्रह्माणं वेदकर्मण्यवधृतमनसं नौमि संविन्मुदेहम् ॥ २ ॥
मुख्यानां कालसङ्कोचवृत्तीनां गुणिनां तथा ॥ चातुर्मास्याख्ययज्ञानां पद्धतिः क्रियते मया ॥ ३ ॥
इह तावद्द्विःसंस्थासु गणितानि चातुर्मास्यानि । ततः संस्थानां नित्य
च.–इदयशूलोपस्थानान्तं कर्म्म ॥ इति पाशुकानि चातुर्मास्यानि समाप्तानि ॥ छ ॥ संवत् १६३०

## ५८ पिष्टपशुतिरस्करणी-रामेश्वरः ।

आ.–परारूपेण तिष्ठन्तीं पश्यन्त्यादिप्रभेदतः ॥ प्रकटां नौमि वाग्देवीं वीणापुस्तकधारिणीम् ॥ १ ॥
साध्याक्षरगर्भितां पंचनवाक्षरान्वितां भवतीम् ॥ अनुदिनमनुचिन्तयतां वाचो निर्यान्त्ययत्नतो वदनात् ॥ २ ॥
अवैदिकैर्दूषितमानसानां शङ्कानिवृत्त्यै श्रुतिवर्त्मगामिनाम् ॥ रामेश्वरः पिष्टपशुप्रयोगं प्रमाणकूटैः परिहर्तुमुद्यतः ॥ ३ ॥
च.–वेदबाह्यैरतत्त्वज्ञैर्दूषिता वेदपद्धतिः ॥ रामेश्वरेण कृतिना शोधिता विदुषां मुदे ॥ १ ॥
सेयं विश्वेश्वरो देवो यो मामत्र न्ययोजयत् ॥ तस्यैव चरणे न्यस्तता तेन प्रीणातु शङ्करः ॥ २ ॥
इति श्रीश्रुतिस्मृत्येकशरणकृष्णाकूलनिवासिरामेश्वररचिता पिष्टपशुतिरस्करणी समाप्ता ॥

## ५९ कात्यायनसूत्रप्रयोगसारः-देवभद्रः ।

आ.–श्रीविघ्नेशं याज्ञवल्क्यं मुनिं कात्यायनं गुरुम् ॥ अस्मद्वृद्धजनानां सद्गुरुञ्च हरिशङ्करम् ॥ १ ॥
गङ्गाधरम्पाठकञ्च यागकालविवेचकम् ॥ भागीरथीं मातरञ्च पितरं वलभद्रकम् ॥ २ ॥
पितृभूतिं भर्तृयज्ञं वासुदेवञ्च शङ्करम् ॥ गर्गं कर्कमनन्तंच श्रीहरिस्वामिमाधवौ ॥ ३ ॥

सम्प्रदायप्रणेतृंश्च रामं शुल्वप्रकाशकम् ॥ यज्ञविद्याप्रणेतारं परमं देवयाज्ञिकम् ॥ ४ ॥
दीक्षितश्रीधरं रेणुं पद्मनाभं गदाधरम् ॥ महादेवं हरिहरमित्यादीन्पूर्वयाज्ञिकान् ॥ ५ ॥
प्रणम्य मनसा वाचा कर्म्मणापि च भक्तितः ॥ सूत्रं कातीयं तद्भाष्यं कार्कं दैवं सपद्धतिम् ॥ ६ ॥
श्री अनन्तकृतां रामपद्धतिं याज्ञिकप्रियाम् ॥ अन्धयष्टिं पद्मनाभि सम्प्रदायाख्यपद्धतिम् ॥ ७ ॥
ग्रन्थानेतांस्तु सङ्गृह्य निजबुद्ध्या विमृश्य च ॥ ततोपि याज्ञिकानाञ्च सम्प्रदायो यथाऽधुना ॥ ८ ॥
तथा कर्कानुसारेण ज्योतिष्टोमक्रतोरृजुः ॥ प्रयोगसारनामासौ प्रयोगो रच्यते यतः ॥ ९ ॥
सूत्रवाक्यं समुल्लिख्य प्रयोगलेखनं नहि ॥ कृतम्पूर्वैरततस्तस्य लेखनं क्रियते मया ॥ १० ॥
दर्शपूर्णमासाभ्यामिष्ट्वाऽन्येन यजेतेति श्रुतेः

१.--प्राञ्चो नव्याश्चाहुरिति शिवम् ॥ इति कात्यायनसूत्रप्रयोगसारे ज्योतिष्टोमप्रयोगे सुत्याख्यपञ्चमदिनकृत्यम् ॥
विघ्नेशचरणद्वन्द्वमाधाय हृदि मङ्गलम् ॥ बलभद्रतनूजेन देवभद्रेण धीमता ॥ १ ॥
मया विरचितश्चायं प्रयोगः कर्कसम्मतः ॥ कर्कानुक्तं तदन्येभ्यः स्वीकृतञ्चाविरोधतः ॥ २ ॥
कर्कानुसारिणीनाञ्च पद्धतीनाम्परस्परम् ॥ विरोधे प्रौढभाष्यादिग्रन्थेभ्योङ्गीकृतं वरम् ॥ ३ ॥
क्वचित्कुत्रापि दृष्टं न दृष्टं वृद्धस्य टिप्पणे ॥ न्याय्यं भाष्यार्थतत्त्वं यत्तदप्यङ्गीकृतं तथा ॥ ४ ॥
क्वचिद्भाष्यविरोधेपि याज्ञिकानाम्मतेस्ति च ॥ तत्र सत्सम्प्रदायस्याऽविरोधस्स्वीकृतः पुनः ॥ ५ ॥
ज्ञानादज्ञानतो वापि यच्चेह लिखितम्मया ॥ क्षन्तव्यं तच्च संशोध्यं याज्ञिया अयमञ्जलिः ॥ ६ ॥
न मदीया कृतिर्यस्मादेषा यज्ञस्य वै कृतिः ॥ यथा प्रेरितवान्यज्ञस्तथा लिखितवानहम् ॥ ७ ॥
याज्ञिकानामपत्यानां नव्यानाञ्च हिताय तु ॥ कृतोऽयं सरलत्वेन सञ्चरन्तु सुखेन ते ॥ ८ ॥
अब्दे धृतिशते काश्यां दुग्धविघ्नेशसन्निधौ ॥ पित्रोर्गेहे वसन्नेव ग्रन्थोयं रचितस्ततः ॥ ९ ॥
ज्येष्ठभ्रातुः पृथग्भूत्वा स्वहर्म्ये भैरवापणे ॥ गजाभ्रवसुभूवर्षे सिते सहसि शीतगौ ॥ १० ॥
चतुर्थ्यां संस्थितिं कृत्वा ग्रन्थोयं सुपरिष्कृतः । ततो मे यः श्रमस्तेन प्रीयतां यज्ञभुग्विभुः ॥ ११ ॥
सोमप्रयोगसारेऽस्मिन्देवभद्रकृते वरे ॥ पञ्चत्रिंशच्छती ग्रन्थसंख्येयं समुदीरिता ॥ १२ ॥
अपरिष्कृतमेतस्य पुस्तकं याम्यदिग्गतम् ॥ अस्त्यतोऽनेन साकन्तच्छोध्यमेष ममाञ्जलिः ॥ १३ ॥
इति श्रीमन्महायाज्ञिकनागरजातीयपाठकश्रीरामचन्द्रसूनुमहायाज्ञिकश्रीगङ्गाधरपाठकवंशसम्भूतपाठकश्रीवलभद्रात्मजदेवभद्रेण रचिते कात्यायनसूत्रप्रयोगसारेऽग्निष्टोमसंस्थाज्योतिष्टोमप्रयोगस्समाप्तिमगमत् ॥

## ६० यूपस्थापनम् ।

१.--अथ यूपस्थापनविधिः। सविताप्रसवेति यूपवृक्षं समागत्य ॥
आयुष्यं वर्चस्यं मन्त्रेण छेदनम् । यूपवृस्केतियूपस्थाने आसनं नयेत् ।
अतः परं प्रवक्ष्यामि यूपानामेव लक्षणम् ॥ प्रशस्तदेशसमुत्पन्ने अरगीशुभदर्शनम् ॥ १ ॥
ब्राह्मणस्य तु पालाशो [ श ] आश्वत्थो बैल्व एव च । वैकङ्कतमयः प्रोक्तः प्रमाणं केशसम्मितम् ॥ २ ॥
२.--पश्चात्सपत्नीसहितं स्नानं कर्तव्यं नवाम्बरं वस्त्रपरिधानम् ॥ ॥ इति यूपस्थापनं परिपूर्णमस्तु समाप्तिमगात् ॥

## ६१ श्रौतपद्धतिः-दीक्षितमहादेवः ।

आ.—विद्यानां विभवं शिवं शिवकरं नत्वा गणेशं गिरं ज्ञात्वा वेदवचांसि कर्कविवृतिं सत्संप्रदायान्विताम् ॥
श्रौतस्मारणकर्मपद्धतिमिमामृज्वीं महार्थामहं वक्ष्ये याज्ञिकवल्लभां गुरुपदांभोजप्रसादोज्ज्वलः ॥ १ ॥
श्रीमच्छ्रीमालनामप्रथितगुणगुणं सत्पुरं भाति भूमौ सारं त्वादाय नूनं विबुधनिलयतो निर्मितं पापतापम् ॥
सत्तीर्थादित्यवृन्दैर्मुनिजननिवहैर्भूषितं भूमिभूषं वेदेज्यादानचंचुद्विजगणशमिताशेषदोषं सतोषम् ॥ २ ॥
श्रीमाले संबभूव द्विजवरतिलकः कान्तकीर्तिः क्रियावान्सूर्यदेवो नाम तस्मादजनि गुणनिधिर्दीक्षितो देवशूरः ॥
नानासच्छास्त्रवेदी श्रुतिविमलमतिर्दानशौंडप्रकांडं तज्जोऽभूत्तेल्लदेवो द्विजगुणविमलः सत्यसंधः सुवंद्यः ॥ ३ ॥
तस्माद्गंगाधरोभूद्गुहुपवनचणाश्रिततार्थप्रदायी सोयं प्रासूत पुत्राववनिसुवलयालंकृती एतयोस्तु ॥
ज्यायान्धन्यो वदान्यो नृपतिशतशिरोरत्नवद्वासुराद्रिर्वेदाध्यायी विनीतो दमशमनिरतः कर्मशीलः सुशीलः ॥ ४ ॥
तस्यायं योनुजन्मा श्रुतविमलमतिः श्रीमहादेवनामा साग्निः सत्यार्थनामा द्विजवरतिलको वेदवेदांतवेदी ॥
साचारः सत्यशीलो यमनियमरतो धर्मशास्त्रेष्वधीतिर्दाता धर्म्मावतारो भुवि विजययुतो यज्ञविद्यावदातः ॥ ५ ॥
अंतर्मेदिनि मेदिनीपतिसभे मान्यो वदान्योग्रणीरंतर्वाणिचरो विचारविदुरो वेदार्थविद्विश्रुतः ॥
तर्के कर्कशगीः स्मृतौ विमलधीर्जज्ञे ततो याज्ञिको जातौ तेन सुतौ महर्षिरुदयो विद्याविनीतावुभौ ॥ ६ ॥
तस्यानुजो धर्मसुधानिधानं लक्ष्मीधरो लक्षगुणैर्विलक्षः ॥ धरामरेज्यः श्रुतवेदवेदी श्रीवासुदेवांघ्रिसरोजभृंगः ॥ ७ ॥
इति कुलवर्णनम् ॥

च.—अनुक्तं प्रागुक्तं द्रष्टव्यम् ॥ इति दीक्षितमहादेवकृतौ श्रौतपद्धतावतिरात्रः समाप्तः ॥

## ६२ श्रौताधानपद्धतिः-गणपतिः ।

आ.—साम्बं शिवं प्रणम्याथ पितरं हरिशंकरम् । करोमि सुखबोधाय श्रौताधानस्य पद्धतिम् ॥ १ ॥
शतपथकल्पभाष्यवाचः सुमतमयो जयतां विचिंत्य ॥ प्रवदति हरिशंकरात्मजन्मा गणपतिरचिता नवाह्नसिद्धिम् ॥ २ ॥
अथ श्रौताधानस्य पद्धतिः ॥

च.—दृग्वेदशैलेन्दुमिते शकाब्दे श्रीविक्रमस्यासित ऊर्जमासे ॥ आरंभणीयं च विधिं वितेने श्रीरावलाख्यो गणपत्यभिज्ञः ॥ १ ॥
इति श्रीमदग्निहोत्रिचातुर्मास्ययाजिसमासादितसकलपुरुषार्थश्रीहरिशंकररावलसूरिसूनु गणपतिविरचिता सकलवैकल्पि-
कपदार्थान्वारंभणीयसहिता श्रौताधानपद्धतिः समाप्ता ॥

## ६३ संस्थापद्धतिः-वैद्यनाथः ।

आ.—अथावसथ्याधानं तत्साध्यानि कर्माणि च कात्यायनानुसारेण लिख्यते । तत्रांगहीनस्यासमर्थत्वात् अश्रौत्रियस्या-
वैदिकत्वात्

च.—इति पाकयज्ञसंस्था ॥ इति श्रीयजुराम्नायचरणमिश्रश्रीकेशवसूनुश्रौतस्मार्त्तप्रचंडरश्मिमिश्रश्रीरत्नेश्वरतनूजनियाज्ञिकभूसु-
दारकवृंदवंदनीयमिश्रश्रीवैद्यनाथप्रकाशिते श्रीसंस्थवैद्यनाथे चतुर्थं मानम् ॥

## ६४ सुपर्णचितिदीपिका—उपेन्द्रः ।

आ.—श्रीमातृचरणयुगलं गुरुपदयुग्मं विभाव्य नत्वाहम् ॥ कातीयसूत्रशेषं कुतुकात्किमपि स्फुटीकुर्वे ॥ १ ॥
नत्वा कात्यायनाचार्य्यं कल्पसूत्रन्तदीरितम् ॥ दृष्ट्वोपेन्द्रः प्रतनुते सुपर्णचितिदीपिकाम् ॥ २ ॥
आपस्तम्बीयसूत्रीयो भरद्वाजान्वयोद्भवः ॥ कर्नाटकः काशिकायान्निवासी याजुषस्सुधीः ॥ ३ ॥
अथातः सुपर्णचित्यस्याग्नेः कातीयसूत्रशेषमृजुपक्षस्यानुव्याख्यास्यामः

च.—एतावत्यो यथा स्युस्तथा करणानि रचयेदित्यर्थः ॥
इति श्रीव्यंकुशास्त्रिशिष्येण रामभट्टसुतेन हि ॥ कृतोपेन्द्रेण बोधाय सुपर्णचितिदीपिका ॥ १ ॥
नागेशदीक्षिताख्येन काण्वद्विजवरेण वै ॥ प्रार्थितोऽहं सतां तुष्ट्यै ग्रन्थारम्भन्तदाकरम् ॥ २ ॥
अक्षयाब्दे माघशुक्लपञ्चम्यां सौम्यवासरे ॥ सप्तख्यार्ये [त्यारये] जनपदे ग्रन्थोयं पूर्णतामगात् ॥ ३ ॥
इति श्रीकात्यायनीयसुपर्णचितिदीपिकायामुपेन्द्ररचितायाम्पूर्णश्लोकाः ॥

## ६५ क्रतुमुक्तावली ।

आ.—यशोदानन्दनं वन्दे कृष्णं कमललोचनम् ॥ गोपिकाहृदयानन्ददायिनं परमाद्भुतम् ॥
अथ सौत्रामणिप्रयोगो लिख्यते ॥

च.—कर्कानुसारणी शुभ्रा क्रतुमुक्तावली मया ॥ गुंफिता शोधनीया सा विद्वद्भिर्वेदपारगैः ॥
सौत्रामणिपद्धतिः समाप्ता ॥

## ६६ आरण्यविवरणम्—शोभाकरः ।

आ. टी.—आरण्यकाभिधे षष्ठोध्यायो व्याख्यायतेधुना ॥.......... आर्षं छन्दो दैवतं च तत्र तत्राभिदध्महे ॥..........
इति महानाम्नः प्रकृतितरितस्त्रो विकृतितो नवसंख्याका ऋचः ।...... यथामति व्याख्यातानि ॥ इति महानाम्नीसमाप्ता ॥
वेदाख्यज्ञानं [वेयाख्यगान] व्याख्यानं सम्यगेतत्कृतं मया ॥
आरण्यगानव्याख्यातिं तथैवाप्यविभाष्यते [वैषा विभाव्यते] ॥ १ ॥

च.—तथार्म्नींद्रादित्याः सहचारिणः सदैवा एवपालमती [यन्ती] त्यर्थः ॥
इति श्रीभट्टशोभाकरकृत आरण्यविवरणे षष्ठप्रपाठकः समाप्तः ॥

## ६७ ताण्ड्यब्राह्मणभाष्यम्—जयस्वामी ।

आ.—अभीष्टसम्यक्प्रवणो विधाता निसर्गचेष्टाप्रशमक्रमेण ॥ यः स्वास्थ्य — — — नारायणं तं प्रणतः प्रपद्ये ॥ १ ॥

मातेव या चित्रफलप्रदानैर्नीचात्मसांमुख्यमथान्यपूर्वम् ॥
त्रयोप्रपञ्चोपशमं प्रधानं नारायणं तं प्रणतः प्रपद्ये ॥ २ ॥
राणायनीयकाचार्य्यौ त्र्य्यनुष्ठानतत्परौ ॥ वन्दे पितृपितृव्यौ च तौ हरिस्वामिसुन्दरौ ॥ ३ ॥
जयन्ति गुरवो वन्द्या – – – – – – सुप्रसिद्धान्तशब्दन्यायप्रभाकराः ॥ ४ ॥
पञ्चात्र पञ्चिका पूर्वब्राह्मणे पञ्चविंशके ॥ कृता कृतधियामर्थे सर्वार्थो – – – – – ॥ ५ ॥
– – – पण्डितधियां ताण्डकार्थप्रकाशिकाम् ॥ मन्त्रब्राह्मणरूपोयं पुरुषार्थावबोधकः ॥
गुरुपर्वक्रमायातो नित्यो वेदः प्रतिष्ठितः ॥

च.—पञ्चदशः प्रपाठकः समाप्तः ॥
पञ्चविंशार्थमालेयं या जयस्वामिना कृता ॥ हरिस्वामिसुतेनास्यां दशाहः परिसंस्थितः ॥
पंचभिः शतैः सार्द्धैर्व्याख्यातोयं पंचदशः ॥

## ६८ सामविधानभाष्यम्–भरतस्वामी ।

आ.—अथातः सामविधानं भाष्योक्तपंचस्वाध्यायासं (ग) तत्साध्यफलप्रसाधकमिति विवक्षुराह ॥ ब्रह्म ह वा इद–

च.—अथावासिन आह उपाध्यायाय ग्रामवरं सहस्रश्वेतं चाश्वं प्रदायानुज्ञातो वा यं कामं कामयते तमाप्नोति तमाप्नोति ॥
इति सामविधाने आचार्यभरतस्वामिकृतौ पदार्थमात्रविकृतौ तृतीयोऽगात्मप्रपाठक इति सामविधानभाष्यं समाप्तम् ॥

## ६९ मंत्रानुक्रमणिका ।

आ.—अथोपनिषत्स यजुपर्वणऋषिच्छंदोदेवताविनियोगब्राह्मणानि सलक्षणानि च

च.—यत्रासेद्वयोर्मधुपर्को मुंच गां वृहती माता रुद्राणां त्रिष्टुप्गौर्द्वयोर्द्वयोः
इति मंत्रानुक्रमणिकायां द्वितीयप्रपाठकः समाप्तः ॥

## ग्रन्थानुक्रमणिका ।

वेयश्चारण्यकश्चैव ऊह ऊह्यस्तथैव च ॥ महानाम्नी पंचमं च छंदस्यारण्यमेव च ॥ १ ॥
महानाम्न्युत्तरा चैव पदस्तोभविशेषतः ॥ तांड्यः षड्विंशब्राह्मणं सामविधानमार्षकम् ॥ २ ॥
अग्निर्वंशेसदंहितस्य मंत्रोपनिषदमेव च ॥ पुष्पलास्यायनसूत्रौ च [नेसूत्रे] गोभिलपुत्रस्तथा क्रमम् ॥ ३ ॥
नारदी लोमशी गौतमी एतेषु च शिक्षकाः ॥ व्याकरणं ऋक्सामतंत्रो [त्रे] निरुक्तं बह्वृचा [च] स्तया ॥ ४ ॥
छंदज्योतिषौ स्थाने ग्रंथानुक्रम उदीरितः ॥ अथ परिशेषं क्रमे चैव उपअंगं [चैवोपांगं] विभाव्यते ॥ ५ ॥
कर्मप्रदीपगोभिलीगृह्यासंग्रहपुत्रकम् ॥ श्राद्धकल्पश्चानुसूत्रं पंचविध्यमनुत्तमम् ॥ ६ ॥

मात्रागायत्रसंहारममृताहरणमेव च । श्रावणं महानाम्न्यश्च हितवाक्यं सोम कथ्यते [उच्यते] ॥ ७ ॥
कार्त्तिक्यं प्रौष्टपदं च स्नानसूत्रं तथैव च ॥ नैगेया धातुसंन्या [ज्ञा] या मंत्रानुक्रममेव च ॥ ८ ॥
चर्णव्यूहश्चतुःशाखा परिशेषानुक्रमाः स्मृताः ॥ ग्रंथानुक्रमः कौथुमानां द्विपंचाश उदाहृतः ॥ ९ ॥
इति ग्रंथानुक्रमणिका समाप्ता ॥ संवत् १८०७

## ७० सर्वानुक्रमणिका ।

आ.–प्रणम्य तातं विश्रामं विघ्नेशं जगदम्बिकाम् ॥ ब्रह्मयज्ञादिसिध्यर्थमृष्यादीनुच्यते क्रमात् ॥ १ ॥
अ.–इति षष्ठः प्रपाठकः क्षुद्रपर्व समाप्तम् ॥

## ७१ लाट्यायनभाष्यम्–रामकृष्णः

आ.–श्रीनृसिंहं गणाध्यक्षं नत्वा दामोदरं गुरुम् ॥ लाट्यायनार्थं व्याचष्टे नानाभाई द्विनामकः ॥ १ ॥
अथ ज्योतिष्टोमादिसहस्रसंवत्सरानामेकाहाहीनसत्राणां विधानं करिष्यन्सूत्रकारः प्रथमं तावत्परिभाषां करोति
अथ विध्यव्यपदेशे सर्वत्र क्रत्वधिकारः
च.–अत्र संवत्सरशब्दोसंभवाद्गौण्या वृत्त्याऽहर्लक्षकः कात्यायनेनोक्तः अह्नां वाक्यत्वादिति ॥
इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाईद्वितीयनाम्ना कृते लाट्यायनसूत्रभाष्ये दशमाध्यायस्य विंशतिखण्डः समाप्तः ॥

## ७२ पञ्चविधिसूत्रम् ।

आ.–प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनानि भक्तयः
च.–निधनं प्रत्यंगमितरेषां यथोक्तं यथोक्तम् ॥ ७ ॥ इति पञ्चविधिसूत्रे द्वितीयः प्रपाठकः ॥ समाप्तोयं ग्रंथः ॥

## ७३ अमृताहरणम् ।

आ.–यस्यांडस्फोटशब्दाद्दशदिशोभवन्कंपिताः
च.–अभयन्नो अस्तु अमृतातरेमा ॥ २९ ॥ अमृताहरणे द्वितीयोध्यायः प्रपाठकः समाप्तः ॥

## ७४ वृषोत्सर्गस्नानविधिः ।

आ.–यत्तीर्थं पावकानः सरस्वतीतिपादावारभ्य मृद्भिर्गात्राणि प्रक्षाल्य ॥
च.–शांत्यर्थंशांत्यर्थम् । प्रौष्ठपदः सप्तमः ॥

## ७५ सामगानां छन्दः ।

आ.—अथातः छन्दसां विचयं व्याख्यास्यामो गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगतीति सप्तार्षाण्येकाक्षरपदादीनि
च.—छन्दोविदेव विप्रस्तु धर्मतस्तद्गुणाश्रितः ॥ छन्दसामेति सालोक्यममृतत्वञ्च गच्छतीत्याह भगवान् गार्ग्यो गार्ग्यः ॥
इति सामगानां छन्दः समाप्तम् ॥

## ७६ सामगानां ऋक्तन्त्रव्याकरणम् ।

आ.—अथ वाचो वृत्तिं व्याख्यास्यामो वायुं प्रकृतिमाचार्य्या वायुमूर्च्छे (मु) च्छ्वासी भवति श्वासो नादर इति शाकटायनो वायुरस्मिन्काये मूर्च्छत्यटतीत्येषोऽर्थः
च.—द्विवतिपरे षाड्त्यः स्वरोनन्त्य इति चतुर्थः प्रपाठकः । सामगानां ऋक्तन्त्रव्याकरणं समाप्तम् ॥

## ७७ सामतन्त्रम् ।

आ.—स्वरोनन्त्यः । नोचान्तानां । उपांत्यं । उपान्त्ये । त्रिषु । आदिः । उपांत्यं चाद्वितीयम्
च.—ग्राम इह विपरीतं विश्वो रोहतु १० अनृगाद्यक्षरम् ॥ इति सा० तन्त्रे त्रयोदशप्रपा०

## ७८ उद्गात्रादिच्छन्दोम० अग्निष्टोमः ।

आ.—अथ विध्यव्यपदेशे सर्वकत्वधिकारः तत्रादौ मातृपूजावृद्धिश्राद्धमेकश्रुतिविधानान्मन्त्रान्कर्माणि चोद्गातैव कुर्य्यादनादेशे सर्वेषां यज्ञोपवीतोदकाचमने नित्ये कर्मोपयतमव्ययो व्यावृत्तिश्चयज्ञाङ्गे करणे प्राङ्मुखकरणम्
च.—सप्तदशानि पृष्ठानि सप्तदश आभव एकविंशोऽग्निष्टोमः समाप्तः ॥

## ७९ अश्वमेधपद्धतिः ।

आ.—अथाश्वमेधस्त्रिरात्रः । तत्रारंभकालदीक्षोपसद्विचारदक्षिणादि सर्वं राजाश्वमेधेन यजेतेत्यादिसूत्रेणोक्तम्
च.—इति सर्वस्तोमोतिरात्रस्तृतीयमहः समाप्तः ॥

## ८० अप्तोर्यामसंस्थापद्धतिः ।

आ.—लाट्यायनं नमस्कृत्य मुनीन्द्रानपि भक्तितः ॥ उद्गात्रे सोम ॥ अथ यज्ञविधिं व्याख्यास्यामः ॥
च.—सर्वाणि कृतास ० स्यासुपद्धतिः ॥ इत्यप्तोर्यामस ० स्थापद्धतिः समाप्ता ॥

## ८१ सामशाखीयब्रह्मत्वपद्धतिः ।

आ.—अथ ब्रह्मत्वमुच्यते ॥ तत्रादौ एकाग्निसाध्यपाठकयज्ञाअष्टकायार्वग्यदयोगृह्योक्ताः ॥
च.—उत्तरेषामेवमादिः ऊहः ॥ इति सामशाखीयब्रह्मत्वपद्धतिः समाप्ता ॥

## ८२ कुशाण्डिका ।

आ.—पूर्णपात्रादिदानं च स्वाशिषो ब्रह्ममोचनम्
च.—अपवर्गे वामदेव्य गानठं शांत्यर्थं शांत्यर्थम् ॥
इति कुशाण्डिका ॥

## ८३ चयनपद्धतिः-रामकृष्णः ।

आ.—अथाग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य प्रयोग उच्यते ॥
ऋत्विगार्षो योनूचान इत्यादि लक्षणवान् ऋत्विग्भवति ॥ असौ ज्योतिष्टोमेन यक्ष्यते तत्रौद्रात्रं भवता कर्त्तव्यमिति सोमप्रवाकेण प्रार्थित उद्गाता यद्यार्त्विज्यं न चिकीर्षति तदा नमः सोमाय राज्ञ इत्युक्त्वा ॥
च.—तत्प्रदेशे गानमिति विशेषः । अन्यत्सर्वमग्निष्टोमेन समानम् ॥
इति श्रीत्रिपाठिदामोदरसूनुना रामकृष्णेन नानाभाईद्वितीयनामधेयेन कृता चयनपद्धतिः समाप्ता ॥

## ८४ अग्निहोत्रे प्रायश्चित्तपद्धतिः-रामकृष्णः ।

आ.—अथ क्रतुप्रायश्चित्तमुच्यते ॥ तत्र प्रथमं तावदवच्छेदप्रायश्चित्तं प्रारभ्योच्यते—तांड्यब्राह्मणे एवमुक्तं । यदि प्रस्तोता
च.—अग्निहोत्रे हौम्यशेषं हुतावशिष्टं हविरेव दक्षिणा नान्यदित्यर्थः ॥
इति श्रीदामोदरसूनुना रामकृष्णेन नानाभाईद्वितीयनामधेयेन कृताग्निहोत्रे प्रायश्चित्तपद्धतिः समाप्ता ॥

## ८५ ज्योतिष्टोमपद्धतिः ।

आ.—अथ शिक्षणीयेष्टौ प्रस्तोता पूर्वमवृतश्चेदिदानीं वृतः
च.—इति ज्योतिष्टोमपद्धतौ तृतीयसवनम् ॥

## ८६ छन्दोगप्रायश्चित्तम् ।

आ.—गणेशं शारदां नत्वा कल्पकारं ततः परम् ॥ प्रायश्चित्तानि वक्ष्येहं क्रतुवैगुण्यशांतये ॥
च.—शेषं प्रकृतिवत्कर्म त्रिषु सवनेषु चोच्यते ॥ इति छंदोगप्रायश्चित्तं समाप्तम् ॥

## ८७ पंचमहायज्ञविधिः ।

आ.—अथ तर्प्पणं लिख्यते उँ नमो ब्राह्मणेभ्यो नमः
च.—श्रीमहायज्ञपुरुषाय नमः ॥ सामवेदोक्तशाकल्यवैश्वदेवः समाप्तः ॥

## ८८ पौण्डरीकप्रयोगः-सदारामः ।

आ.—अभ्यासंगः षडहस्त्रयः छंदोमाश्चतुष्टोमोग्निष्टोमो विश्वजिदतिरात्र इत्यक्तः तस्य द्वादशोपसत्कपक्षे द्वादशाहे
च.—वरदराज इति शिवम्
इति श्रीमत्त्रिपाठिसूरजिततनूजत्रिपाठिदेवेश्वरात्मजसदारामकृतः पौंडरीकप्रयोगः। समाप्तोयं पौंडरीक एकादशरात्रः॥

## ८९ सामवेदीयरुद्री ।

आ.—उँकारस्य ब्रह्मा ऋषिः देवीगायत्री छंदः परमात्मा देवता शिखान्यासे विनियोगः ॥ उँमंत्रमंत्रादौ प्रणवः कार्यः
च.—अतो देवा अवंतुतो [नो] यतो विष्णुर्विचक्रमे । पृथिव्या अविसानवि० ॥ इति दिक्पालः ॥

## ९० रुद्रजपः ।

आ.—भ्राजा । २ । भ्राजा ३१ उवा २ अग्न आयुंषि पवसे आसुरवो—
च.—उँस्वस्ति नो बृहस्पतिर्दधातु ॥ १९ ॥ इति रुद्रजपः संपूर्णः ॥

## ९१ वाजपेयस्तोमप्रयोगः ।

आ.—अग्नेस्तेजसेंद्रस्येंद्रियेण सूर्य्यस्य वर्चसा बृहस्पतिस्त्वा युनक्तु
च.—पर्यायादिषु हिंकारेण स्तुवीरन्स्तुतस्य वाजपेयस्य स्तोमप्रयोगः समाप्तः ॥

## ९२ संख्याकल्पः ।

आ.—नवशतं सहस्रैकं त्रिंशत्सप्ताधिकं तथा कौथुमायामृचार्द्ध सम्यक् संख्यामाहुर्मनीषिणः ॥
च.—इति संख्याकल्पः समाप्तः ॥

## ९३ सदस्यपद्धतिः-दीक्षितरामकृष्णः ।

आ.-सदस्यपद्धतिरुच्यते तत्र सूत्रम् । तस्य दधिभक्षान्तं कर्म्म ॥
ं.-इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाईद्वितीयनाम्ना कृता सदस्यपद्धतिः समाप्ता ॥

## ९४ सर्वतोमुखपद्धतिः-दीक्षितरामकृष्णः ।

आ.-सर्वतोमुखस्य त्रिवृत्सोमस्य स्तोत्राण्युच्यन्ते ॥ तत्र महन्मेवोच इत्यादिसमिदाधानांतो विधिर्ज्योतिष्टोमवद्भवति ॥
अं.-अत्र वैराजस्याभावे इन्द्रजुषस्वेति स्वरा न भवंति ॥ तथाच निदानसूत्रम् ॥
विराजामन्वयोयस्वराजो अयेषुरिति ॥ इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नाह्नाईतिद्वितीयनाम्ना कृता ॥
सर्वतोमुखस्य पद्धतिः समाप्ता ॥

## ९५ सर्वविष्टुतीनां प्रयोगः ।

अं.-शस्यपथ्ययैव कुर्य्यात् ॥ इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाईद्वितीयनाम्ना कृतः सर्वविष्टुतीनां प्रयोगः समाप्तः ॥

## ९६ अथर्वसर्वानुक्रमणिका ।

आ-ॐ ब्रह्मदेवं नमस्कृत्य दुर्गां विघ्नेश्वरं गुरुम् ॥ नृसिंहं दक्षिणामूर्त्तिमथर्वाणमभेदतः ॥ १ ॥
आविःकुर्वे ब्रह्मवेदमंत्रानुक्रमणीं यथा ॥ ऋषिदैवतच्छंदोभिर्युक्ता पाठफलाप्तये ॥ २ ॥
अथाथर्वणगणमंत्राणामृषिदैवतच्छंदांसि ॥
अं.-इति ब्रह्मवेदोक्तमंत्राणां बृहत्सर्वानुक्रमणिकायां दशमः पटलः समाप्तः ॥ ११४ ॥

## ९७ अथर्वप्रातिशाख्यभाष्यम् ।

आ.-अथातो न्यायाध्ययनस्य पार्षदं वर्त्तयिष्यामः पदानां संहितां
अं.-आत्मने भाषा परस्मै भाषा अपिपंत्यपियंति. ४-अथर्ववेदे प्रातिशाख्ये तृतीयः प्रपाठकः समाप्तः ॥

## ९८ संहिताविधिविवरणम् ।

आ.-अथर्ववेदस्य संहिताविधिविवरणं क्रियते तत्र अथर्ववेदस्य नव भेदा भवंति तत्र चतसृषु शाखासु शौनकादिषु कौशिकोयं
संहिताविधिः स च गोपथब्राह्मणादथर्व — — — — — यथोपयोगं टीका
क्रियते संहिताविधेः तत्राह सूत्रं कौशिकः । अथ विधिं वक्ष्यामः ।

च.—समाप्तं शांत्युदकं कर्म नवमी कंडिका तत्र भद्रश्लोकः
प्रमाणपार्वणे चैव प्रस्तुतत्वात्परीक्षते। परिभाषा च सर्वार्था प्रथमे संहिता विधौ ॥

## ९९ द्वासप्ततिपरिशिष्टानि ।

आ.—ॐ नमो ब्रह्मवेदाय ॥ ॐ अथर्ववेदस्य द्वासप्ततिः परिशिष्टानि भवंति। कौशिकोक्तानि कनिका रोहिणी प्रथमं राष्ट्रसंवर्गः राजप्रथमाभिषेकः पुरोहितकर्माणि पुष्याभिषेकः ॥ पिष्टरात्र्याः कल्पः आरात्रिकं घृतावेक्षणं तिलधेनुः भूमिदानं तुलापुरुषः आदित्यमंडकः हिरण्यगर्भः हस्तिरथः अश्वरथः गोसहस्रदानं हस्तिदीक्षा अश्वदीक्षा वृषोत्सर्गः इंद्रोत्सवः ब्रह्मयागः स्कंदयागः संभावलक्षणं अरणिलक्षणं यज्ञपात्रलक्षणं वेदिलक्षणं कुंडलक्षणं समिल्लक्षणं स्रुवलक्षणं हस्तलक्षणं ज्वालालक्षणं लक्षहोमः वृहल्लक्षहोमः कोटिहोमः गणमाला घृतकंबलः अनुलोमकल्पः आसुरीकल्पः उच्छुष्मकल्पः समुच्चयप्रायश्चित्तानि ब्रह्मकूर्चविधिः तडागविधिः पाशुपतव्रतविधिः संध्योपासनविधिः स्नानविधिः तर्पणविधिः श्राद्धविधिः अग्निहोत्रविधिः उत्तमपटलं निघंटु चरणव्यूहं चंद्रप्रादिपदिकं ग्रहयुद्धं ग्रहसंग्रहः राहुचारः केतुचारः ऋतुकेतुलक्षणं कूर्मविभागः मंडलानि दिग्दाहलक्षणं उल्कालक्षणं विद्युल्लक्षणं निर्घातलक्षणं परिभाषालक्षणं भूमिकंपलक्षणं नक्षत्रग्रहो न्यायलक्षणं उत्पातलक्षणं सद्योवृष्टिलक्षणं गोशांतिः अद्भुतशांतिः स्वप्नाध्यायः अथर्वहृदयं भार्गवीयगार्ग्यबार्हस्पत्यउशनसाद्भुतानि महाद्भुतानि लघुसर्वानुक्रमणी चेति ७२
इति परिशिष्टानुक्रमणिका समाप्ता ॥

च.—गणेन रौद्रेण वृतं च हुत्वा तया महात्मा शिवमस्य कुर्यात्तया महात्मा शिवमस्य कुर्यादिति ॥
इति महाद्भुतानि समाप्तानि ॥ द्वासप्ततिपरिशिष्टानां पर्याया: समाप्ता: ॥

## १०० अष्टकाकर्मपद्धतिः ।

आ.—मार्गशीर्षाद्यपरपक्षेषु तिस्रोष्टकाः ॥

च.—कोशादिति ब्रह्मोत्थापनं शांतिः ॥ अष्टकर्मपद्धतिः समाप्ता ॥

## १०१ आभ्युदयिकादिपद्धतिः ।

आ.—आभ्युदयिकादिक्रियमाणपद्धतिर्लिख्यते
वृद्धावादौव्यये चांते मध्ये जुह्वति पार्वणे ॥ एकोद्दिष्टे तथा चांते वैश्वदेवो विधीयत इतिवचनात् ॥
आदौ नित्यवैश्वदेवं विधाय पश्चात्प्राङ्मुख उपविश्य आचमनप्राणायामत्रयं कृत्वा पुनराचम्य ॥

च.—तंडुलेन गणपतिं स्थापयामि ॥
गौरीं पद्मां शचीं मेधां सावित्रीं विजयां जयां देवसेनां स्वधां श्री० ॥ इति ॥

## १०२ कौशिकगृह्यपद्धतिः-केशवः ।

आ.-यथावितानं यज्ञवास्त्वध्यवसेत् । संभारलक्षणे उक्तं यया वितानं च मंडपं कारयेत्
अ.-अष्टकायां क्रियत एतेषु फालिमाठरौ ॥ द्वितीयाकंडिका ॥
इत्यथर्ववेदे कौशिकगृह्यसूत्रस्य चरमचतुर्दशाध्यायस्य कैशवी पद्धतिः ॥

## १०३ दर्शपौर्णमासेष्टिपद्धतिः-रामकृष्णः ।

अ.-यजमानः शान्तिगणं जपित्वा चतुर्भिश्चेति नमस्कारं करोति ॥
इति श्रीअथर्ववेदश्रौतकर्मणि पंचपदार्थी दर्शपौर्णमासेष्टिः समाप्ता ॥
[सहस्र] निगमाध्यायिविप्राणामुपकारकः ॥ अकरोद्रामकृष्णोयं दर्शपूर्णेष्टिपद्धतिम् ॥

## १०४ लक्षहोमपद्धतिः-गोविन्दः ।

आ.-गणेश्वरं गुरुं नत्वा गिरं गीर्वाणवन्दिताम् ॥ आतन्मोथर्ववेदोक्तलक्षहोमस्य पद्धतिम् ॥
ब्राह्मणो वा राजा वा वैश्यो वा ग्रामो वा जानपदो वा श्रीकामादिप्रशस्ते स्वानुकूले शुभलग्नादौ सुस्नातः प्रक्षालित-पाणिपाद आचान्तो यजमानः ॥
अ.-सर्वपापक्षयश्च भवति शान्त्यादिषु कुर्वन्सर्वकामसमृद्धिर्भवति ॥
पद्धतिर्लक्षहोमस्य पुरुषोत्तमसूनुना गोविन्देन कृताथर्वपरिशिष्टानुसारिणी ॥

## १०५ शान्तिकम् ।

आ.-प्रणिपत्य गुरून्सर्वान्सर्वशास्त्रविशारदान् ॥ महाशान्तिकमं वक्ष्ये सर्वलोकहिताय वै ॥ अथ कस्य शान्त्यधिकारः ॥
चा.-इति वचनात् बार्हस्पत्यप्रोक्तं शान्तिकं एकचरुविधानम् ॥ इति शान्तिकं समाप्तम् ॥

## १०६ शान्तिकाध्यायः ।

आ.-इह जापकपठनीयः शान्तिकाध्यायो लिख्यते ॥ शन्न इन्द्राग्नी भवता ॥
इत्यथर्ववेदीयशौनकशाखीयशान्तिकाध्यायः ॥

## १०७ स्मार्त्ताधानपद्धतिः ।

आ.-शौनकीयशाखोक्तविधिना पिण्डपितृयज्ञो लिख्यते ॥ अथ उपहारः शूर्पं एकपवित्रं व्रीहिः तंदुल उलूखलमुसलम् ॥

च.—इत्यथर्ववेदोक्तस्मार्त्तविधानस्य पिंडपितृयज्ञपक्षादि सायंप्रातर्होमं वैश्वदेव आग्रयणिकर्म्म नवान्न प्राक्सनकर्म आगमनकर्म समाप्तम् ॥

## १०८ शास्त्रदीपिका सटीका-मू० पार्थसारथिमिश्रः टी० वैद्यनाथः ।

मू० आ.—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।
अथातो धर्मजिज्ञासेत्यत्र प्रमाण स्वरूपसाधनफलैस्साभासैर्द्धर्मो जिज्ञास्यत्वेन प्रतिज्ञातस्तत्रास्मिन्नध्याये प्रमाणं निरूप्यते
किं प्रमाणं को धर्म इति

टी० आ.—सौजन्यसीमाद्दतरामसुद्रमगाधगांभीर्यनमत्समुद्रम् ॥
सदा सदाचारनिरस्ततंद्रं श्रीरामचंद्रं पितरं नमामि ॥ १ ॥
श्रीमन्महागणपतेश्चरणारविंदमानम्य भक्तजनसिद्धिदमादरेण ॥
श्रीवैद्यनाथकविरद्भुतभाट्टतंत्रसिद्धांततत्त्वममलं विशदीकरोति ॥ २ ॥
अधीत्य सकलं शास्त्रं परिशील्य यथामति ॥ सद्गुरूणां प्रसादेन व्याख्यास्ये शास्त्रदीपिकाम् ॥ ३ ॥
आम्नायस्य तत्र तावत् विषयः संशयश्चैव पूर्वपक्षस्तथोत्तरम् ॥ प्रयोजनं च पंचांगं शास्त्रेधिकरणं मतम् ॥
इत्युक्तलक्षणोदाहरणसंशयपूर्वपक्षसिद्धांतप्रयोजनरूपं पंचांगविचारात्मकाधिकरणघटिताध्यायस्तोमरूपेस्मिन्शास्त्रे प्रत्य-धिकरणं चतुर्धा संगतिमाहुः शास्त्रसंगतिरध्यायसंगतिः प्रकृतसंगतिरनंतरसंगतिरिति·········
इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सद्रामचंद्रात्मजवैद्यनाथकृतायां शास्त्रदीपिकायां टीकायां प्रथमोध्यायः समाप्तः ॥

च.—इति·········श्रीमत्तत्कुलजलधिचंद्रधर्मशास्त्रपारावारीणश्रीरामचंद्रसूरिवरात्मज·········॥ १२ ॥

## १०९ तस्याष्टीका-शंकरः ।

आ.—वाक्यात्मसूक्तं विध्यर्थवादमंत्रस्मृति ॥ प्रामाण्यनामसु पदात्मसु ब्रूतेधुना त्विह ॥ १ ॥
उक्तसमाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् अत्र भाष्यकारः उद्भिदा यजेत पशुकामः एवं बलभिदं । अभिजिता विश्वजिता यजेतेत्युदाहरय किमुद्भिदान्यः शब्दा गणविधयः कर्मनामधेयानि वेति विचारमुपक्रम्य उक्तसमाम्नायैद-मर्थ्यमित्यादि·········अथातो धर्म—

च.—त्रयाणामिति ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते शास्त्रदीपिकाप्रकाशे द्वादशस्याध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः ॥

## ११० तस्याष्टीका-सोमनाथः ।

आ.—आविष्करोतु विबुधैरभिवंदनीयां वाचं स कोपि मम बलवसार्वभौमः ॥
वंशोपि यत्परिगृहीततया बिभर्ति वाचालतां त्रिभुवनैकविमोहयित्रीम् ॥ १ ॥

अधिगत्य कलामखिलामग्रभवाद्वेंकटाद्रियज्वगुरोः ॥ वचनैरनतिप्रचुरैर्व्याकुर्वे शास्त्रदीपिकां विशदम् ॥ २ ॥
विबुधाः प्रणम्य मूर्ध्ना बहुधा वः प्रार्थये कृतावरयाम् । अर्पयत दृशं सूक्ष्मां निंदत परतोभिनंदत वा ॥ ३ ॥
परिलिखतः किंचिदपि प्रकृतिर्भवति प्रमाद इति ॥ अन्विष्य गुणकणानप्यभिनंदत वीतमत्सरा विबुधाः ॥ ४ ॥
आम्नायस्य
इति श्रीनिटिल्लकुलतिलकसूरुभट्टमहोपाध्यायतनुभवस्य व्येंकटाद्रियज्वगुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः
कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां तृतीयस्याध्यायस्याष्टमः पादः ॥ समाप्तश्चाध्यायः संवत् १८६८

## १११ तस्याष्टीका-कमलाकरः ।

आ.–श्रीरामकृष्णपितरं नत्वोमाख्यां च मातरम् ॥ श्रीरामं च शिवं नत्वा व्याख्यास्ये शास्त्रदीपिकाम् ॥ १ ॥
यस्तु राणकचौर्येण स्वपांडित्यं प्रकाशयन् ॥ निनिंद बहुभाषित्वात्तस्य शिक्षेह तन्यते ॥ २ ॥
मूर्खान्प्रतारयद्बालान्यः सिद्धांतमनीनशत् । विन्यस्य तस्य शिरसि दशार्धं कमलाकरः ॥ ३ ॥
आम्नायस्य द्वितीयपादे करिष्यमाणस्यार्थवादादिप्रा माण्यविचारस्य शास्त्रसंगतिमध्यायसंगतिं प्रकृतसंगतिं च वक्तुं कृतमनुकीर्तयति । अथात इति

अं.– इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टरामकृष्णभट्टात्मजकमलाकरभट्टकृते शास्त्रादीपिकालोके एकादशोध्यायः.........इति श्रीजगद्गुरुनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मज महामहोपाध्यायकमलाकर.........

## ११२ तस्याष्टीका-रामकृष्णभट्टः ।

मू० आ.–लक्ष्मीकौस्तुभवक्षसं मुररिपुं शंखासिकौमोदकीहस्तं.........
न्यायाभासतमश्छन्नशास्त्रतत्त्वार्थदर्शनीम् ॥ कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम् ॥ २ ॥
टी० आ.–आनंदांचितवदनं सदनं रघुनंदनं दयामुक्त्योः ॥ सीतालक्ष्मणसहितं वंदे गिरिशादिवंद्यांघ्रिम् ॥ १ ॥
विधिस्तुतिस्मृतिद्वारमद्वारं योगिनामपि ॥ वांछितार्थप्रदं धर्मप्रमाणं राममाश्रये ॥ २ ॥
वाचं वंदे गिरिशतनयं गोत्रदेवीं च भक्त्या वेदव्यासं मुनिवरमयो जैमिनिं सूत्रकारम् ॥
व्याख्यातारं गहनवचनं भाष्यकारं च पूज्यं भट्टाचार्य्यं शिखिगतितनुं तन्मतज्ञान्गुरूंश्च ॥ ३ ॥
अस्त्यत्र रेवोत्तरतीरवर्त्ती देशः प्रसिद्धो भुवि मालवाख्यः ॥
उंकारमाहिष्मतिकाविशालतीर्थाद्यधिष्ठानकृतात्त्यभिष्यः (त्यभिख्यः) ॥ ४ ॥
वसिष्ठपाराशरवात्सकौत्सशांडिल्यसद्भार्गवगौतमाद्याः ॥ वंशाः प्रसिद्धा भुवि मालवानां पूर्वक्षितीशेंद्रसमर्थितानाम् ॥ ५ ॥
वंशो विद्याविनयविमलस्तेषु कश्चित्प्रसिद्धः कर्मब्रह्मप्रवणमतयः सर्व एव द्विजेंद्राः ॥
गोत्रं शक्तिप्रवरसहितं यत्र पाराशराख्यं भक्तिर्विष्णौ भुवनजननी देवताशापुरेति ॥ ६ ॥
शिवदासाभिधस्तत्र वंशे पाराशराह्वये ॥ वेदशास्त्रार्थसम्पन्नः सदाचारपरोभवत् ॥ ७ ॥

तत्पुत्रोभून्मित्रशर्मा द्विजेंद्रो मित्रः साक्षाद्भास्वतेजोविशेषैः ॥
विद्वद्वृंदैः पूजितः सर्वशास्त्रव्याख्याशिक्षोद्गीतकीर्तिः पृथिव्याम् ॥ ८ ॥
जनार्दनस्तस्य सुतो मनीषी जनार्दनार्चानिरतो बभूव ॥
वेदेषु शास्त्रेषु च गीतकीर्तिर्महीयतींद्रार्चितरम्यमूर्तिः ॥ ९ ॥
तस्माज्जातो वेदशास्त्रेष्वधीती गंगादेव्यां भैरवाख्यो द्विजेंद्रः ॥
कीर्तिर्येनोपार्जिता विश्ववंद्या वृत्तिश्लाघ्या भूपतेः शेषवंश्यात् ॥ १० ॥
समुत्पन्नस्तस्मादतिविमलकीर्तिर्द्विजवरः कृती पूतादेव्यां दिशि (दिशि) च नारायण इति ॥
प्रसिद्धः शास्त्रेषु क्षितिपतिसमूहार्चितपदः परब्रह्मानंदामृतरससमास्वादनपटुः ॥ ११ ॥
तस्मादभूद्धर्मतत्—षाय्यां श्रीमाधवः पुण्यचरित्रकीर्तिः ॥ वेदांतवित्त्यक्तभवप्रवृत्तिः श्रीरामचंद्रार्पितचित्तवृत्तिः ॥ १२ ॥
स्वदेशादागतः काश्यां शास्त्राध्ययनसिद्धये ॥ सकलत्रः कृती भाग्यात्स्थितिं तत्र चकार ह ॥ १३ ॥
तस्माज्जातः प्रभावत्यां रामकृष्णाभिधः सुधीः ॥ पितृभक्तिपरः काश्यां सर्वशास्त्रविशारदः ॥ १४ ॥
तत्तद्ग्रंथविनिर्माणात्स्वविद्या प्रकटीकृता ॥ कीर्तिश्च येन विपुला पूर्वापरसमुद्रयोः ॥ १५ ॥
राजराजाभिधश्रीमद्गोपीनाथद्विजोत्तमात् ॥ विद्वन्नागरवृंदेषु प्राप्तं भट्टपदं स्थिरम् ॥ १६ ॥
गजपतिसदसि प्राप्ता पदवी बलभद्रराजगुरोः ॥ पंडितशिरोमणिरिति प्रतापमार्तंडनिर्माणात् ॥ १७ ॥
स तु शास्त्रप्रसादेन व्याचष्टे शास्त्रदीपिकाम् ॥ निमित्तमात्रमत्रैव व्याख्याता रघुनंदनः ॥ १८ ॥
न शास्त्रदीपिकाटीका कृता केनापि सूरिणा ॥ तदपूर्वाध्वसंचारी नोपहास्यः स्खलन्नपि ॥ १९ ॥

ग्रंथकारो ग्रंथारंभे तत्समाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तं विशिष्टेष्टदेवताप्रणतिरूपं मंगलमाचरति । लक्ष्मीकौस्तुभमिति । अध्येतृणांलक्ष्मीसौभाग्यादिप्राप्तिसूचनार्थं जगदीश्वरस्यैतद्विशेषणं प्रस्तरशष्कुलीन्यायेन विघ्नविघातकरसामर्थ्यप्रदर्शनार्थं द्वितीयं विशेषणांतराणि तु भक्तानुग्रहार्थस्वीकृतशरीरध्यानौपयिकानि । मतांतरप्रसिद्धप्रधाने तान्यथासिद्धिवारणार्थं प्रधानात्परमित्युक्तम् । नचैवं देवताधिकरणविरोधः उद्देश्याया एव तद्विषयत्वात् । उक्तं च नास्माकं शब्द एव देवता नाकसदामिंद्रादीनां देवतात्वांगीकारादिति । अत एव वार्त्तिककारैर्विशुद्धज्ञानदेहायेत्यादिना ग्रंथादौ महादेवो नमस्कृतः । उक्तं च भट्टेनेकेन । ग्रंथारंभेभिमतदेवतानमस्कारं करोति वार्तिककार इति । अथवा देवतास्तैरेव प्रधानकर्मण एतत्फलं न देवतायाः तस्या गुणत्वांगीकारात् । केचित्पुनरेतत्कर्मपरत्वेन व्याचक्षते । तथाहि । अनेकपदद्रव्यादिभिर्विशुद्धं यज्ज्ञानं तद्द्रव्यं स्वरूपं यस्य वेदत्रयसमाहाररूपं चक्षुर्ज्ञापकं प्रमाणं यस्य तस्मै स्वर्गादिफलप्राप्तिहेतवे सोमस्यार्द्धं रसरूपं त्याज्यतया यो धारयति तस्मै नम इति । तेषामीश्वरद्रोहिणां प्रतीयमानार्थपरित्यागेनार्थांतरं कल्पयतामनुपादेयमेव तद्व्याख्यानमिदानीं सप्रयोजनं कर्तव्यं प्रतिजानीते । न्यायाभासेति । अत्र पूर्वोक्तप्रभाकराद्युद्भावितन्यायाभासतमोनिराकरणेन शास्त्रतत्त्वार्थप्रदर्शनं ग्रंथस्य प्रयोजनमुक्तम् । शास्त्रदीपिकां करिष्य इति कर्तव्यप्रतिज्ञा कुमारिलमतेनेति मतांतरनिराकरणं ध्वनितम् ॥ कर्त्तव्यं प्रतिज्ञाय ग्रंथस्य मीमांसाशास्त्रविषयत्वं द्योतयितुं तदाद्यसूत्रं लिखति ॥ अथातो धर्मजिज्ञासेति ॥ एवं धर्मविचाररूपं मीमांसाशास्त्रं लक्षणानि चास्य द्वादश प्रमाणभेदशेषप्रयुक्तिक्रमाधिकारसामान्यातिदेशविशेषानतिदेशोहबाधतंत्रप्रसंगाख्यानि प्रमाणादयः प्रसंगांता द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः । तत्र प्रथमाध्याये चतुर्भिः पादैः क्रमेण विध्यर्थवादस्मृतिनामधेयानि

विचारितानि । द्वितीये तूपोद्घातकर्मभेदतदपवादप्रयोगभेदाः । तृतीये श्रुतिलिंगवाक्यादीनि त्रिभिः पादैर्विचारितानि चतुर्थे निवीतादिश्रुत्यादिबलाबलविचारः । पंचमे प्रतिपत्तिकर्म । षष्ठे न— — — — — । सप्तमे बहुप्रधानोपकारकप्रयाजादीनि । अष्टमे याजमानानि प्रधानस्य प्रयोक्तृत्वमप्रधानाप्रयोक्तृता फलचिंता जघन्यांगचिंतेत्येते चतुर्थगाः । पंचमस्याद्ये श्रुत्यादिभिः क्रमो निरूपितः । द्वितीये क्रमविशेषः । तृतीये प्रयाजादिविवृद्धिः । चतुर्थे श्रुत्यादिबलाबलविचारः ॥ अधिकारी तस्य धर्माः प्रतिनिध्यर्थलोपने दीक्षासत्रं देयवह्निःषष्ठपादेष्वमी स्थिताः ॥ सप्तमाद्ये प्रत्यक्षवचनातिदेशः । द्वितीये तस्यैवशेषः । तृतीये नामातिदेशः । चतुर्थे निर्वापौपधलिंगेन प्राकृतधर्मातिदेशः । स्पष्टाल्लिंगादथास्पष्टात्सबलादपवादतः ॥ अतिदेशविशेषाः स्युरष्टमाध्यायपादगाः । ऊहारंभोथ सामाहो मंत्रोहस्तत्प्रसंगजः ॥ नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः ॥ द्वारलोपोस्य विस्तारः कर्यैकत्वं समुच्चयः । ग्रहसामप्रकीर्णानि नञर्थश्चाष्टपादगाः ॥ उपोद्घातस्तयातंत्रावापौ तंत्रस्य विस्मृतिः । आवापविसृतिश्चैकादशाध्यायस्य पादगाः ॥ प्रसंगस्तंत्रनिर्णीतिः समुच्चयविकल्पने । द्वादशाध्यायपदार्था इति पदार्थसंग्रहः । संगतिस्वरूपं चात्र ग्रंथांतरादवगंतव्यम् सूत्रतात्पर्यं दर्शयति । अनेनेति प्रयोजनपरत्वेन सकलशास्त्रशेषत्वमस्यध्वन्यते । किमर्थं प्रयोजनकथनमित्यपेक्षायामाह ॥ श्रोत्रिति ·········

## ११३ वेदप्रकाशः सटीकः-मू० कृष्णानंदतीर्थपादः । टी० सत्यज्ञानानन्दतीर्थपादः ।

मू.-सत्यज्ञानानंदतीर्थं प्राप्तोहं यत्प्रसादतः ॥ तं गुरुं सच्चिदानंदं वंदे वेदं विधिं विभुम् ॥ १ ॥

वेदस्यैव सर्वार्थप्रकाशकत्वेन सर्वपुरुषार्थसंपादकत्वात्तदध्ययनादौ द्विजातीनां प्रवृत्त्यर्थं स्वाभीष्टसिद्धये च तमेव नमस्कारव्याजेन आचार्यमूर्तिस्थं स्तौति । सत्यज्ञानेत्यादिना । यस्य प्रसादादहं मंदोपि सत्यज्ञानादिपदघटितपरमार्थप्रकाशकमन्वर्थं नामधेयं प्राप्तोस्मि तं गुरुं नत्वोपदेष्टारं वंदे । सर्वावस्थास्वभिवादयइत्यर्थः गुर्वादिपूज्याभिवादनशीलस्य सदा विजय इत्यभिप्रायः किं लक्षणं वेदयति प्रकाशयति स्थावरजंगमात्मकं सर्वमिति वेदः सर्वज्ञः सर्वशक्तिस्तं वेदमत एव विधिं सर्वप्रवर्तकं सर्वांतर्यामिणमत एव विभुं व्यापकं सर्वात्मकमिति यावत् । अत एव सच्चिदानंदं अनृतजडदुःखविलक्षणमित्यर्थः । पुनरपि सरस्वत्यात्मानं तं स्तौति ॥

सुस्फोटवर्णपदवाक्यविभक्तिकायां ब्रह्मादिदेवमुनिवंदितपादपद्माम् ॥
गांगेंदुकुंदधवलां करमंजुवीणां वाणीं परां भगवतीं प्रणमामि नित्याम् ॥ २ ॥

स्फुटत्यस्मादर्थ इति स्फोटः सर्वार्थप्रकाशकाः वर्णाः- लौकिका वैदिकाश्च त्रिषष्टिश्चतुःषष्टिर्वा । तत्र लौकिका गौरश्वः पुरुषो हस्तीत्यादयः । वैदिकास्तु अग्निमीळे पुरोहितं इषेत्वोर्जेत्वा अग्न आयाहि वीतये शन्नो देवीरभिष्टय इत्यादयः । पदानि वर्णघटितानि सुप्तिङंतानि तद्रहितान्यपि च तु नेत्यादीनि तद्घटितानि वाक्यानि पदसमूहात्मकानि । विभक्तयः सु औ जसित्यादयः अथवा विभक्तयो विभागाः शक्तयः शब्दनिष्ठतत्तदर्थप्रकाशनसामर्थ्यानि औत्पत्तिकान्यौचित्यानि कार्यैकलिंगगम्यानि शोभना उक्तयः स्फोटादयस्तैरुपलक्षितः कायो यस्यास्तां वाणीं प्रकृष्टया भक्त्या नमामि शेषं सुलभम् ॥ २ ॥

अथ तमेव पुनर्ब्रह्मात्मना स्तुवन्प्रणमति ॥

दुर्बोधमतिगंभीरमगाधमकृतात्मनाम् ॥ अनंतशक्तिसंपन्नं शब्दब्रह्म नमाम्यहम् ॥ ३ ॥

येषां सतां सुपदवीमनुनीय नूनं नानानिबंधकरणे कुशलोहमस्मि ॥
तानानमामि न तु नौमि हरं हरिं मां काशीं शिवां शिवसुतं द्युमणिं च गंगाम् ॥ ४ ॥
नत्वा श्रीजैमिनिं भट्टान् शबरस्वामिनं मुनिम् ॥ वेदप्रकाशं कुर्वेहं स्वशिष्यमतिशुद्धये ॥ ५ ॥
शास्त्रार्थसंग्रहं चादौ द्वितीये विधिभेदनम् ॥ द्विविधां भावनां वक्ष्ये तृतीये विशदां सतीम् ॥ ६ ॥
क्व दुग्धसागरो वेदः क्वाहमल्पबलो लघुः ॥ हास्यास्पदं गमिष्यामि धूर्तानां न महात्मनाम् ॥ ७ ॥
अथाप्यस्य गमिष्यामि पारं मारुतसूनुवत् ॥ रामभक्ति तरीं कृत्वा भवार्णवविलंघनीम् ॥ ८ ॥
इह खलु स्वाध्यायोध्येतव्य इति नित्याध्ययनविधिना विधिवदधीतसांगस्वाध्यायं निष्पापं द्विजातिं आपाततोधिगत-वेदार्थं निःसंदिग्धतया वेदबोधितधर्मानुष्ठानार्थं तं जिज्ञासुमुपलभमानो भगवान् जैमिनिराचार्यः सर्वशास्त्रोपोद्घात-रूपं बह्वर्थमतिगंभीरमिदं सूत्रमादौ स्फुटमुच्चारयामास । अथातो धर्मजिज्ञासेति ॥
च.–वेदः स स्मृतिकोषमूलममलं धर्मैकसारं विदुः स्कंधैर्द्वादशभिस्ततश्च सकलाः षष्टिः सुशाखाश्छदैः ॥
सूत्रैर्गुच्छसहस्रयुक्तिकुसुमः श्रेयोर्थिपक्ष्याश्रितो जैमिन्यालय उत्तमः सुरतरुः सोयं जयत्यध्वगः ॥
अधीत्य वेदं विधिवत्प्रभक्त्या यथोक्तवृत्तं सफलं भजंति ॥ द्विजातयस्ते सुखिनो भवंति विधूतपापाः परमं व्रजं(ति)
स्मृतिकृतपरिखातं वेदशालोपगूढं मुनिजनपरिरक्षं युक्तिमार्गं विशालम् ।
अनभिभवसमर्थं धर्मदुर्गं प्रविश्य स्थित इति भयशून्यः सर्वदैवाहमस्मि ॥
धर्मस्तुतिपरो वाचो व्यापारोयं सुशोभनः ॥ श्रद्धालोर्वेदनिष्ठस्य नायं वाच्यः कदाचन ॥
निर्दोषस्यैकवाक्यत्वं लोकेस्मिन् नैवदृश्यते ॥ सापवादा यतः केचिन्मोक्षस्वर्गावपि प्रति ॥
तस्मान्नात्र प्रकर्तव्यं दोषदृष्टिपरं मनः । दोषो ह्यविद्यमानोपि तच्चित्तानां प्रकाशते ॥
यदत्र लिखितं किंचिन्मया चाज्ञेन भक्तितः ॥ तेन प्रीणातु भगवान् धर्मो नारायणः प्रभुः ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामकृष्णानंदतीर्थपादकिंकरशिष्यश्रीसिद्धज्ञानानंदतीर्थयतिविरचिते वेदप्रकाशे सर्वशास्त्रार्थसंग्रहाख्यं प्रथमं प्रकरणं समाप्तम् ॥

## ११४ मीमांसान्यायसंग्रहः-महादेवः ।

आ.–रामं स्मृत्वा गुरुं नत्वा रचयामि समासतः ॥ शीघ्रोपस्थितये सम्यङ्मीमांसान्यायसंग्रहम् ॥
विलोक्य मत्कृतिं सर्वे पूर्वतंत्रपरायणाः ॥ पूर्वतंत्रस्य सामरस्येनार्थं गृह्णंतु सत्वराः ॥ २ ॥
अथायं धर्मो न विचार्यः अध्ययनविधेः स्वर्गार्थाध्ययनविधायकत्वेन विचाराप्रयोजकत्वात्
च.–होमार्थत्वेन तस्मिन्नपि संस्काराः स्युः ॥ न अरणिमंथनादीनामशक्य– – – – – –

## ११५ लघुचिन्तनम्-राघवदेवः ।

पत्रे ६.–भवतु अदृष्टार्थ इति सिद्धांतः ॥ इति राघवदेवविरचिते लघुचिंतने प्रथमे द्वितीयश्चरणः
च.–आर्त्विज्यं ब्राह्मणस्यैव याजनमिति नियमस्तु पुरुषार्थः । तेन नियमातिक्रमे पुरुषस्यैव प्रत्यवायः न क्रतोर्वैगुण्यमिति प्राप्ते आर्त्विज्यनियमस्य स्वर्यत्वेनापि स्मरणात् क्षत्रिययाजकयज्ञनिंदाश्रुतेश्च ब्राह्मणानामेवार्त्विज्यमिति सिद्धांतः ॥

एवं धर्मप्रमितये यत्कृतं लघुचिंतनम् प्रथमेति तदनेन प्रीयतां सर्वगो हरिः ॥ १ ॥
इति श्रीमदनन्तदेवविरचिते लघुचिन्तने द्वादशे चतुर्थः पादः ॥ अध्यायः समाप्तः ॥.

## ११६ विधिरसायनः-मू० टी० अप्पयदीक्षितः ।

T. टी.–उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ॥
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ॥ १ ॥
जन्मस्थेमलयं समस्तजगतां यस्यैव लिलायितं यन्नाम्ना यतते भवस्थिरमहापाशक्षयः प्राणिनाम् ॥
तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वादिकं शाश्वतं सांबं ब्रह्म रसालमूलरसिकं पश्येयमंतर्दृशा ॥ २ ॥
यत्कुमारिलमतानुसारिणा निर्मितं विधिरसायनं मया ॥ पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥ ३ ॥
प्रारिप्सितप्रकरणाविघ्नपरिसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मंगलमाचरन्नेव प्रकरणारंभं तावदाक्षिप्य समाधत्ते ।
विख्याता मुनिवर्यसूक्तिषु विधाश्चिस्रो विधिस्रोतसामाचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः ॥
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥ १ ॥
मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु विधिर्वा स्यादपूर्वत्वान्नियमार्था वा पुनः श्रुतिरुच्यते । परिसंख्येत्येवमादिषु त्रयो विधिप्रकाराः प्रसिद्धाः अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति ते च भट्टपादैः परस्परासंकीर्णविषयतया स्पष्टमेवोपपादिताः तत्र स्वत एव निरवद्ये ग्रंथकारैश्च बहुभिर्निष्कर्षं प्रापितेऽपूर्वविध्यादिविभागे नूतनं किंचिद्विचारणीयं नास्त्येव यद्यप्येवं तथाप्यपूर्वविध्यादीनां द्वादशस्वध्यायेषु विप्रकीर्णैरिहापूर्वविध्यादिलक्षणविचारव्याजेन तत्र तत्र प्रदर्शनीयैरुदाहरणविशेषैस्तमेवार्थमतिस्पष्टीकर्तुं प्रकरणमिदमारभ्यत इत्यर्थः
I.–तान्येवाह समाप्तोयं ग्रंथः इति विधिरसायनग्रंथः समाप्तः ॥ इति श्रीमदद्वैतविद्याचार्यश्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमद्विश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पदीक्षितस्य कृतौ विधिरसायनसुखयोजिन्यामपूर्वविधिलक्षणाक्षेपः ॥

## ११७ शिवार्कोदयः-गागाभट्टः ।

T.–धरित्रीपुत्रीदृग्विहरणपवित्रीकरणकृत्कटाक्षाणां पात्री मुनिमखविधात्री सपदि सा ॥
भवित्री मच्चेतोभवनमलहंत्री दिविषदामभीतेर्दात्रीयं दशवदनहंत्री प्रतिकृतिः ॥ १ ॥
श्रीमद्भोसलवंशभूषणमणिक्षोणीशशाहात्मजच्छत्राधीशशिवक्षितीशियशसः स्तंभो निखातोपरः ॥
गागाभट्टमनीषिणाधिधरणि ग्रंथः शिवार्कोदयो येनाबद्धयशोध्वजेन सकलैवाश्वेति लोकत्रयी ॥ २ ॥
E.–पूर्वोक्तयुक्त्या च निषेधतोपि सत्रा तयान्यार्यनिदर्शनाच्च ॥
आर्त्विज्यमिष्टं खलु विप्रनिष्टं भवेन्न वर्णत्रयगं कदाचित् ॥
श्रीभट्टनारायणवंशजंवूद्वीपोत्थगागाभिधभट्टमेरोः ॥
स्फुटे शिवार्कोदयनामभाज्यभूद्द्वादशाध्यायचतुर्थपादः ॥
प्रारंभयत्न इह यः खलु कारिकाभि रद्धाप्रतिभ – – – मविदुषणाय [रद्धा प्रतिप्रतिभधामविदूषणाय] ॥
दुःखं सतां तंदसमाप्तिकृतं शिवेन छत्राधिपेन सुविचिंत्य समापितः सः ॥

यत्तर्कपादे बऊ [पादैर्बहु] नाग्रहेण श्लोकैः कृतं वार्तिकमार्यवर्यैः ॥
गागाभिधेनायमपूरि शेषः तस्याज्ञय [ज्ञ] या छत्रपतेः शिवस्य ॥ २ ॥
तस्यानुरोधादिह वादिवर्णाधिक्ये चतुर्थाश्र [श्रम] भंगदोषः ॥
गुणोस्तु विद्वत्कविकंठमाप्तो दुष्टोपि पुण्योश्रि [श्रि] गत (प्र) वाहः ॥ ३ ॥
इति श्रीमन्नारायणभट्टसूरिसूनुश्रीमद्रामकृष्णात्मजभट्टदिनकरसुतगागाभट्टकृतः शिवार्कोदयः समाप्तः ॥

## ११८ न्यायरत्नमाला-पार्थसारथिमिश्रः ।

आ.—आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम् ॥ ब्रह्म सर्वमसर्वं च वन्दे देवं हरिं विभुम् ॥ १ ॥
मीमांसार्णवसंभूतैः कुमारस्वामिनोद्धृतैः ॥ न्यायरत्नैरिमां मालां संगृह्णामि मनोरमाम् ॥ २ ॥
तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते ॥ आचार्यदृष्टिमाश्रित्य परपक्षनिरासतः ॥ ३ ॥
तत्र तावदिमं केचित्पूर्वपक्षं प्रचक्षते ॥ आचार्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः ॥ ४ ॥..........
आचार्यमतमाश्रित्य श्रीमद्यज्ञात्मसूनुना ॥ पार्थसारथिमिश्रेण प्रयुक्तितिलकः कृतः ॥..........
पार्थसारथिमिश्रेण स्वतः प्रामाण्यनिर्णयः ॥ व्याख्याविवादसंजातमोहव्यावृत्तये कृतः ॥..........
न्यायागमानुसारेण श्रीमद्यज्ञात्मसूनुना ॥ पार्थसारथिमिश्रेण कृतोयं विधिनिर्णयः ॥..........
पार्थसारथिमिश्रेण वार्तिकोक्त्यनुसारतः ॥ यथाप्रतीति निर्णीतो नियमः सप्रमाणकः ॥..........
पदान्येव पदार्थान्तरान्वितं स्वार्थमभिदधतीति टीकाकारपादाः ॥..........
पार्थसारथिमिश्रेण निर्णयोभिहितान्वये ॥ यथागमं यथाप्रज्ञं वार्तिकोक्तः प्रदर्शितः ॥..........
पार्थसारथिना सम्यग्विशेषे नित्यकाम्ययोः ॥ आचार्यमतमाश्रित्य न्यायलेशः प्रदर्शितः ॥..........
च.—एतत्सर्वं वाक्यार्थसंग्रहरूपेण वार्तिकेन भगव— — — — वजां स्मारयति—लोकवदित्यादिना ॥
तस्मात्प्रक्रान्तरूपोपि विधिस्तावत्प्रतीक्षते ॥ यावद्योग्यत्वमापन्ना भावनान्यानपेक्षिणी ॥..........
भुवनत्रयविख्यातश्रीमद्यज्ञात्मनन्दनः ॥ तत एव श्रुतं प्राप्य विश्रुतः पार्थसारथिः ॥ १ ॥
मीमांसाब्धिं व्याकुलं नोद्य नक्रैर्मन्दप्रज्ञैर्दुर्विगाह्यं विगाह्य ॥ प्रत्याचार्यैराहृतैर्न्यायरत्नैर्मालामेनां कल्पयामास धीरः ॥२॥
नमो जैमिनय — — — — नोय भ — हीमिपिः ॥ — न्यदीयैः समुत्तीर्णे ज्वलद्भिरिव भास्वते ॥ ३ ॥
इति श्रीमद्यज्ञात्माचार्यसूनोः पार्थसारथिमिश्रस्य कृतौ न्यायरत्नमालायामङ्गनिर्णयः समाप्तः ॥ संवत् १६८३ वर्षे कार्तिकवदि १४ ॥

## ११९ न्यायरक्षामणिः-अप्पदीक्षितः ।

आ.—उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ॥
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ १ ॥
यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपञ्चम् ॥
तस्मै तमालरुचिभासुरकंधराय नारायणीसहचराय नमः शिवाय ॥ २ ॥
अथातो ब्रह्मजिज्ञासा ॥ अत्र शास्त्रारम्भोपयोगिब्रह्मात्मैक्य—

ए.—युक्तं ब्रह्मण उपलक्षणम् ॥
इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पदीक्षितस्य कृतौ शारीरिकन्यायरक्षामणौ प्रथमाध्यायस्य तुरीयः पादः ॥ अध्यायश्च समाप्तः ॥

## १२० अद्वैतसुधाकलापः-लक्ष्मणपण्डितः ।

आ.—पराऽपरपदद्वंद्वानुशासनविशारदम् ॥ नमस्यामि गुरुं द्वैतमद्वैतसमवस्थितम् ॥ १ ॥
आत्रेयकौंडिन्यकुलतिलकायितमूर्तिकौ ॥ गोजांऽबिकादत्तबुधौ पितरा (वंतरा) श्रये ॥ २ ॥
काशीवाससमुल्लासिसद्विद्याशीलिसंपदौ ॥ गणेशरघुनायाख्यसंख्यावन्तौ भजेऽग्रजौ ॥ ३ ॥
विश्वविख्यातनागेशनारायणसदाह्वयौ ॥ मत्याऽवमतनासस्यावतुलौ नौमि मातुलौ ॥ ४ ॥
तज्जयत्युत्तमश्लोकपादांबुजरजोंजनम् ॥ येन सत्त्वमयं चक्षुर्मम तत्त्वमवेक्षते ॥ ५ ॥
अन्तः सन्तमसध्वंसे यस्य गावो विकस्वराः ॥ श्रीरामाश्रममश्रान्तं भास्वन्तं तमुपाश्रये ॥ ६ ॥
विन्यस्य [स्त] भूरिभारस्य श्लाघ्यसद्गुरुमातरि ॥ स्थाने मम समेधन्तेनेकधात्वादिसंपदः ॥ ७ ॥
सत्कथापरमार्थाल्पा [भ्या] मनुरंजयतो जनान् ॥ आशयं कालिदासस्य विवरीतुं यतामहे ॥ ८ ॥
उत्तमश्लोकपादेषु यद्वस्त्वधिगतम्मया । वैदिकं वस्तु वाग्देव्याः कथयामि हितं (पु) रः ॥
कः पश्येदुत्तमश्लोककृपालोकविवर्जितः ॥ ९ ॥ — — — — — — — —
यत्संगतोऽद्वैतसुधासमुद्रे संविश्य यद्वात्विकतामिताः स्मः ॥ नरस्वभापहरः सुहृन्नो नारायणः सर्वगुरुः स जीयात् ॥ ११ ॥
कृपाविपाकः पदवाक्यमानसन्मानभाजामुदितो गुरूणाम् ॥ मज्जन्महाऽद्वैतसुधासमुद्रे मंदोपि यन्मंदरतामुपैमि ॥ १२ ॥
सुश्लिष्टसारस्वतसूत्रजातस्फुरत्सदानन्दसुवर्णपूर्णम् ॥ विशुद्धमद्वैतपटं वसाना भूमानमन्तः समुपागताः स्मः ॥ १३ ॥
कुतर्कितप्रान्तरसंप्रचारपरिश्रमान्मंक्षु मुमुक्षमाणाः ॥ अद्वैतवीथीपथिकत्वमेत्य सारस्वतोद्यानमनुश्रयन्तु ॥ १४ ॥
यस्मिन्गुरुज्ञप्तिसुधासमुद्रचिदंबुदश्रीबुधलक्ष्मणस्य ॥ स्वानन्दपीयूषतुषारधाराः संसारमारादतिनिर्हरन्ति ॥ १५ ॥
स्वो [सो] मोऽमृतत्वाय सुधादुघानां [मुधाबुधानां] सारस्वताद्वैतसुधामधासीत् ॥
सारस्वताद्वैतसुधा ममेयं पीता कणेह न्यरुणद्धि मृत्युम् ॥ १६ ॥
शोषं विभाश [व्य] विदुषाऽविदुषामशेषं शोषं च दुर्विषयतो विदुषामशेषम् ॥
शक्ता सदद्वयसुधाम्रसदापिधातुमुद्वृत्तमन्धतमसं स्वसदापि धातुम् ॥ १७ ॥
आरतितः [आसक्तितः] कवितभावमुदस्य सद्यः शुद्धामृतस्रवणतः श्रवणे नियुक्ताः ॥
विश्वस्य — — [तस्य] दुरवापमहोपतापं निर्वापयन्ति हृदयं मम सूक्तिमुक्ताः ॥ १८ ॥
तीर्णो व्याकरणार्णवः स्फुरदुरुद्वैतप्रबंधा अपि श्रीमच्छंकरसूनृतैकरसिका ये केपि लोकोत्तराः ॥
तेषामप्युपले निपस्य विलसंत्याम्नायगेयोत्तमश्लोकश्रीचरणोदिताऽमृतसरिद्भूयादियं भूतये ॥ १९ ॥
काशीगंगा टीकास्वेका । नद्या सूक्तिर्भव्यालोका ॥ २० ॥
स्थालीपुलाकनयनोखिलवाङ्मयस्य ब्रह्माऽद्वयैकपरतामवधार्य धीराः ॥
धिक्कृत्य दृश्यमनवद्यसुखस्वरूपप्रत्यंचमीशमनिशं परिशीलयंतु ॥

वीतत्वगिक्षुशकलानि विनीय पर्वाण्यग्रे कथं दशनहीनजनस्य कुर्याम् ॥
इत्युद्गतो मम दुराधिरपि व्यपेयादद्वैतसाररसिका यदि हन्त सन्तः ॥
सच्चिदानन्दमद्वैतमात्मतत्त्वमविद्यया ॥ जीवभावमिवापद्य दुःस्वप्नेनेव बध्यते ॥
सत्कर्मशुद्धचित्तं तत्तत्त्वमस्यादिवेदतः ॥ गुरूपदिष्टमात्मानमवबुध्य विमुच्यते ॥
इत्येतच्छ्रुतिसर्वस्वमभिसंधाय सत्कविः ॥ कालिदासः प्रववृते कथामुपदिशन्निह ॥
एकः कारणतत्त्वां तामवस्थां प्रतिपद्यसे ॥ नानात्वं रागसंयोगात्स्फटिकस्येव ते स्मृतम् ॥
एकैवमूर्त्तिर्बिभिदे त्रिधाऽसामान्यत्वमेषां प्रथमावरत्वम्। विष्णोर्हरस्तस्यहरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ ॥
रसांतराण्येकरसं यथा दिव्यं पयोऽश्नुते ॥ देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ २५ ॥
बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः ॥ त्वय्येव निपतंत्योघा जाह्नवीया इवाऽर्णवे ॥ २६ ॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ॥ भूतार्थो व्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ २७ ॥
इत्यद्वैतामृतोद्गारः साक्षादेवाऽस्य दृश्यते ॥ एकैवमूर्त्तिर्या सृष्टिर्वेदान्तेष्वेवमित्यपि ॥ २८ ॥
शुचिः कविः परं ब्रह्म कवीनामेवमादिषु ॥ प्रशस्यमानतामीषामात्मवित्त्वे हि युज्यते ॥ २९ ॥
अतिसारश्च मार्जारः सुरतादिविदो यदि ॥ अतः स्तो [स्तौ] तत्यभिमतमद्भुतं किमतः परम् ॥ ३० ॥
अतो वादकथारूपे प्रबंधेत्र महाकविः ॥ वदन्वेदार्थमन्वाहः [ह] वेदमातरि मंगलम् ॥ ३१ ॥
त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ॥ तदित्यृचोस्याः सावित्र्याः परमेष्ठीति वै मनुः ॥ ३२ ॥
परिहायापि वेदांस्त्रीन्कर्माणि विहितानि च ॥ गायत्रीमात्रमाश्रित्य द्विजो भवति निर्भयः ॥ ३३ ॥
इत्यादिशास्त्रशस्या या देवता श्रीसदाशिवः ॥ यद्धि शुद्धं परं ब्रह्मेत्यर्थोस्या मंगलं परम् ॥ ३४ ॥
प्रमादादपरिज्ञातं हिरण्यनिधिवद्द्विजैः ॥ ब्रह्मैवोपास्यते सर्वैरित्ययादावुदीर्यते ॥ ३५ ॥
ब्रह्मैकपरता व्यक्ता गायत्र्यास्तैत्तिरीयके ॥ ब्रह्मवादिन इत्युक्ता तज्जलोत्क्षेपदर्शनात् ॥ ३६ ॥
श्रूयते हि तदुह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्र्यभिमंत्रिता आप ऊर्ध्वं विक्षिपंतीति ।
विशुद्धज्ञानदेहादिः शास्त्रारंभे नमस्कृतः ॥ ग्रहाधिकरणे भट्टैर्गायत्र्योपास्य ईरितः ॥ ३७ ॥
तया व्योमशरीरोपि परमात्मा श्रुतौ श्रुतः ॥ इज्यते वारिणा नित्यं यः स्वं ब्रह्मेति तद्वचः ॥ ३८ ॥
परब्रह्माभिधायिन्या गायत्र्या वारिणेज्यते ॥ सावित्रमंडलेऽधीश इति सोमेश्वरोऽब्रवीत् ॥ ३९ ॥

गायत्र्याश्चायमर्थः यो नः अस्माकं धियः धर्मादिविषया बुद्धीः प्रचोदयात् प्रकर्षेण तत्त्वावबोधे प्रेरयेत् प्रेरयति वा। लिङर्थे बाहुलकाल्लडऽर्थे वा लेट् लेटोऽडाटावित्याट् तस्य देवस्य जगत्सृष्ट्यादिलीलाभिः क्रीडतो द्योतमानस्य च सवितुः सुवति सूयते च सविता तस्य सर्वान्तर्यामितया प्रेरकस्य षूञ् प्रेरणे तुदादिः षूङ् प्राणिप्रसवे दिवादिश्च त्रियते इति वरेण्यं उपास्यतया ज्ञेयतया च सर्वैर्वरणीयं संभजनीयं वृञ एण्यः भर्गः अविद्या तत्कार्यभर्जकं भृजी भर्जने अंच्यंजियुजिभृजिभ्यः कुश्चेत्यसुन् कवर्गश्चांतादेशः भ्रस्ज पाके असुन् भ्रस्जोरोपधयो रमन्यतरस्यामिति रोपधयोर्लोपः रमागमः न्यंक्वादिपाठात्कुत्वमिति तु बह्वृचतृतीयाष्टके वेदभाष्यं तत् सच्चिदानंदात्मकं रूपं धीमहि ध्यायेम । ध्यायतेर्लिङि बहुलं छंदसीति संप्रसारणं । व्यत्ययेनात्मनेपदं यो देवः सविताऽस्माकं धियो धर्मादिगोचराः प्रेरयेत्तस्य भर्गस्तद्वरेण्यं समपास्महे । ४० । इत्याशयेनाह ॥ वागर्थाविव संपृक्तौ·········

ब.—इत्युत्तमश्लोकपदारविंदप्रसादमासाद्य कृतार्थसार्थः ॥ आविर्भवद्भूमसुखाभिरामं मामद्य वाचंयमताभ्युपैति ॥ १ ॥

यय कथापथमपार्थकमभ्युपेत्य तत्त्वं श्रुतिस्मृतिपुराणसदागमानाम् ॥
आविश्चकार रघुवंशकृदाशयत्वं सा नः सदा गुरुपदांबुजरेणुरव्यात् ॥ २ ॥

इत्थं निरंतरगुरुस्मरणोपपन्नसच्चित्सुखामृतमहोदधिमग्नमूर्तेः ॥
श्रीलक्ष्मणामृतकरस्य तु षष्ठ एष सारस्वतोपनिषदो विवृतेः कलापः ॥ ३ ॥

समुद्धृतद्वैतदुरंतशंकोरेकोत्तमश्लोकमुनेर्विनेयः ॥ श्रीलक्ष्मणो दत्तकृतिप्रसूतिर्मुक्तिं परां ब्रह्मविदोऽभ्ययत्त ॥ ४ ॥

अस्ति प्रशस्तविभयो भुवि भूरिविद्यो विद्योतमानगुणधामसमानतश्रीः ॥
ब्रह्मज्ञवंशजलधिर्वसुधासुधांसुस्तस्मिन्नभूदतिमतिर्बुधविश्वनाथः ॥ ५ ॥

सांगोपांगत्वंगदाम्नायमूर्त्तेः कौंडिन्यान्तस्तैत्तिरीयस्य तस्य ॥
पुत्रोन्वर्थः श्रौतनिष्ठावसिष्ठः प्रादुर्भूतो दत्तनामा वरिष्ठः ॥ ६ ॥

हरिहरदृढभक्तिः प्रस्फुरद्वेदपंक्तिः प्रथिततरविरक्तिः स्पष्टशिष्टानुरक्तिः ॥
परिचितपरमार्थन्यस्तबद्धादिसार्थः कथमिव कथनीयो दत्तनामा गुरुर्नः ॥ ७ ॥

श्रीमद्गणेशरघुनाथबुधानुजन्मा गोजात्मजोस्य तनुजोनुजविठ्ठलो यः ॥
देवालयावसथमातुलनागनाथनारायणाधिगतवैद्यकशास्त्रसारः ॥ ८ ॥

महांधकारापहरं परं यदादु [त्साहु] र्महावेदशिरोगिरोत्र ॥
यदीयपुण्यैरुदियाय काश्यां तदुत्तमश्लोकपतीशमूर्त्या ॥ ९ ॥

स लक्ष्मणो दक्षिणदिश्यपास्य श्रियः सदानंदममेदमिच्छन् ॥
काश्यामुदासीनमतिः शरीरे विश्वेशसेवी समयाकरोति ॥ १० ॥

यः शुक्लदीक्षितविनेयगणे गणेयः श्रीमाधवाख्यविबुधाधिगतोरुतर्कः ॥
वेदे पितुः श्रुतसुधाजलधेरधीती साहित्यमन्यजमपि ध्रुवमध्यगीष्ट ॥ ११ ॥

तेनोत्तमश्लोकवपुर्वृषांककृपाकटाक्षैकनिरीक्षितेन ॥ निर्मथ्य सारस्वतसूक्तिसिंधुमध्येयमद्वैतसुधा व्यधायि ॥ १२ ॥

भास्वद्ब्रह्मज्ञानिवंशावतंसश्रीमद्गोजादत्तसूरिप्रसूतेः ॥ हृद्यो विद्वल्लक्ष्मणस्य प्रयासो विश्वेशस्य प्रीतये शश्वदस्तु ॥ १३ ॥

समुद्धृता वाङ्मयदेवतायाः समुल्लसत्सूनृतदुग्धसिंधोः- ॥ अध्येयमद्वैतसुधा धिनोतु पूर्णानपर्णाशितिकंठपादान् ॥ १४ ॥

पीडासमुच्छेददृढाभिसंधेर्व्रीडामुपेतस्य कथानुबंधे ॥ क्रीडामयोद्यद्गुरुपादरेणोर्नीडानुगं मार्गमपावृणोति ॥ १५ ॥

तीर्णव्याकरणार्णवाः स्फुरदुरुद्वैतिप्रबंधा अपि श्रीमच्छंकरसूनृतैकरसिका ये कोपि लोकोत्तराः ॥
तेषामप्युपले निपत्य विलसन्नाम्ना य [च] गेयोत्तमश्लोकश्रीचरणोदितामृतसरिद्धृयादियं भूतये ॥ १६ ॥

इति श्रीमत्पदवाक्यप्रमाणपरमहंसपरिव्राजकाचार्यश्रीमदुत्तमश्लोकतीर्थमहामुनिकृपाकटाक्षैकवीक्षितब्रह्मज्ञानिवंशावतंसदत्तसूरिसुतलक्ष्मणपंडितविरचितायां रघुवंशापरपर्यायसारस्वतोपनिषद्व्याख्यायामद्वैतसुधासमाख्यायां विदेहकैवल्यसमर्थनो नाम षष्ठः कलापः । समाप्तश्चायं फलपरिच्छेदश्चतुर्थो ग्रन्थः ॥

## १२१ अध्यात्मकारिका सटीका-श्रीपुरुषोत्तमः टीकानाम अध्यात्मसुधातरङ्गिणी ।

मू. आ.—श्रीमुकुंदं जगद्योनिं निर्दोषं सद्गुणार्णवम् ।

मू. च.—संसाराब्धिनिमग्नानां प्रसादं कुरु केशव ॥ ४ ॥

इति श्रीअध्यात्मकारिकावलीसप्तमस्तरंगः ॥ ७ ॥ समाप्तोयं ग्रंथः ॥

आ. टी.—श्रीधर्मदेवपादाब्जं स्वभूवंशाब्धिसंभवम् ॥ संसारतापशांत्यर्थं बुद्धौ संधारयेनिशम् ॥ १ ॥

अथ सकलब्रह्मरुद्रादिवंदितपादपीठार्चितयानंतस्वरूपगुणशक्तिश्रीवासुदेवाज्ञया जगदुद्दिधीर्षुर्भगवान् श्रीसुदर्शन नियमानंदसमाख्यया वनितलावतीर्णः सर्ववेदान्तशास्त्रार्थमनेकप्रबंधैर्वाक्यार्थरूपेण संजग्राह ॥ तांश्च प्रबंधान् शंसाव तारस्तच्छिष्यप्रवरो भगवांच्छ्रीश्रीनिवासाभिधो निगदं बभाषे श्रीपुरुषोत्तमाचार्य्यादयश्च विवर्णयामासुः । तेषां शब्द- तोर्थतश्चापारत्वेनातिगंभीराशयत्वेन चाल्पबुद्धीनां तज्जिज्ञासूनां तत्र प्रवृत्त्यनर्हतामवगम्य तेभ्यस्तदर्थजिग्राहयिषय मुकरोपायस्य पूर्वाचार्यप्रणीतशास्त्रार्थसंग्रहरूपस्याध्यात्मसुधातरंगिण्याख्यग्रंथस्यारंभः श्रीश्रीनिवासानुग्रहैककामेन मया क्रियते तस्यार्थसंग्रहश्लोकाश्च ॥

अत्र सप्त तरंगाः स्युः प्रथमे प्रत्यगात्मनः ॥ द्वितीये निर्णयो ज्ञेयोऽचित्स्वरूपस्य संग्रहः ॥ १ ॥

तृतीये भण्यते तत्त्वं परेशस्य यथागमम् ॥ संप्रदायानुसारेण सिद्धांतश्च समासतः ॥ २ ॥

चतुर्थे तदुपायस्य पंचमे सहकारिणः ॥ षष्ठे विरोधिनो रूपं चरमे फलनिर्णयः ॥ ३ ॥

एतावान्सर्वशास्त्रार्थः पूर्वाचार्यैर्निरूपितः ॥ सनंदनपदद्वंद्वानुगैर्ज्ञेयो हि वैष्णवैः ॥ ४ ॥

अध्यात्माख्यसुधानद्यां वैष्णवैर्यत्नतोनिशम् ॥ संसारतापशांत्यर्थं ङ्खवनीयंमुमुक्षुभिः ॥ ५ ॥

स च पदार्थमात्रेण निर्णीयते विशेषविस्तरस्तु तत्र तत्र पूर्वैः कृतत्वादेव । अथ ग्रंथारंभे सदाचारप्राप्तं ग्रंथनिर्विघ्नसमा- प्त्यर्थं स्वेष्टदेवताश्रयणरूपमंगलमाचरति

टी. च.—इति श्रीअध्यात्मसुधातरंगिण्यां फलनिर्णयो नाम सप्तमस्तरंगः ॥

## १२२ अनुमितिनिरूपणं सटीकम्-मू० टी० रामनारायणः ।

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदान्प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ १ ॥

श्रीरामसिंहाख्यगुरुं प्रणम्य सदासुखं श्रीहरिनाथदेवम् । सावित्रिदं चैव भवानिदासं सुचेतरामाख्यनृपं स्वतातम् ॥ २ ॥

क्षमाद्रीं मातरं मत्वा तद्राज्ञीं विष्णुतत्पराम् । ग्रन्थानुमितिसद्व्याख्यां कुर्वे कृष्णप्रणोदितः ॥ ३ ॥

गणेशं च गिरं वन्दे ह्यजं शम्भुं शिवां सुरान् । वन्दे ब्रह्मविदो विप्रान् वैष्णवान् तद्रतान् सतः ॥ ४ ॥

सर्वात्मकं हरिं वन्दे विश्वं चैव तदात्मकम् । तत्कृपामाश्रितः कुर्वे सद्व्याख्यां बुधमोददाम् ॥ ५ ॥

मूलग्रन्थेपि जगन्मङ्गलमङ्गलबोधिका श्रीगोपालतापनीयश्रुतिरेव मङ्गलत्वेनानुसंधीयते—

आ. मू.—सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे । नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥

रामसिंहगुरुं नत्वा हरिनाथं सदासुखम् । वर्णदं पितरं बालबोधायानुमितिं ब्रुवे ॥ २ ॥

अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः ॥

च. मू.–यथा सर्वाणि ब्रह्मात्मभेदबोधकानि द्वैतसत्यत्वबोधकानि अनुमानानि भासानि [भाषितानि].'अयमात्मा ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि तत्त्वमेव, त्वमेव तत्, आत्मैव नृसिंहो देवो ब्रह्म भवति, नान्योतो द्रष्टा, अतोन्यदार्त्तम्, नेह नानास्ति किंचन', इत्यादिश्रुतिभिः 'अहमात्मा गुडाकेश.

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम् ॥

अत्र प्रमाणं वेदान्तो गुरुः स्वानुभवस्तथा । इत्यादिस्मृतिभिश्च बाधितानि ॥

इति श्रीविष्णुसख्यापन्नश्रीरामनारायणविरचितमनुमितिनिरूपणं संपूर्णम् ॥

च. टी.–पञ्चरात्रे वैष्णवतन्त्रे—अयं प्रपञ्च इत्यादि—नच 'वह्निरनुष्णो द्रव्यत्वात् इत्यत्रानुष्णत्वं साध्यं तदभावो-नुष्णत्वम् स्पर्शनप्रत्यक्षेन गृह्यते इति बाधितत्वम् । आकरजे वह्नौ स्वर्णादौ वह्नेरनुष्णत्वनिर्धारणात् ॥ द्रव्यमात्रे क्वाप्युष्णत्वानिश्चयात् । वायुजलादौ स्पर्शेन प्रत्यक्षेणोष्णत्वग्रहेपि भवद्भिस्तन्निमितान्तरकल्पनेनास्वीकारात् । प्रत्यक्षस्य च नभोनीलिमादिप्रत्यक्षवदाभासत्वसंशयस्यावश्यंबाधकत्वासंभवाच्च ॥

नत्वा गुरून्हरिं भक्त्या व्याख्यां हि बुधमोददाम् । तत्कृपालेशतः कृत्वा तत्पादाब्जे समर्पये ॥ १ ॥

इति श्रीविष्णुसख्यापन्नश्रीरामनारायणविरचिता स्वकृतानुमितिनिरूपणव्याख्या बुधमोददा समाप्ता ॥

## १२३ खण्डनटीका-पद्मनाभः ।

आ.–वन्दे तमखिलाधारं भालेन्दुभयविह्वला । काकोलूकपटाद्गूढा यत्कंठकुहरे कुहूः ॥ १ ॥

बलभद्रमिश्रकृतिनश्चरणसरोजे समाराध्य । श्रीपद्मनाभसुकृती खंडनटीकामिमां तनुते ॥ २ ॥

श्रीपद्मनाभकृतिनो वचसां विलासैः श्रीहर्षनिर्मितिमिमामधिगम्य सम्यक् ॥

धीरा यशोनिचयपूरितदिग्विभागा लोकेषु खण्डनपराक्रममातनुध्वम् ॥ ३ ॥

विघ्नध्वंसनकामनया कृतं मंगलं शिष्यशिक्षायै निर्घाति । अविकल्पेति ॥

च.–तथापीति निर्वक्तुमशक्यतया कोपि साक्षी आह तस्येति ॥

श्रीपद्मनाभकृतिना कृतिनां गरिष्ठमानम्य लोकविदितं बलभद्रमिश्रम् ॥

एतावता य (दु)पदिष्टमदुष्टवर्त्म तुष्टोस्तु तेन स कृती सुकृतिप्रगल्भः ॥

## १२४ खण्डनटीका ।

आ.–यो विश्वोंकारवाच्यः सकलविषयभुग्भ्रांतितत्कारणाभ्यां– – – – –

अबोधपंकाविलबोधनीरे यदीयवाचः कतकायमानाः ।

वंदे मुनींद्रान्मुनिवृंदवंद्याञ्श्रीमद्गुरूञ्श्वेतगिरीन्गरिष्ठान् ॥ ६ ॥

वंदे संबुद्धतत्त्वं मुनिनिकरकराराधितश्रीपदाब्जं विद्यालक्ष्म्याश्रितांगं वियति कृतगतिं स्वात्मदृष्टप्रपंचम् ॥

वेदांतोद्बोधजन्मप्रकटनसुभगं शेषभोगात्तदेहमानंदारण्यमीशं कृतभजनजगत्पालनोद्योगशीलम् ॥ ७ ॥

कथाख्यभूमिप्रबलप्रचंडवादीभकुंभप्रविभेदतोत्रम् ॥ रसावसिक्तु[कंत] बुधमंडनं यत्तत्खंडनं व्याकरवाणि रीत्या ॥८॥

ग्रंथारंभे शिष्टाचारपरंपराप्राप्तकर्तव्यभावं परदेवतास्तुतिनमस्काररूपं मंगलं विधातुमधिकारिप्रयोजनसंबंधाभिधेयप्रतिपादनाय चाह । अविकल्पेति

च.—तत्रेति विचारमुपसंहरन् तस्मादिति । अतो द्वितीयः पक्षः परिशिष्यत इत्याहात इति । सोपि न घटत इत्याह तत्रेति। अन्योन्याभावस्यैकत्वे स्यादिदं तदुक्तं तन्न किं तु प्रत्यक्षाभासादिप्रतियोगिकान्योन्यास्त्वकालात्ययापदिष्टत्वप्रतियोगि कृत्वा प्रत्यक्षाभासादि लक्षितान्योन्याभावस्य प्रतियोगि ----------------

## १२५ चुलिकार्थसंग्रहः-वरदाचार्यः ।

आ.—श्रीमत्त्रय्यंतसिद्धांतगुरुपुत्रेण वर्ण्यते । सत्त्वोत्तरप्रसादार्थं तत्त्वत्रयनिरूपणम् ॥ १ ॥

यतिपतिमतनिष्ठान्यामुनार्यप्रबंधैरधिगतपरमार्थान्भूरितर्कान्प्रणेष्यन् ॥

चिदचिदधिपतीनां चिंतनाय प्रबंधं व्यतनुत वरदार्यः सर्वतंत्रस्वतंत्रः ॥ २ ॥

च.—इदं सर्वमप्यर्थजातं द्रविडदेशवासिनां विशदप्रबोधार्थमाचार्यैस्तद्भाषया प्रणीते तत्त्वत्रयचुलिके संग्रहेणाभिहितं सकलदेशवासिनामपि विदुषामवगमायास्माभिः संस्कृतभाषया सम्यगुपपादितम् ॥ इदं हि आचार्यैरभिहितं श्लोकद्वयं तस्मिन्नेव प्रबंधांते ।

इतीरितो देशिकदत्तचक्षुषा यथाश्रुतं व्येंकटनायसूरिणा ॥ अपक्षपातैर्निपुणैर्निषेव्यतामनात्मजीवेश्वरचिंतनक्रमः ॥

तरलदुरवगाहात्तत्त्वदुग्धांबुराशेर्यदमृतमुदहार्षीद्व्येंकटेशो यथावत् ॥

तदिह चुलकमात्रं साधुभिः सावधानैरपुनरुपनिषेव्यं तत्त्वमास्वादनीयम् ॥

परिगतगुरुभक्तिः पद्मनाभांघ्रिपद्मं शरणमुपगतो यः शांतसिद्धांतवेदी ॥

स हि भवति मुनीनां मुक्तिसौधस्थितानामपि परिषदि मान्यो भाग्यसौभाग्यशाली ॥

चिदचिदीश्वरतत्त्वनिरूपणं वरदनायकसूरिनिगुंफितम् ॥ परमपूरुषभक्तिपरायणाः प्रतिपदं परिपश्यतु[त] सूरयः ॥

समाप्तोयं ग्रंथः तत्त्वत्रयचुलिकार्थसंग्रहः ॥ संवत् १९१० ॥

## १२६ तत्वसंबोधः सटीकः-मू० टी० रामनारायणः ।

आ. टी.—सच्चिदानंदरूपाय कृष्णायाक्लिष्टकर्मणे .......... हरिं स्वेष्टदेवं गुरुं तद्रूपब्रह्मात्मनिष्ठाप्रदं रामसिंहं हरिमंत्रदीक्षाप्रदं हरिनाथं सच्छास्त्राध्यापकं श्रीसदासुखं वर्णदं सावित्र्युपदेशेन द्विजत्वापादकं भवानीदासाख्यं नत्वा

आ. मू.—हरिं गुरुं रामसिंहं हरिनाथं सदासुखम् । मुमुक्षोस्तत्त्वसंबोधं कुर्वे नत्वाथ वर्णदम् ॥ १ ॥

च. मू.—तत्त्वसंबोधतो द्वैतं बाधित्वोपशमं व्रजेत् ॥ ५२ ॥

इति श्रीविष्णुसख्यापन्नश्रीरामनारायणविरचितः तत्त्वसंबोधः संपूर्णः ॥

## १२७ ब्रह्मवादः-व्रजनाथः ।

आ.—विशेषैः प्राकृतैः शून्यमप्राकृतविशेषवत् ॥

च.—वांछितप्रदानेन ते मुदे प्रीतयेस्त्वित्याशिर्वचनम् ॥

इति श्रीव्रजनाथजीविरचितो ब्रह्मवादः ।

## १२८ तत्त्वप्रकाशावरणभङ्गः-पीताम्बरः ।

वंदे श्रीवल्लभाचार्यानपारकरुणान्वितान् ॥ स्वीयानां तत्त्वदीपेन स्वांतध्वांतनिवारकान् ॥ १ ॥
नंदसूनुपदसौख्यदं नवं दुःखसंघदलनातिवैभवम् ॥ (श्री)मदग्निपदपंकजासवं भावयामि सततं नमामि च ॥ २ ॥
श्रीमद्वल्लभनंदनपदपाथोजन्मरेणवस्ते मे ॥ संत[तु]कृपामधुभरिता दंतुरमंत (:) क्षमादक्षाः ॥ ३ ॥
श्रीपरिवृढपदपंकजरेणवमेणीदृशा जुष्टम् ॥ कुंकुमपंकमनारतमाप्तुमहं कामये दास्ये ॥ ४ ॥
श्रीकृष्णसंवीतसुवर्णवर्णांबराभिधानोस्य कृपां दधानः ॥ विवेचयन्नाशयमत्र तत्त्वदीपप्रकाशावरणं भनज्मि ॥ ५ ॥
अथ श्रीमद्वल्लभाचार्यचरणाः सात्त्विकानुद्दिधीर्षवः प्रेक्षावतां प्रवृत्तिसिद्ध्यर्थं ग्रंथस्य फलसंबंधं सोपोद्घातं निरूपयंतः तत्त्वदीपविवरणं प्रतिजानते ॥ सर्वोद्धारैरित्यादिभिस्त्रिभिः

च.–इति हरिपदकुंकुमतो भावितवसनस्य वल्लभीयस्य ॥ श्रीमन्निबंधविवृतौ शास्त्रार्थे विषमपदविवृतेः[तिः] ॥ १ ॥
सुरनरकजराजेक्षिष्टदेवेशराजव्यसनकषणराजद्राजलीलासमाजः ॥
यदुपुरपुरुहूतो वामदेवाजनूतो निजपुरमिव पायादंतरापादपायात् [अंतरायादपायात्] ॥ २ ॥
प्रलयजलदवृष्टेर्गोकुलस्यावनाय स्वमृदुकरनखाग्रन्यस्तगोवर्द्धनाद्रेः ॥
भगवत इह शक्त्या तत्त्वदीपप्रकाशावरणभरविभंगे प्रक्रियाद्या समाप्नोत् ॥ ३ ॥
इति श्रीमद्वल्लभाचार्यचरणनखचंद्रचंद्रिका — — — स्नहार्द्रतमसस्नद्दासदासस्य यदुपतिसुतस्य पीतांबरस्य कृतौ तत्त्वदीपप्रकाशावरणभंगे शास्त्रार्थप्रकरणं संपूर्णम् ॥

## १२९ मिथ्यात्ववादरहस्यम्

आ.–रज्जुसर्पवदनाद्यविद्यया यत्र कल्पितमतात्त्विकं जगत् ।
च.–प्रयत्नवत्त्वं तात्पर्यमिति निष्कर्षः ॥ इति मिथ्यात्ववादरहस्यं समाप्तम् ॥

## १३० मुकुन्दमहिमस्तवः-महिमदासः ।

आ.–श्रीमुकुंदं जगद्योनिं गोपीकांतं रमापतिम् ॥ ब्रह्मेशानादिभिर्ध्येयं शास्त्रयोनिं नमाम्यहम् ॥ १ ॥
च.–श्रीमन्मुकुंदमहिमस्तवमेतमर्थ्यं यः कृष्णपादयुगले यदि रागमिच्छन् ।
नित्यं पठेत्प्रयतमानस आदरेण श्रीमन्मुकुंदकरुणासहि [महि] भाजनं भवेत् [स्यात्] ॥ १ ॥
इति श्रीभगवदाचार्यनियमानंदसंतस्याश्रयेण श्रीस्वभूदेववंशाऽनुगेन श्रीभगवन्महिमदासेन विरचितः श्रीमुकुंदमहिमस्तवोयं समाप्तः । श्रीमद्गोपालमहिमस्तोत्रं समाप्तिमगमत् ॥

## १३१ लघुस्तवराजस्तोत्रम्-श्रीनिवासाचार्यः ।

आ.–जय जयेंगितज्ञाता नियमानंद आत्मवान् ॥ नियमेन वशे कुर्वन्भगवन्मार्गदर्शकः ॥ १ ॥

च.—भक्ति देहि पदांबुजे ॥ १ ॥
इति श्रीवैष्णवाचार्यश्रीश्रीनिवासाचार्यविरचितं लघुरत्नराजस्तोत्रं संपूर्णम्

## १३२ लौकिकन्यायसंग्रहः-रघुनाथः ।

आ.—यत्कीर्तिप्रभया मुमुक्षुभवने मायाप्रभावैः प्रभोर्नीलादेर्जनिता प्रतीतिरचला द्यौः संवृता शोभते ॥
यच्छिष्योडुगणैः स मे गुरुरहो हार्दान्धकारापहः श्रीमद्रामदयालुरिन्दुरमलो मोदाय भूयात्सदा ॥ १ ॥
नत्वा शंभुं हरिं गौरीं विधिं ढुण्ढि च भारतीम् ॥ क्रियते रघुनाथेन लौकिकन्यायसंग्रहः ॥ २ ॥
लौकिकन्यायरत्नानामाकरे यत्प्रदर्शितम् ॥ तस्य संक्षेप एवेह शीघ्रबोधाय दर्श्यते ॥ ३ ॥
न्यायार्थं विषयं चैवोदाहृतं च यथामति ॥ वदिष्यामोत्र संक्षेपाद्विस्तरादपि च क्वचित् ॥ ४ ॥
प्रसङ्गादागतानां तु न्यायानां तत्र विस्तृतेः ॥ अर्थमात्रं वदिष्यामः क्वचिदन्यामुदाहृतिम् ॥ ५ ॥
च.—व्याख्यातं न्यायवृन्दं निजमतिमनतिक्रम्य यावन्मयायं पारं प्राप्नोतु शक्तो नहि भवति गुरुः कः पुनर्मादृशो ना ॥
सर्वः सर्वं न वेत्ति प्रयितमिदमतो नास्ति मे त्रास एष शिष्टा ज्ञेया स्वयं वै सुविमलमतिभिः सम्यगाराधितार्थैः ॥ १ ॥
अत्र प्रथमपादे 'यावत्तैलं तावद्व्याख्यानम्' इति न्यायविषयत्वं बोध्यम् । १५३ । २३३ 'यावत्स्नाता तावत्पुण्यम्'
इति न्यायोपीह बोध्यः । १५४ । २२४ । द्वितीये 'अनवबुद्धार्थे प्रवृत्तिर्बिल्ववर्तिगोधाविभजनन्यायेनाशक्येति
ध्वनितम् । १५५ । २३५ यत्र अधिकार्यालाभेऽल्पार्थे प्रवृत्तिर्नदोष' इति विवक्षा, तत्रालाभे मत्तकाशिन्या दृष्टा-
तिर्य(क्षु) कामिते (ति) न्यायः । मत्तकाशिनी स्त्रीविशेषा १५६ । २३६ । तृतीये 'नहि सर्वः सर्वं जानाति' इति
न्यायोर्थतः पठितः । १५७। । २३७ । 'नहि सर्वत्रानीशशक्तिः' इति न्यायः । १५८ । २३८ । 'सर्वसाध्यानिवृ-
त्तिर्नापवादाय' इति न्यायश्चात्र ध्वनितः १५९ । २३९ । पूर्वार्धन्यायाः १६४ । २४० । मिलिताः
वेदाभ्राम्नायसंख्याकलौकिकन्यायसंग्रहः ॥ शिवयोः प्रीतयेऽयं स्यात्पित्रोर्बालस्य गीरिव ॥ १ ॥
गङ्गांभोमिलितस्य वीथिपयसः सत्सेव्यतां वीक्ष्य मे चेतो याति मुदं ध्रुवं मम वचो मिश्रं वचोभिः सताम् ॥
श्रुत्वादिर्वचनैश्च लब्धमिलनं याता सतां सेव्यतां साफल्यं भविता ततो मम कृतेः स्वाभीष्टसंप्रापणात् ॥ ३ ॥
यो ब्रह्मा यश्च विष्णुर्वसुतनुरपि यो यश्च गौर्यादिमूर्तिर्यश्चात्मा सर्वजन्तोः श्रुतिशिखरगिरां यश्च तात्पर्यभूमिः ॥
यस्याबोधात्समुत्थो व्रजति च विलयं यस्य बोधात्प्रपञ्चस्तं शुद्धं संप्रपद्ये शिवममरमजं शंभुमीशानमाद्यम् ॥ ४ ॥
इति श्रीसाधुवृन्दवन्दितपादारविन्दवैराग्यादिरत्नाकरविद्वद्वरश्रीरामदयालुशिष्येण सोमवंशीयगोविन्दरायकुलोत्तंस-
भगवत्परायणश्रीसेवीदेव्याश्रितपादारविन्दश्रीगुलाबरायवर्मात्मजेनोदासीनावस्थेन रघुनाथवर्मणा विरचितो लौकिक-
न्यायसंग्रहः समाप्तः ॥

## १३३ वेदान्तरत्नमञ्जूषा-पुरुषोत्तमाचार्यः ।

आ.—यो ब्रह्मेशसुरर्षिवन्दितपदो वेदान्तवेद्यो हरिस्तं वन्दे मनसा गिरा च शिरसा श्रीश्रीनिवासं गुरुम् ॥
कण्ठे यस्य चकास्ति कौस्तुभमणिर्वेदान्ततत्त्वात्मको भक्तेः[क्तिः] श्रीहृदये शरण्यमगतेः कारुण्यसिन्धुंम[न्धुः स]दा ॥ १ ॥
इह सकलब्रह्मरुद्रादिकिरीटकोटिवन्दितपादपीठेनाऽनन्ताचिन्त्यस्वाभाविकस्वरूपशक्तिवैभवेन ज्ञानबलैश्वर्यवीर्य-

कारुण्यवात्सल्यदयातिती[ति]क्षाद्यनन्तकल्याणगुणार्णवेण[न] जगज्जन्मादिहेतुना सर्वश्रुतिशिरोरत्नवेदान्तवेद्यचरणेन रमानिवासेन भगवता श्रीवासुदेवेन विष्णुना आत्मस्थापितवेदमार्गसंरक्षणाय नियुक्तो निरतिशयात्मप्रिय आत्मशक्त्युपवृंहितानन्तशक्तिः स्वहस्ताधारको निजायुधः कोटिसूर्यसमप्रकाशो भगवान् सुदर्शन [नो] ऽवनितलावतीर्णस्तैलङ्गद्विजवरात्मना तस्मिन्नेव देशे नियमानन्दाभिधो भगवदीयां सनातनीं कलौ नष्टां वेदान्तसन्ततिं प्रवर्तयिष्यन् शारिरकमीमांसावाक्यार्थरूपवेदान्तपारिजातसौरभ्याख्यादिग्रन्थरचनाव्याजेन सर्ववेदान्तार्थं सङ्ग्रहेण संदर्शयामास। तस्य च विधिप्राप्तोपनयनादिसंस्कृताधीतषडङ्गश्रुतिजिज्ञासितधर्म्ममीमांसानिरस्तकर्मफलादिविषयसन्देहकृतत्फलनिर्विज्ञा[ण्ण] भगवद्दिदृक्षालम्पटगुरुभक्तिसम्पन्नमुमुक्षत्वाधिकारिकत्वेनानन्ताचिन्त्यापरिमितस्वरूपगुणशक्तिवैभवपरब्रह्मभूतश्रीवासुदेवविषयकत्वेन श्रीभगवद्भावापत्तिलक्षणमोक्षप्रयोजनकत्वेनाचिन्त्यापारातिगम्भीराशयत्वमाकलय्य मन्दमतीनां सर्वशास्त्रार्थजिज्ञासूनां शिथिलप्रयत्नानां शास्त्रार्थविचारासमर्थानां मुमुक्षूणामुपकारार्थं वेदान्तरत्नभूतां शास्त्रार्थकामधेनुं दशश्लोकीमपि निर्ममे। तथाच तथैवोक्तं स्वयमेव अथाधीतषडङ्गवेदेन कर्मफलक्षयाक्षयत्वविषयकविवेकप्रकारवाक्यार्थजन्यसंशयाविष्टेन तत एव जिज्ञासितधर्ममीमांसाविवेकानिश्चितकर्म्मतत्प्रकारतत्फलविषयकज्ञानवता कर्मब्रह्मज्ञानफलयोः सान्तत्वानन्तत्वसातिशयत्वनिरतिशयत्वविषयकव्यवसायजातनिर्वेदेन भगवत्प्रसादेप्सुना तद्दर्शनेक्षालम्पटेनाऽऽचार्यैकदेवेन गुरुभक्तयेकहार्देन मुमुक्षुणा अनन्ताचिन्त्यस्वाभाविकस्वरूपगुणशक्त्यादिभिर्वृहत्तमो यो रमाकान्तः पुरुषो ब्रह्मशब्दाभिधेयस्तद्विषये का जिज्ञासा सततं सम्पादनीयेति वाक्येन। तथाच शास्त्रम्। स्वाध्यायोऽध्येतव्यः। स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन जुष्टं यदा पश्यति अन्यमीशं यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥

तमक्रतुं पश्यति वीतशोकः। धातुः प्रसादान्महिमानमात्मनः॥

यमेवैष वृणुते तेन लभ्यः। सर्वे वेदा यत्पदमामनन्ति।

तं त्वौपनिषदं पुरुषं पृच्छामः। नामानि सर्वाणि यमाविशन्ति।

शास्त्रयोनित्वात्

वेदैश्च सर्वैरहमेव वेद्यः। निरञ्जनं परमं साम्यमुपैति। तन्महिमानमेति वीतशोकः।

वहवो ज्ञानतपसा पूता मद्भावमागताः। मम साधर्म्यमागताः। तन्निष्ठस्य मोक्षव्यपदेशात्।

तत्तु समन्वयात्। नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वतीत्यादिभाषितं चेदं वाच्यम्। शङ्खावतारैःश्रीश्रीनिवासाचार्यचरणैः।

उक्तं च विश्वाचार्यचरणैः। शङ्खावतारः पुरुषोत्तमस्य यस्य ध्वनिः शास्त्रमचिन्त्यशक्तिः।

यत्स्पर्शमात्राद्ध्रुव आप्तकामस्तं श्रीनिवासं शरणं प्रपद्य इति॥

तस्याश्च मिताक्षरैः कोष्ठचतुष्टयात्मिका वेदान्तरत्नमञ्जूषाख्या मितव्याख्या यथामति विधीयते। तत्र प्रथमे पदार्थसङ्ग्रहः। द्वितीये सम्प्रदायनिर्णयपूर्वकतत्प्राप्तवाक्यार्थरत्नसङ्ग्रहः। तृतीये साधनरत्नकदम्बसङ्ग्रहः। चतुर्थे पूर्वोक्तशास्त्रार्थस्मरणपूर्वकफलरत्नसङ्ग्रह इति विवेकः। तत्र प्रथमे निरूपणीयपदार्थेषु त्वंपदार्थं तावन्निरूपयति ज्ञानेति॥ ॥ –

च.—मंदानामुपकाराय तुष्ट्यै तत्त्वदर्शिनाम् ॥ श्रीकृष्णप्रीतयेयं मे कृतो वेदांतसंग्रहः ॥ १ ॥
प्रसीदतु रमाकांतो गोपीजनमनोहरः ॥ करोतु जगतां श्रेयो मंगलायतनो हरिः ॥ २ ॥
यः श्रीनिवासोखिलवेदवेद्यो न यत्स्वरूपं प्रविशंति तर्काः ॥
येभ्यानयेगेत्र विशुद्धतत्त्वैर्दृष्टो मुकुंदो ह्युपयामि तं गुरुम् ॥ ३ ॥
इति श्रीभगवत्पुरुषोत्तमाचार्यविरचितायां वेदांतरत्नमंजूषायां सिद्धान्तरत्नविवृतौ फलादिरत्नसंग्रहो नाम तुरीयः कोटः।
समाप्तोयं वेदांतरत्नमंजूषाख्यो ग्रंथः ॥ संवत् १९०९ ॥

## १३४ वेदान्तविभावना-सटीका-नारायणतीर्थः ।

आ. टी.—श्री रामगोविंदसुतीर्थपादकृपाविशेषादुपलभ्य बोधम् ॥
श्रीवासुदेवादधिगम्य सर्वशास्त्राणि वक्तुं किमपि स्पृहा नः ॥ १ ॥
प्रेक्षावत्प्रवृत्तये विषयप्रयोजने निर्दिशन् शिष्टाचारपरंपराप्राप्तं निर्विघ्नपरिसमाप्तये कृतं मगलं शिष्याञ्शिक्षयितु-
मुपगीत्या ग्रंथादौ निबध्नाति यदविद्येति

मू. आ.—यदविद्योत्थविलासो भूतमयो भौतिकं दृश्यम्

च. मू.—नत्वा श्रीपुरुषोत्तमाख्यचरणौ दामोदरस्वामिनां तौ गोविंदकृपानिधेश्च चरणौ श्रीरामपूर्वस्य च ॥
विद्याकारणवासुदेवयतिनां तौ पूर्णतामागता सद्वेदांतविभावना हरिरयं प्रीणातु तेन स्वयम् ॥ २२२ ॥
श्री कृष्ण..........प्रीत्यै सतामपि ॥ २२३ ॥ इति वेदांतविभावना समाप्ता ॥

च. टी.—हरिचरणयोजनेन सार्थयति श्रीकृष्णेति ॥ २२३ ॥ इति श्रीमत्..........श्रीरामगोविन्दतीर्थशिष्यनारायणतीर्थ-
विरचिता वेदांतविभावना टीका समाप्ता ॥

## १३५ वेदान्तसिद्धान्तमुक्तावल्याष्टीका ।

आ.—विश्वेशं ढुंढिराजं जगदुदयकृतं शारदां सूत्रकारं व्यासं चाचार्यवर्यं त्रिभुवनविदितं शंकरं भाष्यकारम् ॥
आनंदांतःप्रकाशानुभवपदपदं सद्गुरुं श्रीनृसिंहं वंदे विद्यानिधानं शमदमनिरतं राघवेंद्रं यतीन्द्रम् ॥ १ ॥
यच्छिष्यशिष्यसंदोहव्याप्ता भारतभूमयः ॥ वंदे तं यतिभिर्वंद्यं प्रकाशानंदमीश्वरम् ॥ २ ॥
सिद्धांतमौक्तिकश्रेणीप्रकाशाय प्रदीपिका ॥ क्रियते परपक्षौघध्वांतध्वंसप्रवर्तिनी ॥ ३ ॥..........

## १३६ वेदान्तसिद्धान्तरत्नावली-वनमाली ।

आ.—निखिलनिगमवाच्यं श्रीहयास्यं प्रपद्येऽगणितगुणनिकेतं हेयशून्यं मुकुंदम् ॥
विधिशिवसुरराजैः सेव्यमानांघ्रिपद्मं रमयितुमितमाद्यं मां चिदानंददेहम् ॥ १ ॥
कृतनिगमविभागं योगिभिः सेवितांघ्रिं धृतमुनिवरवेषं वासुदेवांशमीड्यम् ॥

यतिगुरुमरुदे[दं]शं श्रीमदानंदतीर्थं मतिनिधिजयतीर्थं व्यासतीर्थं च वंदे ॥ २ ॥
संग्रहो ब्रह्मवाक्यानां सत्तर्काः परिखीकृताः ॥ यत्राभिधीयते दुर्गाः प्रागुक्तीर्वनमालिना ॥ ३ ॥
प्राचीनोक्तिगुणान्विता श्रुतिशिखासिद्धान्तरत्नावली वाजिग्रीवभुजांतरेऽधितनयाक्रीडास्पदे चार्पिता ॥
नित्यानंदगुणालयस्य दनुजा भूतीर्न मर्षंति ये तेषां चेतसि सा दधातु दहनं चित्ते सतां मोदनम् ॥ ४ ॥
E.—श्रीविष्णोः सदनंतभूतिनिचयं वेदांतगीर्भिर्नुतं योऽकांडे प्रलयत्यतथ्यमिति शिष्यः सौगतस्याधमः ॥
वैरं संदधदासुरोखिलसमे वक्तुं च तस्योत्तरं को विद्वाननुरौति किं मृगपतिः फेरो रुतं क्वापि च ॥ १ ॥
वंदे श्रीहयकंधरं श्रुतिशिखाभिर्गीतकीर्तिं हरिं योगींद्रैः परिभावितं मनसि नित्यानंददेहं समम् ॥
हेषाभिः परिकंपयंतमसुरांश्चानंदयंतं सुरान्स्वांघ्री चिंतयते गिरोऽमलतरा विश्राणयंतं मुदा ॥ २ ॥
श्रीव्यासं मरुदंशं चाक्षोभ्यजयमुखान्मुनीन् ॥ व्यासतीर्थांश्च विष्णूंस्तु विद्यागुरून्नतोस्मि तान् ॥ ३ ॥
भगवतोंघ्रिकंजस्य श्रीगोपालस्य रेणवः ॥ क्रियासुर्वैभवं वाचामघराशेश्च शोधनम् ॥ ४ ॥
भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्दीनबंधुर्द्विजातेर्दत्वा भूतीः पराः स्वा धृतकर इति मा देहि मां पद्मजापः ॥
द्रौपद्याः शाकलेशात्रिभुवनमपुपद्यज्वनां दुष्प्रसाद्यः स्थित्वांतः कारितार्द्धे मम (तु) यदुवरः संग्रहात्प्रीयतां सः ॥ ५ ॥
श्रीगोविंदविहारभूषितभुवो वृंदावनात्प्राग्दिशि — — — — — संपूर्णः श्रुतिसंग्रहे ननु परिच्छेदोंतिमस्त्वलंकृतः ॥ ६ ॥
इति श्रीवेदांतसिद्धांतरत्नावल्यां वनमालिलिखितायां चतुर्थपरिच्छेदः समाप्तः ॥

## १३७ शास्त्रदर्पणः-अमलानन्दः ।

.—विद्यारत्नं मघा [या] वाप्तं पदत्रया [यत्कृपा] पारवारिधेः ॥ तं वंदेनुभवानंदं गुणरत्नाकरं गुरुम् ॥ १ ॥
हरिहरलीलावपुषं परेश्वरं व्यासशंकरौ नत्वा ॥ वाचस्पतिमतनि (दि) तमादर्शं प्रारभे विमलम् ॥ २ ॥
अथातो ब्रह्मजिज्ञासा । ब्रह्म विचार्यं न वेति संदेहः
.—तावदेव तेषां न सर्वेश्वरवन्निरंकुशमिति सिद्धम् ॥
इति श्रीपरमहंसपरिव्राजकानुभावानंदपूज्यपादशिष्यस्य भगवदमलानंदस्य कृतौ शास्त्रदर्पणे चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तं च शास्त्रम् ॥

## १३८ शास्त्रसिद्धान्तलेशसंग्रहः सटीकः-टी०-अच्युतकृष्णानन्दतीर्थः ।

. आ.—वेदवेद्यमुमाकांतं कुमाराभ्यामलंकृतम् ॥ नंदीशप्रमुखैः सेव्यं प्रणमामीष्टसिद्धये ॥ १ ॥
शंकरं शंकराचार्यं व्यासं नारायणात्मकम् ॥ सरस्वतीं च ब्रह्माणं प्रणमामि पुनः पुनः ॥ २ ॥
आपन्ना यं समाश्रित्य रक्षां प्राप सुदुर्लभाम् ॥ कृष्णा कृष्णस्य महिषी तं कृष्णं संश्रयेन्वहम् ॥ ३ ॥
गोविंदेति समाक्रंद्य रक्षां प्राप भयातुरः ॥ यं गजः करुणामूर्तिं तं गोविंदं भजे त्वहम् ॥ ४ ॥
प्रकाशितब्रह्मतत्त्वं प्रकृष्टगुणशालिनम् ॥ प्रणवस्योपदेष्टारं प्रण (मा) म्यनिशं गुरुम् ॥ ५ ॥
यो मे विश्वेश्वरक्षेत्रं विश्वेश्वरसमो गुरुः ॥ समध्यास्ते स्वयंज्योतिर्वाणिसंज्ञो भजामि तम् ॥ ६ ॥
तस्य शिष्यप्रशिष्याद्यैर्व्याप्तेयं सांप्रतं मही ॥ सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये तदा ॥ ७ ॥

गुरोरपि गरीयान्मे यः कलाभिरलंकृतः ॥ अद्वैतानंदवाण्याख्यस्तं वंदे शमवारिधिम् ॥ ८ ॥
ओतप्रोतमिदं सर्वं यस्मिन्सच्चित्सुखात्मके ॥ पर्यवस्यंति वेदांता यत्र चाहं तदक्षरम् ॥ ९ ॥
श्रीकृष्णचरणद्वंद्वं प्रणिपत्य निबंधनम् ॥ व्याकुर्वे शास्त्रसिद्धांतलेशसंग्रहसंज्ञितम् ॥ १० ॥
आचार्यचरणद्वंद्वस्मृतिले [र्ले] शकरूपिणम् ॥ मां कृत्वा कुरुते व्याख्यां नाहमत्र प्रभुर्यतः ॥ ११ ॥
कुमाराभ्यां विघ्नेश्वरसुब्रह्मण्याभ्यां शंकरं शंकरस्य शिवस्यावताररूपं शंकराचार्यं भगवत्पादं तया च शिवपुराणवचनं व्याकुर्वन् व्याससूत्रार्थं श्रुतेरर्थं यथोचितवान् [तम्] श्रुतेर्न्यायैः स एवार्थः शंकरः सवितानन इत्यादि व्यासं सूत्रकृतं बादरायणं नारायणात्मकं नारायणस्यावताररूपं तथाच वचनम् द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुनिरिति न ह्यन्यः पुंडरीकाक्षात्महाभारतकृद्भवेदित्यादि च ब्रह्माणं सरस्वतीभर्तारं हिरण्यगर्भम् आपन्ना सभायां वस्त्रापहारानिमित्तामापदं प्राप्ता रक्षां वस्त्रकोटिलाभनिमित्तां कृष्णा द्रौपदी कृष्णस्य अर्जुनस्य प्रकाशितं शिष्येभ्य उपदिष्टं ब्रह्म तत्त्वं येन गुरुणा सता प्रोक्तं स्वयंज्योतिर्वाणीसंज्ञः स्वयंप्रकाशसरस्वतीसंज्ञः गरीयान् गुरुः इदं सर्वं यस्मिन् सच्चित्सुखात्मके अक्षरे ब्रह्मणि ओतप्रोतमध्यस्तं वेदांताश्च यथाक्षरे विषये पर्य्यवस्यंति तात्पर्येण बोधहेतवो भवंति तदहमिति संबंधः । अक्षरे सर्वस्योतप्रोतोक्त्या ब्रह्मणः सर्वाधिष्ठानस्वरूपं तटस्थलक्षणमुक्तं सच्चित्सुखात्मक इत्यनेन सत्यज्ञानानंदस्वरूपात्मकं स्वरूपलक्षणमुक्तं तत्र वेदानां पर्यवसानोक्त्या उक्तरूपे ब्रह्मण्यक्षरे वेदांता एव प्रमाणमित्युक्तं नाहमत्र प्रभुर्यत इत्यत्र अत्र व्याख्याने प्रभुः समर्थ इत्यर्थः ॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तिप्रचयगमनयोः सिद्धये भगवत्पादीयभाष्यस्तुतिमुखेन भाष्यप्रतिपाद्यब्रह्मत्वानुसंधानलक्षणमंगलानुचरणं करोति अधिगतभिदेति –

टी. च.–व्याख्यातोयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीदिव्यचरणारविंदसंलग्नरजोभूतस्याच्युतकृष्णानंदतीर्थस्य कृतौ शास्त्रसिद्धांतलेशग्रंथव्याख्यायां श्रीकृष्णालंकाराख्यायां चतुर्थः समाप्तः ॥ संवत् १९११.

## १३९ शिवतत्त्वविवेकः सटीकः अप्पयदीक्षितः ।

टी. आ.–यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपंचम् ॥
तस्मै तमालरुचिभासुरकंधराय नारायणीसहचराय नमः शिवाय ॥ १ ॥
आकर्णकृष्टधनुराहितमोहनास्त्रमाराग्निरीक्ष्य मदनं कुपितस्य किंचित् ॥
शंभोः समाधिसमये विकसत्कृशानुज्वालाकलापजटिलं निटिलं स्मरामि ॥ २ ॥
सर्वविद्यालतोपघ्नपारिजातमहीरुहान् ॥ महागुरूंन्नमस्यामि सादरं सर्ववेधसः ॥ ३ ॥
निगमशिरसि निष्ठा निरवद्यवस्तुन्यभीप्सा भवचरणसरोजे भक्तिरव्याजसिद्धा ॥
त्रयमपि हृदि येषां त्रातृ [नात्र] संसारशोकात्सहजमुपगतं ते संतु संतः समृद्धाः ॥ ४ ॥
पद्यैः षष्ट्या पशुपतिमहं देवमस्ताविषं यैरंतःसारैरखिलजगतामंतरात्मानमेकम् ॥
भावं तेषां प्रविशदयितुं भग्नवाचाटवाचां वृत्तिं कुर्वे विषमविवृतिं वृद्धवर्त्मानुगानाम् ॥ ५ ॥
इह यद्यपि निष्कलं·······मंगलमिति हृदयेनादौ कृतं ध्यानं श्लोकेन निबध्नन् प्रारिप्सितस्तोत्रव्यवस्थापनीयमर्थं सूचयति ॥

आ.–श्रीकांतद्रुहिणोपमन्युतपनस्कंदेंद्रनंद्यादयः प्राचीना गुरवोपि यस्य करुणालेशाद्गता गौरवम् ॥
तं सर्वादिगुरुं मनोज्ञवपुषं मंदस्मितालंकृतं चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥ १ ॥
च.–इति विरचिता पद्यैः षष्ट्या पदांबुरुहद्वये तव शिखरिणीमालालीला किरातसमर्पिता ॥
अनुदिनमिमामित्थं संचित्य यः पठति प्रभोस्तव स लभतां साकं कुल्यैः कटाक्षकृपामृतम् ॥ ६० ॥
अथैवं स्तोत्ररचनायां मंदमतेर्भ्रांत्यादिकृतस्य तत्त्वार्थमा (ला) स्खलितस्यावर्जनीयत्वात् अपचारः प्राप्त इति भीतस्तदपनयनार्थमाह ।
क्वाहं मूढः क्व तव महिमा निर्जरैरप्यमेयः स्तोत्रव्याजादयमपि महान् केवलं मेपचारः ॥
किं नु स्वामिन् सदसदपि वा भक्तिपूर्वं कृतं यद्भक्तिग्राह्यस्त्वदखिलमपि क्षाम्यसीति भ्रमोयम् ॥ ६१ ॥
वेदाहमेतमिति यन्महिमावबोधं नारायणः स भगवानवदत्स्ववाचा ॥
स्वस्यातिगौरवकरं तमशेषमूलं कोन्यः परं शिवमिहार्हति नाम वोध्यम् ॥ ६२ ॥
इति श्रीशिखरिणीमालाव्याख्याने शिवतत्त्वविवेकाख्याने श्रीमत्सदाशिवस्य विश्वसेव्यन्यवस्थापनपरिच्छेदः समाप्तः।
टी. च.–हरविष्णुविरंचीनां गुरोश्चैव प्रसादतः ॥ शिवतत्त्वविवेकस्य पुस्तकं लिखितं मया ॥ १ ॥
सदाशिवपदांभोजसक्तधीरप्यदीक्षितः ॥ संग्रहीतुं समस्तानां सारमित्थं त्रयीगिराम् ॥ २ ॥
विभक्तार्थं विश्वेश्वरमहिमपारायणमिदं गभीरैर्मीमांसाद्वयनयनिबद्धैः सुघटितम् ॥
धिया किंचित्पूर्वापरगतिविचारावहितया विचिन्वंतः संतः सुचिरमनुगृह्णंतु विबुधाः ॥ ३ ॥

## १४० शिवाद्वैतनिर्णयः–अप्यदीक्षितः ।

आ.–श्रीकंठशिवाचार्याः सिद्धांतं निजगदुः शिवाद्वैतं तार्किक विशिष्टं अभिमतमविशिष्टं
च.–तस्य सर्वस्यापि यथावद्विशिष्टप्रतिपादकं श्रीकंठाचार्याणामेव भाष्यमुपादेयमिति सर्वं समंजसम् ॥
इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिरंगराजाध्वरिवरसूनोरप्यिदीक्षितस्य कृतिः शिवाद्वैतनिर्णयः समाप्तः ॥

## १४१ षट्पदी सटीका-टी, रामभद्रमिश्रः ।

टी. आ.–विषयाः स्रक्चंदनादयस्ते च ते रसाश्च
मू. आ.–अविनयमपनय विष्णो दमय मनः शमय विषयरसतृष्णाम् ॥ भूतदयां विस्तारय तारय संसारसागरतः ॥ १ ॥
मू. च.–नारायण करुणामय शरणं करवाणि तावकौ चरणौ ॥ इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥
प. टी.–इति श्रीसर्वविद्यापारदृश्वना काशीवासिना श्रीरामभद्रमिश्रेण विरचितं षट्पदीविवरणं समाप्तम् । संवत् १९०९

## १४२ सिद्धान्तचूडामणिः–नारायणभट्टः ।

आ.–रिंगमानमतिलोलमंगने गोपराजपितृसंनिधौ हरिम् ।..........
द्वैते प्रमाणं सर्वोपि वेदः सांगः स्मृतिस्तथा

च.—चैतन्यघनदेहप्राप्तिप्रमाणं सूचितामिति ॥

इति श्रीनारायणभट्टविरचिते वैष्णवसिद्धांतचूडामणौ भक्तिभक्तप्रकरणं कथितम् ॥ संवत् १७३१

## १३३ सिद्धान्तदर्पणः सटीकः-मू॰ विद्याभूषणः टी.-नन्दमिश्रः ।

टी. आ.—श्यामोपि यः श्रुतिसरो [धरो] बहुबोधरक्तः

मू. आ.—पिता पराशरो यस्य शुकदेवस्य यः पिता

मू. च.—सद्युक्तिभूषणव्रातैर्विद्याभूषणनिर्मिते ॥ सिद्धांतदर्पणे वांछा सतामस्तु मुदर्पणे ॥ ५ ॥

इति सिद्धांतदर्पणो ग्रंथः समाप्तः ॥

टी. च.—मुदर्पणे हर्षप्रापके ॥ ५ ॥

## १३४ विन्दुसंदीपनः-पुरुषोत्तमसरस्वती ।

आ.—श्रीरामं बहुधानम्य वक्ति श्रीपुरुषोत्तमः ॥ सिद्धांतबिंदौ तत्वार्थसाधकं किमपि स्फुटम् ॥— — — — — — —

श्रीधरं श्रीगुरुं नत्वा नौमि श्रीपादमादरात् । विद्यागुरुं गुरुमिव सुराणां मधुसूदनम् ॥

विघ्नविघातार्थं मंगलं कुर्वन्नारभ्यमाणग्रंथस्य प्रयोजनमाह । श्रीशंकराचार्य्येति । विश्वेश्वरनामानं गुरु प्रणम्ये-त्यन्वयः तं किंभूतं विश्वगुरुं विश्वेषां हितोपदेष्टारं श्रीशब्द उत्कर्षवाचकः श्रीशंकराचार्य्याणां भाष्यकृतामभिन-वावतारं यद्वा विश्वेश्वरं सगुणं ब्रह्म प्रणम्य श्रीरित्युपलक्षणं वाणीभवान्योः शं कल्याणं करोतीति व्युत्पत्या ब्रह्म विष्णुः शंभुश्च आचार्या उपदेष्टारो व्यासवैयासकिजैमिनिशंकराचार्य्यप्रभृतयः एते एव नवीना उत्कृष्टा आधुनिका श्चावातराः यस्य ते शेषं पूर्ववत् । प्रयोजनमाह वेदांतेति कर्मप्रवचनीयं । ननु कमपि प्रयत्नं कुर्वेत्विति प्रतिज्ञातं तस्य च विषयः स्वतंत्रो ग्रंथः कस्यचिद्व्याख्यानं वा तत्र द्वितीयमभिप्रेत्याह इहेति इह अद्वैतविचारे शारीरकविचारे ग खलु वाक्यालंकारे असंभावनाविपरीतभावनारहितानुत्तमाधिकारिणः अभिप्रेत्याह साक्षादिति

च.—बलभद्रो भट्टाचार्य्यः कश्चन सम्यग्भक्तशिष्यः परमवेदांतशास्त्रनिष्णातः ॥

तत [तातं] स्तौमि विधिं यदीयजलधावध्यस्तदेहं क्वचिन्मूर्तं ब्रह्म कदाचिदेव विबुधैर्लब्धं न वा लभ्यते ॥

तं वंदे मधुसूदनं यदुदिते बिंदौ चिदानंदितं ब्रह्म स्थायि सदा मुदैव विबुधैर्नूनं समालभ्यते ॥

बालार्थं विहितास्तथापि च गुरोः संदर्भगर्भा गिरो बुद्ध्यन्ते किल कैश्चिदेव सुचिराद्वृद्धैः समृद्धैरपि ॥

तस्मादत्र निगूढमर्थग्रहणं [गहनं] प्रश्लिष्टभावं चिरं भूयः श्रीपुरुषोत्तमप्रणयिनी वाणी समुज्जृंभते ॥

सद्व्याख्याननिरस्तदोषमचिरादुल्लंघ्यमानं बुधैर्यः सिद्धांतदुरंतसिंधुमकरोदाहत्य बिन्दूपमम् ॥

सम्यग्लब्धसदुर्शनाय [तदुत्सवाय] विलसद्वाणीप्रणीतश्रिये निर्व्याजं मधुसूदनया गुरवे तस्मै परस्मै नमः ॥

अलमन्यांबुधिश्रांतैर्गृह्यतां विबुधैरिह ॥ बिंदुसंदीपनाभ्यासे युक्तिमौक्तिकपङ्क्तयः [पङ्क्तयः] ॥

इति श्रीमधुसूदनसरस्वतीश्रीश्रीधरसरस्वतीपूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य्यश्रीपुरुषोत्तमसरस्वतीश्रीपादविरचि तो बिंदुसंदीपनाख्यो ग्रंथः समाप्तः ॥

## १४५ सिद्धान्तसुधाकरः-आनन्दगिरिः ।

आ.-वंदे महेश्वरं विष्णुं गौर्या लक्ष्म्या समन्वितम् ॥ जगज्जन्मादिकं यस्मात्सच्चिदानन्दलक्षणात् ॥ १ ॥
सिद्धिनाथं गणेशानं वागधीशां सरस्वतीम् ॥ गुरूंस्तत्त्वोपदेष्टारं प्रणमामि पुनः पुनः ॥ २ ॥
वाक्यार्थे च पदार्थे च वादिविप्रतिपत्तयः ॥ महावाक्येषु वार्यन्ते तदर्थं दृढबुद्धये ॥ ३ ॥
तत्र तावद्धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः

व.-उद्धर्तुं च जगद्यदेव कृपया द्वैपायनोभून्मुनिः— — — —
तत्सूत्रार्थविनिर्णयाय च तथा श्रीशङ्करोभूद्यतिः ॥ तं वंदे गुरुमूर्त्तिकं च सततं श्रीनीलकण्ठं हरिम् ॥ ४ ॥
या देवी सुरशत्रुनाशनिपुणा यासीत्पुरास्मात्सती या श्रीशङ्करविष्णुधातृमुखकैर्देवैः सदा वन्दिता ॥
या चिच्छक्तिरशेषलोकजननी सोमा सरस्वत्यभूत्तां वंदे श्रुतिरूपिणीं श्रुतिशिरोगम्यां च वाग्देवताम् ॥ ५ ॥
अहमेव हरोस्म्यहमेव हरिरहमेव जगत्त्रयकृच्च विधिः ॥ चिति सत्यसुखाद्वय एव सदा विनिवृत्तजगत्परमात्मवपुः ॥ ६ ॥
अर्पयामि महेशाय नीलकंठाय शंभवे ॥ सुधाकरमहं भक्त्या उँ तत्सद्ब्रह्मणे नमः ॥ १ ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभगवत्स्वरूपानन्दगिरिपादशिष्यश्रीसदानंदगिरिविरचिते सिद्धान्तसुधाकरे मोक्षनिरूपणं नाम चतुर्थः परिच्छेदः ॥ संवत् १९०९

## १४६ किरणावलीवर्धमानप्रकाशः-रुचिदत्तः ।

आ.-गण्डाभोगविलोलषट्पदघटासंचारणव्याजतः शुण्डादण्डविघट्टनेन परितो विघ्नं विनिघ्नन्निव ॥
निर्गच्छन्मदवारिपिच्छिलतरे मार्गे मुहुः प्रस्खलन्नारब्धे मम जायतामिह करालम्बाय लम्बोदरः ॥ १ ॥
जयदेवगुरोः सम्यगधीत्य मतमुत्तमम् ॥ द्रव्यप्रकाशविवृती रुचिदत्तः प्रवर्तते ॥ २ ॥

च.-शरीरसंयोगेनार्थान्तरवारणाय क्षेत्रज्ञान्येति शरीरान्येत्यर्थः । केचित्तु क्षेत्रं शरीरम् जानातीति ज्ञ आत्मा तदुभयान्यस्मिन् यो मूर्तसंयोग इति योज्यम् । तेन शरीरात्मसंयोगेनार्थान्तरवारणाय तदिति ॥
इति श्रीमहामहोपाध्यायश्रीरुचिदत्तविरचिते द्रव्यकिरणावलीवर्धमानप्रकाशः संवत् १६१६ ॥

## १४७ प्रशस्तपादभाष्यस्य-टीका पद्मनाभः-टीकानाम सेतुः ।

स्मृतिपथमुपनीय श्रीमतस्तातवक्त्रादुचितमुपचितार्थं वाक्यमत्यादरेण ॥
जयति विरचितोसौ पद्मनाभेन यत्नादुदयनकृतिपारप्राप्तये सेतुरुच्चैः ॥ १ ॥
उदयनकृतिचन्द्रिकया वृद्धो भाष्यांबुधिः परितः ॥ बालानामपि सुगमस्तत्र मया रच्यते सेतुः ॥ २ ॥
बलवशीकृतदुर्दमभूपतिर्निजभुजार्जितलोकसमुन्नतिः ॥
अगतिकार्थिजनस्य परा गतिर्जयति वीरवरः पृथिवीपतिः ॥ ३ ॥
शिष्यशिक्षायै मंगलं निबध्नाति । प्रणम्येति । मया पदार्थधर्मसंग्रहः प्रवक्ष्यते । कथंभूतो महोदयः किं कृत्वा ईश्वरं प्रणम्य............
प० १३६ भाष्यांभोनिधिसेतौ वीरवरीये यशोहितौ [यशोहेतौ] ॥ रचितो द्वितीयभागो विदुषा श्रीपद्मनाभेन ॥

श्रीपद्मनाभविदुषा पित्रुपदिष्टात्समाहृत्य ॥ विशदीकृत: प्रयत्नात्कृतिषु विनोदाय गूढोर्थ: ॥

च.—इतिशब्दश्शास्त्रार्थपूर्णतायामियतैव गुणादिनिरूपणस्याप्यर्थत: प्राप्तेरग्रे प्रपञ्चमात्रार्थत्वादिति दिक् ।

भाष्याम्भोनिधिसेतौ वीरवरीये यशोहितौ [यशोहेतौ] ॥ चरमो लक्षणभागो रचित: श्रीपद्मनाभेन ॥ १ ॥

अमुनानृणीकृता वयमन्यवदान्याद्विशिष्टेन ॥ प्रत्युपकारधियायं रचितो ग्रंथस्ततोस्माभि: ॥ २ ॥

## १४८ प्रशस्तपादभाष्यव्याख्या—जगदीश: ।

आ.—कणभक्षमुने: पक्षरक्षाविन्यस्तवासनाम् ॥ सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणा: ॥ १ ॥

ग्रन्थारम्भे विघ्नविघाताय कृतस्येश्वरप्रणामस्य शिष्याणां शिक्षार्थमादौ निबन्धपूर्वकं प्रवृत्त्यङ्गमभिधेयं दर्शयति प्रशस्तपादाचार्य:—प्रणम्येति ॥

च.—तस्याशुसंचारित्वे हेतुमाह— प्रयत्नेति । क्वचिदात्मन: प्रयत्नेन क्वचिददृष्टेन परिगृहीतत्वादाशुसंचारितेत्यर्थ: ॥ इति द्रव्यभाष्यटीका समाप्ता ॥

## १४९ प्रशस्तपादभाष्यापरपर्याय: पदार्थधर्मसंग्रह: ।

आ.—उँ अनादिनिधनं देवं जगत्कारणमीश्वरम् ॥ प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहम् ॥ १ ॥

ध्यानैकतानमनसो विगतप्रचारा: पश्यन्ति यं कमपि निर्मलमद्वितीयम् ॥

ज्ञानात्मने विघटिताखिलबन्धनाय तस्मै नमो भगवते पुरुषोत्तमाय ॥ २ ॥

ग्रन्थारम्भेभिमतां देवतां शास्त्रस्य प्रणेतारं गुरुं च श्लोकस्य पूर्वार्धेन नमस्यति—प्रणम्येति ॥

च.—तदयुक्तम् आत्माभावे कार्यकारणभावस्यानिश्चयात् कारणविज्ञानकाले कार्यज्ञानमनागतं तत्काले च कारणमतीतम्। नच ताभ्यामन्य: कश्चिदेको द्र — — — — — — — — —

## १५० न्यायवाचस्पत्यस्य व्याख्या ।

"वात्स्यायनकृतभाष्यस्य वार्तिकाख्या व्याख्या तस्या वाचस्पतिकृता टीका तस्याष्टीकेयम्"

आ.—उँ नम: [न्म:] सरस्वति पुन: पुनरेष नत्वा बद्धाञ्जलि: किमपि विज्ञपयाम्यवेहि ।

वाक्चेतसोर्मम तथा भव सावधाना वाचस्पतेर्वचसि न स्खलतो यथैते ॥ १ ॥

विश्वाराध्य इत्यत्र विश्वपदेन संसारचेतनवर्गो विवक्षित: तस्यैव तदाराधकत्वात्

## १५१ आत्मतत्त्वविवेकव्याख्या—गुणानन्द: ।

आ.—नमो दैत्यकुलाक्रान्तभुवो भारं जिहीर्षवे ॥ वृष्णिवंशावतीर्णाय चतुर्व्यूहाय विष्णवे ॥ १ ॥

आत्मतत्त्वविवेकस्य भावोद्भावकमादरात् ॥ विविच्यते प्रयत्नेन गुणानन्देन धीमता ॥ २ ॥

प्रारिप्सितविघ्नापनुत्तये ऽनुष्ठितमोंकारोच्चारणपूर्वकं भगवन्नमस्काररूपं मङ्गलं निबध्नाति—उँ नम इत्यादि । व्याख्यातमिदमनुमानदीधितिविवेकेऽस्माभि: ॥

## १५२ शब्दार्थमञ्जरी-भवानन्दः ।

आ.-नत्वा कृष्णपदद्वन्द्वं कारकाद्यर्थनिर्णयः ॥ श्रीभवानन्दसिद्धान्तवागीशेन वितन्यते ॥ १ ॥
तत्र क्रियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम् ॥

अ.-इति व्याख्यानं तु शाब्दिकाभिप्रायिकम् ॥ इति शब्दार्थमञ्जर्यां भवानन्दसिद्धान्ततर्कवागीशविरचितं षट्कारकविवेचनं समाप्तम् ॥

## १५३ नञ्वादविवेकः-रामकृष्णः ।

आ.-कृत्वा हरिहरचरणे शरणे श्रीरामकृष्णेन ॥ अथ नञ्विचारभावो दीधितिकर्तुः प्रकाश्यते कोपि ॥ १ ॥
नायं घटो नेह घट इत्यादिषु

अ.-नञोसामर्थ्यमित्यर्थ इति दिक् ॥
इति श्रीमहामहोपाध्यायभट्टाचार्यचक्रवर्तिश्रीरामकृष्णरचितो नञ्वादविवेकः समाप्तः ॥

## १५४ निपातार्थनिर्णयः-हरिकृष्णः ।

आ.-नीहारहारसदृशं विश्वेशं शर्मदायकम् ॥ नत्वा गुरोः पदाम्भोजं निपातार्थो वितन्यते ॥ १ ॥
निपातानां वाचकत्वमुपसर्गाणां द्योतकत्वमिति नैयायिकसिद्धान्तस्थितिः ॥

अ.-तस्मादिवादीनां वाचकत्वमेवेति कृतमतिशयविस्तरेण ॥ इति श्रीमत्पण्डितधुरंधरमणिरामात्मजतार्किकचक्रवर्तिचूडामणिकिरणशोभितचरणमहादेवपण्डितान्तेवासिकूर्माचलस्थपन्थोपनामकहरिकृष्णविरचितोपसर्गनिपातद्योतकतावाचकत्वविचारः समाप्तः ॥

## १५५ प्रतिबन्धताविचारः-नारायणः ।

आ.-श्रीगणेशाय नमः ॥ समाने विषये लौकिकप्रत्यक्षानुमि-

अ.-तादृशचाक्षुषविशिष्टचाक्षुषसामग्र्यभावस्य निवेश्यत्वान्नैतद्युक्तमित्यपरे इति संक्षेपः ॥ इति श्रीनारायणसार्वभौम विरचित सामग्रीप्रतिबन्धकताविचारः संपूर्णः ॥

## १५६ मुक्तिरहस्यम् ।

आ.-श्रीगणेशाय नमः ॥ अथ कस्तावदपवर्गः ।

अ.-लिङ्गशरीरं चैकादशेन्द्रियाणि पञ्च महाभूतानि सूक्ष्ममात्रया संभूयावस्थितानि जीवात्मनि दुःखावच्छेदकानि इति त्रिदण्डिनः इति मुक्तिरहस्यम् ॥

## १५७ रत्नकोशविचारः-हरिरामः ।

आ.—श्रीगणेशाय नमः ॥ परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तः । रत्नकोशकारस्तु सत्प्रतिपक्षसंवलनदशायां संशयात्मकानुमितिमङ्गीकरोति ।

च.— न कथंचिदप्यनुमितेः संशयापत्तिरिति कृतं पल्लवितेन ॥ इति श्रीहरिरामतर्कालंकारविरचितो रत्नकोशविचारः ॥

## १५८ विशेषलक्षणम्-व्येङ्कटसूरिः ।

आ.—श्रीगणेशाय नमः ॥ नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ताः एतल्लक्षणं तु

च.—प्रतियोगितावच्छेदकसंबन्धान्तरनिवेशेन च न क्षतिरित्यलं विस्तरेण ।

मारवेल्लयां चयाम्भोधेर्मे [ह्यन्वयाम्भोधेर्भू] त्या व्येंकटसूरिणा ॥ प्रकाशितं विशेषाणां लक्षणं विदुषां मुदे ॥ १ ॥

## १५९ वादसंचयः ।

तत्र.

१ आत्मत्वजातिविचारः—महादेवः

२ नञ्वादटिप्पणी — रघुदेवः

३ निर्विकल्पकवादः..................

४ त्वङ्मनोयोगहेतुता..................

५ विधिवादः..................

६ विशिष्टवैशिष्ट्यबोधः — रघुदेवः

७ विषयतावादः — गदाधरः

तत्र.

८ पक्षताविचारः ..................

९ प्रतियोगिकारणता ..................

१० आख्यातवादटिप्पणी — रघुदेवः

११ नवीनमतविचारः — हरिरामः

१२ बाधबुद्धिप्रतिबंधकता — हरिरामः

१३ सामग्रीप्रतिबंधकता — हरिरामः

## १६० वादसुधाकरः-कृष्णाचार्यः ।

आ.—शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ इति वात्सल्यवान्बिभ्रत्तद्रूपं पातु माधवः ॥ १ ॥

कोलाहलोत्र कुधियां न प्रत्यूहो विवेकिनाम् ॥ कलिदोषो रमानाथदीप्समीष्टे न वीक्षितम् [तुम्] ॥ २ ॥

आख्यातस्य कृतौ शक्तिर्न तु कर्तरि—

च.—अन्ये त्वाहुः बोधकतारूपा शक्तिरपभ्रंशेष्वपि दुर्वारैवेति ॥

इति श्रीदेवीदत्तात्मजरामसेवकतनूद्भवकृष्णाचार्यकृतो वादसुधाकरः समाप्तः ॥

# १६१ कपिलसांख्यसूत्रवृत्तिः-नागोजीभट्टः ।

प्रा.—नत्वा सांबशिवं सांख्यसूत्रवृत्तिं लिखाम्यहम् ॥ यथामति विचार्यार्यैरात्मानात्मविवेकिनीम् ॥ १ ॥
यद्यपि पद्मपुराणे पार्वतीश्वरसंवादे—

शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् ॥ येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥ २ ॥
प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम् ॥ मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् ॥ ३ ॥
कणादेन तु संप्रोक्तं शास्त्रं वैशेषिकं महत् ॥ गौतमेन तया न्यायं सांख्यं तु कपिलेन वै ॥ ४ ॥
द्विजन्म (ना) जैमिनिना पूर्वं वेदप्रकाशकम् ॥ निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम् ॥ ५ ॥
धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितम् ॥ दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा ॥ ६ ॥
वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् ॥ मयैव कथितं देवि जगतां नाशकारणात् ॥ ७ ॥

इत्युक्तम् । तथापि पापिनां ज्ञानप्रतिबंधार्थमास्तिकदर्शनेष्वपि अंशतः श्रुतिविरुद्धार्थव्यवस्थापनसत्त्वेन तेष्वंशेष्वप्रामाण्यसत्त्वेन तदभिप्रायकत्वेन निर्दोष [दोषा] पत्तिर्बोध्या । यथा न्यायवैशेषिकाभ्यां सुखदुःखादिहेतुभिर्देहादिमात्रविवेकेनात्मानुमापितः प्रथममेव परमसूक्ष्मे प्रवेशासंभवात् तज्जन्यज्ञानमपि देहाद्यात्मतानिरासेन व्यावहारिकं तत्त्वज्ञानमेव देहादिवैराग्यद्वारा परंपरया मोक्षसाधनं च आत्मनि सुखादिमत्त्वमात्मानेकत्वं च श्रुतिशिरोविरुद्धं तत्रोक्तं तत इदमंतरंगं निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः दुःखाज्ञानमया धर्माः प्रकृतेस्ते तु नात्मन इत्याद्युक्तेः । अत्र शास्त्रे चेश्वरप्रतिषेधांशे निंद्यत्वं विवेकांशे तु प्रमाण्यमनिंद्यत्वं व्यावहारिकजीवेतरविवेकज्ञानस्याप्यल्पपरंपरया मोक्षसाधनत्वात् नानापुरुषकथनमप्यत्र व्यावहारिकपुरुषाभिप्रायेणैव । तत्त्वं तु ब्रह्ममीमांसोक्तमेव । सांख्यत्वं चास्य । संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ॥ तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्तिताः ॥

इत्यादिना भारते उक्तं । संख्यां सम्यग्विवेकेनात्मकथनमित्यर्थः । तदिदं शास्त्रं चतुर्व्यूहं । हेयं १ हानं २ हेयहेतुः ३ हानोपायश्चेति ४ मुमुक्षुजिज्ञासितत्वात् । तत्र त्रिविधं दुःखं हेयं । तदत्यंतनिवृत्तिर्हानं । निवृत्तावात्यंतिकत्वं च पुनर्दुःखजातानामनुत्पत्तिवैशिष्ट्यं । प्रकृतिपुरुषयोरविवेको हेयहेतुः । विवेकस्तु हानोपायः । दुःखशब्देनात्र सुखमपि तत्र फलत्वेन हानं तत्प्रतियोगिविधया हेयं च प्रतिपादयन् कपिलमुनिः शिष्यावधानाय प्रतिजानीते ।
अथ त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थः ॥ १ ॥

अथशब्दः स्वरूपेण मंगलं । अर्थश्चास्याधिकारः । स चारंभ एव..........

पंचशिखाचार्यैरुक्तं । सत्त्वं नाम प्रसादलाघवाभिष्वंगप्रीतितितिक्षासंतोषादिरूपानंतभेदं समासतः सुखात्मकं । रजःशोकादिनानाभेदं समासतो दुःखात्मकं । तमो निद्रादिनानाभेदं समासतो मोहात्मकमिति..........

वामदेवादिमुक्तौ नाद्वैतं ॥ १५६ ॥ वामदेवादेर्मुक्तत्वेपि इदानींतनैः स्वस्मिन्बंधानुभवात् अतो नाखंडाद्वैतमित्यर्थः ।

ए.—अन्याख्यशक्त्यावेशादग्निरिति रूपकं तस्यैवेति परे ॥

इति लघुसांख्यवृत्तिः शिवभट्टसुतसतीगर्भजनागोजीभट्टपर्यालोचिता भिक्षुभाष्यसारसंग्रहरूपा समाप्तिमगमत् ॥
इति षष्ठोध्यायः ॥

## १६२ पातञ्जलसूत्रवृत्तिः-भाष्यच्छायाख्या-नागोजीभट्टः ।

आ.–नत्वा पतंजलिं देवं योगे वृत्तिं लिखाम्यहम् ॥ छायया व्यासभाष्यस्य तद्गूढार्थप्रकाशिकाम् ॥ १ ॥
ननु एतेन योगः प्रत्युक्त इति व्याससूत्रेणास्य शास्त्रस्य प्रत्याख्यानात्किमेतच्छास्त्रविचारेणेति चेन्न सांख्यज्ञाने योगमार्गेण वा निश्रेयसमधिगम्यत इति तद्भाष्यमुपादायोपनिषद्बोध्यस्य तत्वज्ञानस्य योगापेक्षास्त्येव

च.–पातंजलाब्धौ रचितः सेतुर्विज्ञानभिक्षुणा ॥ महापंगुर्मूढतमो येन तं तीर्णवानहम् ॥ १ ॥
इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतायां पातंजलसूत्रवृत्तौ भाष्यच्छायाख्यायां चतु कैवल्यपादः ॥ श्रीरस्तु ॥
पातंजलेषु सूत्रेषु वृत्तिर्या लिखिता मया ॥ प्रीयतां तु तया सांबः शिवो मे स पतंजलिः ॥ १ ॥
संवत् १८५७ प्रजापतिनामाब्देआश्विनकृष्णदशम्यां श्रीकाश्यां दुर्गाघट्टे त्र्यम्बोपनामकखंडभट्टसूरिसूनुना गोविंदे लिखितमिदं पठितं च ॥
विश्वेशं माधवं ढुंढिं दंडपाणिं च भैरवम् ॥ वंदे काशीं गुहां गंगां भवानीं मणिकर्णिकाम् ॥ १ ॥

## १६३ पातञ्जलसूत्रविवरणम्-मिश्रगोपालः ।

चंडीश्वरं गुरुमनंतगुणं प्रणम्य स्मृत्वा च तातमनघं हृदि ढं [ ढुं ] ढिराजम् ॥
वंद्यां प्रणम्य जननीं कमलां च पुण्यां सूत्रं पतंजलिकृतं विवृणोमि युक्त्या ॥ १ ॥
यो योगिभिः सकलवृत्तिनिरोधपूर्वमाहूत एव नियतं प्रणवेन नाम्ना ॥
व्यक्तं प्रकाशयति योगमयोगहेतुं श्रेयः करोतु सततं सदयं स देवः ॥ २ ॥
परमकारुणिकः पतंजलिमुनिर्योगशास्त्रमारिप्समाणः शिष्याणामवधानाय निरूपणीयं प्रतिजानीते ॥ अथ योगा शासनं । अथ शब्दोऽधिकारार्थः अन्यार्थनीयमानोदककुंभवन्मंगलार्थोपि बोध्यः । अथातो धर्मजिज्ञासेत्या वन्नानंतर्यार्थः ॥

च.–भाष्यवृत्तिर्न यस्यास्ति तस्य वृत्तिरियं स्थिरा ॥ सूत्रवृत्तिर्यथा पंचतया वृत्तिरुपेक्षिता ॥
सूत्रेणैव तु मालेयं कृत्वा कृष्णपदे धृता ॥ तत्कुर्वंतु स्वयं संतः सौमनस्येन गूहनम् ॥
इति महामहोपाध्यायश्रीमन्मिश्रगोपालविरचिते पातंजलसूत्रविवरणे कैवल्यपादः संपूर्णः ॥

## १६४ कल्किपुराणम् ।

आ.–सेन्द्रा देवगणा मुनीश्वरजना लोकाः सपालाः सदा स्वं स्वं कर्मसुसिद्धये प्रतिदिनं भक्त्या भजंत्युत्तमाः ॥
तं विघ्नेशमनंतमच्युतमजं सर्वज्ञसेवाश्रयं वंदे वैदिकतांत्रिकादिविविधैः शास्त्रैः पुरो वंदितम् ॥ १ ॥

च.–वेदे रामायणे चैव पुराणे भारते तथा ॥ आदौ चांते च मध्ये च हरिः सर्वत्र गीयते ॥
सजलजलददेहो वीतवेपादिवाहः करधृतकरमूलः सर्वलोकैकपालः ॥

कलिकुलविनिहंता सत्वधर्मप्रणेता कलयति कुशलं वः कल्किनामा मुरारिः ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये पंचत्रिंशोऽध्यायः ॥

## १६५ कृष्णसंहिता ।

आ.—एकदा नारदो योगी परानुग्रहवाञ्छया ॥ पर्य्यटन्विविधाल्लोकान्मिथिलानगरं ययौ ॥
तं दृष्ट्वा सहसोत्थाय बहुलाश्वो नृपेश्वरः ॥ पूजयामास पाद्यार्घ्यैरुपचारैर्विधानतः ॥
ब.—कृष्णमंत्रोपासकाय द्विजाय सुकुटुंबिने ॥ ससागरा मही तेन दत्ता नैवात्र संशयः ॥
बहुनोक्तेन किमिह तेन दत्तः स्वयं हरिः । सू० उ० इत्येतत्कृष्णदेवस्य संहितायाः सुपुण्यदम् ॥
माहात्म्यं वर्णितं विप्राः सर्वपापप्रणाशनम् ॥
इति श्रीकृष्णसंहितायां नारदबहुलाश्वसंवादे कृष्णसंहितायां माहात्म्यकथनं नाम — —

## १६६ पाराशरं पुराणम् ।

आ.—सौरमंडलमध्यस्थं सर्वसंसारभेषजम् ॥ नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥
मेरुशृंगे समासीनं संसारोदधितारकम् ॥ शुकं प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ॥
ब.—प्रधानपुरुषेशाय जगत्सर्गादिहेतवे ॥ या विभाति सदा साक्षिस्वरूपेण स्वभावतः ॥
तां नमाम्यादरेणैव शिवामानंददायिनीम् ॥ अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्म्मितम् ॥
इत्युपपुराणे पाराशरेऽष्टादशोऽध्यायः ॥

## १६७ वृहद्ब्रह्मसंहिता ।

आ.—ज्ञानानंदस्वरूपाय कल्याणगुणराशये ॥ प्रपन्नपारिजाताय सिंधुजापतये नमः ॥
एकदा मंदरद्रोण्यामासीनः कमलासनः ॥ द्वयमावर्त्तयन्मौनी वैष्णवं रूपमुद्वहन् ॥
ब.—योतित्यभीभिष्टो[योऽभीष्टो]जगतामभिष्टगतिदो गीतोऽपि नीतो भवत्यग्रे व्यग्रकरःकरींद्रकरुणारावे वि[रावैर्वि]राजं विना ।
आयात्युन्मदभीमराजमयने यः सापराधे जने नत्यैवाभिमुखः प्रयच्छतु रतिं लक्ष्मीधरो वल्लभः ॥
इति श्रीबृहद्ब्रह्मसंहितायां चतुर्थपादे रुद्रगीता समाप्ता ॥ समाप्तश्च चतुर्थः पादः ॥

## १६८ भागवतदशमस्कन्धटीका-शुकपक्षी सुदर्शनः ।

आ.—अमरंजयैर्देवानपि जेतुं समर्थैः वत्सपदं कृत्वा गोष्पदतुल्यं कृत्वा यत्प्लवा इति बहुव्रीहिः यच्छब्दो भगवद्विषयः पुरुषकालरूपैः क्षेत्रज्ञकालाख्यरूपैर्विशिष्टस्याक्षेत्रज्ञानां कालावयवानां बाहुल्याद्बहुवचनम् अंतः पुरुषरूपेणामृतं प्रयच्छन् शरीरविनाशहेतुरित्यर्थः मायामनुष्यस्य आश्चर्य्यभूतमनुष्यस्य संकल्परूपज्ञानेन मनुष्यस्य वा प्रच्छन्नमनुष्यस्य वा देहोऽवताररूप इति त्यक्तोदमंबुपानरहितम् पौरुषीं परमपुरुषीं परमपुरुषसंबंधिनीं गां गिरं धराभरं भूभारं

भराज्वर इतिपाठे क्लेशः पुंसः पुरुषस्यावतारात्पूर्वमेवेत्यर्थः कला अंशः अनंतः शेषः अग्रतः काले ॥
इति श्रीशुकपक्षे दशमस्कंधे प्रथमोऽध्यायः ॥ ॥

च.—ग्रंथांतरवैलक्षण्यमाह कालेति इतरत्र राजसादिपुराणेषु संयमात्मशक्ति संयमहेतुभूतात्मशक्ति नवशक्तय इत्युक्ताः उपलब्धिमात्रधाम्नि जातस्य प्रसंगरहितज्ञानात्मकहेतुस्वरूपाय स्वमुखमात्मानुसंधानमुखं तेनानुकूलं चेताः तेन व्युदस्तान्यभावः भगवद्व्यतिरिक्तसंगः अपि समुच्चये यद्वा सुलभसमाधितया साक्षात्कृतस्वरूपोऽपि भगवल्लीलाभिराकृष्टचित्त इत्यर्थः तत्त्वदीपं तत्त्वप्रकाशं द्वादशे द्वादशोऽध्यायः ॥ इति हरितकुलतिलकवाग्विजयिसूनुना श्रीरंगराजदिव्याज्ञालब्धवेदव्यासापरनामधेये श्रीसुदर्शनसूरिणाभिहिते श्रीमद्भागवतमहापुराणव्याख्याने श्रीशुकपक्षे द्वादशस्कंधः संपूर्णः ॥

## १६९ भागवतदशमस्कन्धस्य टीका वैष्णवतोषणी ।

आ.—श्रीमन्मदनगोपालं वृन्दावनपुरंदरम् ॥ श्रीगोविंदं प्रपद्येऽहं दीनानुग्रहकातरम् ॥
वंदे श्रीकृष्णचैतन्यं भगवन्तं कृपार्णवम् ॥ प्रेमभक्तिवितानार्थं गौडेष्ववततार यः ॥
श्रीमाधवपुरीं वंदे यतींद्रं शिष्यसंयुतम् ॥ लोकेष्वंकुरितो येन कृष्णभक्तिसुरांघ्रिपः ॥
श्रीभागवतनिष्पर्या टीकादृष्टिरदायि यैः ॥ श्रीधरस्वामिपादांस्तान्वंदे भक्त्येकरक्षकान् ॥
भट्टाचार्यं सार्वभौमं विद्यावाचस्पतीन् गुरून् ॥ वंदे विद्याभूषणं च गौडदेशविभूषणम् ॥
वंदे श्रीपरमानंदं भट्टाचार्यं रसप्रियम् ॥ रामभद्रं तथा (का) शीविलासं चोपदेशकम् ॥
नमामि श्रीमदद्वैताचार्यं श्रीवासपंडितम् ॥ नित्यानंदावधूतं च श्रीमच्चैतन्यवल्लभम् ॥
दामोदरस्वरूपादीन्वन्दे चैतन्यपार्षदान् ॥ येषां पादरजःस्पर्शादधमोऽप्युत्तमो भवेत् ॥
वृन्दावनप्रियान्वंदे श्रीगोविंदपदाश्रितान् ॥ श्रीमत्काशीश्वरं लोकनाथं श्रीकृष्णदासकम् ॥
स्वामिपादैर्न यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित् ॥ टिप्पणी दशमे तत्र सेयं वैष्णवतोषणी ॥
वैष्णवापरितोषं ( षः ) स्यात् यत्र यत्र ततस्ततः ॥ तत्र यद्यपि सामान्याकारेणाश्रयलक्षणम् ॥
तथापि कृष्ण एव स्यात्तस्य पर्य्यवसायिता ॥ ब्रह्मणो हि प्रतिष्ठाहमिति तद्गीः सतां मता ॥
आत्मारामाश्च मुनय इत्यादिसचिवा च सा ॥ परिभाषा च तत्र स्यादेते चांशेतिसूतगीः ॥
तदेतद्विवृतं भावि ब्रह्मस्तवमनु स्वयम् । अथात्र परिभाषेयं ज्ञातव्या यद्यपेक्षते ॥
मूलं सटीका [ क ] मंकाद्यैः परिच्छेद्यं म [ स ] हानया ॥ व्यंका वाक्यांतरा वात्र देयाः पद्यांततो ननु ॥
बहुपद्यैकवाक्यत्वे गर्भांका बिंदुमस्तकाः ॥ यस्मिन्वाक्ये नास्ति टीका तदप्यंकेन योजयेत् ॥
टीका तदंकशून्या वा तदंकांतयुतापि वा ॥ तद्युतत्वं तु पूर्वांकसन्निधौ पृथगाचरेत् ॥
विधिरेवं गौडकारयोर्गुर्जरादौ यथामति ॥ एके पद्यान्यवाक्यत्वे संख्याशब्दास्तु कातकाः ॥
यथार्थकं युग्मकं च त्रिकमित्याद्युदाहृतिरिति ॥

च.—इति— — — —

शाके षट्रसतिमनौ पूर्णेयं टिप्पणी शुभा ॥ संक्षिप्ता युगशून्याग्रपंचैकगणिते तथा ॥

लेख्यं वैष्णवसिद्धांतदाक्षिण्येनैव किंचन ॥ श्रीमद्भागवतस्तुत्यभक्त्येकपुरुषार्थिनाम् ॥
नाभेदवाद इत्येष प्रालेखि क्षम्यतामिदम् ॥ पूर्वपूर्वात्र च व्याख्या पूर्वपक्षतया मिता ॥
सर्वेति या तु विज्ञेया सुसिद्धान्ततया मता ॥ येषां प्रोत्साहनेनास्मि प्रवृत्तोऽत्यंतसाहसे ॥
ते दीनानुग्रहव्यग्राः शरणं मम वैष्णवाः ॥

राधाप्रियप्रेमविशेषपुष्टो गोपालभट्टो रघुनाथदासः ॥ स्यातामुभौ यत्र सकलसहायौ को नाम सोर्थो न भवेत्स सिद्धः ॥
श्रीमच्चैतन्यरूपस्य प्रीत्यै गुणवतोखिलम् ॥ भूयादिदं यदादेशवलेनैव विलिख्यते ॥
स्वयं विलिखितं किंचित्किंचिद्योग्यैर्विलेखितम् ॥ छिद्रं यदस्ति तच्चात्र शोध्यं वैष्णवपंडितैः ॥
श्रीचैतन्यकृपाव्यक्तश्रीकृष्णप्रेमलिप्सुभिः ॥ समग्रं ज्ञापितुं शक्या सेयं वैष्णवतोषणी ॥
श्रीमद्भागवतं यद्धि स्वादु स्वादु पदे पदे ॥ तस्य प्रतिपदव्याख्या कार्य्या तत्प्रातिपत्तये ॥
आद्यः पाठोऽत्र गौडीयो द्वितीयोलेखि काशिकः ॥ नानादेशीयमूलाश्रीटीकानामनुवादतः ॥
पुरा महापुराणस्य दश प्रोक्तानि यानि हि ॥ लक्षणान्यखिलस्कंधे तानि संति तरोरिव ॥
तत्र प्राधान्यतः स्कंधे दशमेऽत्र निरूप्यते ॥ आश्रयो भगवान्कृष्णः स्वपूर्णत्वप्रकाशकः ॥

## १७० भागवतटीका-पदरत्नावली-विजयध्वजः ।

-यतो जन्माद्यस्य श्रुतिनयनमानैकविषयः स्वतंत्रस्तंत्रज्ञो गुरुरपि गुरोर्यश्च जगताम् ॥
विमूढा यत्तत्त्वं प्रकटमिह वेत्तुं सुमनसो मुकुंदं ध्यायामो निहतकुहकं तं स्वमहसा ॥ १ ॥
त्रिसर्गो यत्रायं लसति चिदचिद्विष्णुविषयो नलीं मोनानेयं [न लीना नानेयं] विकृतिरिव तेजोजलमृदाम् ॥
विशुद्धं चैतन्यं प्रकृतिविलयं यच्च विततं परं ब्रह्मात्मानं स्मर हृदय सत्यं गुरुतमम् ॥ २ ॥
यदीयकृतिरंजसा सुमनसां सुमानं सतां सती सकलसत्रता सकलवेदवाणीनिधिः ॥
स चिरसुरपयोनिधिः सरसिजेक्षणः श्रीपतिः पराशरशरीरजः शरणमस्तु मे संततम् ॥ ३ ॥
मम वचसि मंगलदेवता प्रणमति सन्निधात्त्वियम् ॥ विलसदुरसव [विलसदुरुरसा] मुरद्विषः कमलवन इवान्वहम् ॥ ४ ॥
जयति जनकः शंभोरंभोजनामसुताग्रणीः— — — — परमविषये सम्यक्प्रेक्षावतां न मृषा क्वचित् ॥ ५ ॥
— — — — — — — — — — — — — मह्यं महेंद्रयतीश्वरः ॥ ६ ॥
क्व शब्दः क्वाभ्यासं श्रुतिरपि गुरोः क्वाप्रसरणे (:) समीक्षा पौराणी क्व खलु विबुधा मत्सरधियः ॥
तथापि व्यामोहाद्गुरुगुरुकटाक्षैकशरणो मनाक्व्याकुर्वे भागवत (सु) पुराणं प्रगहनम् ॥
आचार्यैरपरैरपि प्रविवृता [ते] मा गाज्जनः स्वेदतां खद्योतस्तपनप्रकाशितपदे किं तत्र [तन्न] कुर्यादिति ॥
तन्मार्गावगमेन वाक्तनुमनःशुद्धिक्रियायै मनः श्रीमद्भागवतं पुराणमतुलं व्याकर्तुकामयते [कामायते] ॥
तदस्यां पद्यायां झटिति तुटपात्रे मयि कृपां महान्तः कुर्वन्तु — — — — — —
निरस्ता — — — — — — अहो प्रह्वग्रीवाः निपुलक (रु) णाः सर्वसुहृदः ॥
आनंदतीर्थविजयतीर्थौ — — — — — तयोः कृतिं स्फुटमुपजीव्य प्रवच्मि भागवतं पुराणम् ॥

## १७१ भागवतदशमस्कन्धटीका-सुबोधिनी-वल्लभाचार्यः.
## पूर्वार्द्धस्य

आ.—नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् ॥ लीलासहस्रलीलाभिः सेव्यमानं कलानिधिम् ॥ १ ॥

च.—दशमस्कंधविवृतिः पूर्वार्द्धे सुनिरूपिता ॥ कृष्णपादांबुजे न्यस्ता श्रीपुष्पांजलिरुज्वला ॥ १ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कंधविवरणे षट्चत्वारिंशाध्याय विवरणं समाप्तम् संवत् १८६९

## उत्तरार्द्धस्य सैव स एव

आ.—उत्तरार्धे हरेर्लीला स्वतः सर्वात्मना कृता ॥ यदर्थमवतीर्णोऽसौ सा निरूप्या विभागशः ॥ १ ॥

च.—तदीयानां तदर्थार्थे तदेकशरणार्थिना ॥ व्यासवल्लभशिष्येण व्यासरागेण लेखिता ॥

श्रीकृष्णो मम हृदयं प्रविश्य चक्रे — — — देहमगुणानुवर्णितायाम् । — — — — — — स्कंधेऽस्मिन् दश इति प्रसन्न कृष्णः ॥ इति — — — — — —

## १७२ वेणुगीतसुबोधिन्या योजना-बालकृष्णः ।

आ.—अष्टादशेध्याये कारिकासु तद्गुणेषु प्रसक्तता । हीति नन्वत्राष्टादशेऽध्याये गोपीनामासक्तिरित्युक्तम् तत्कथं संभवत्यासक्ते स्फुटमकथनादित्याशंक्य गुणासक्तिरूपकार्येण भगवदासक्तिरनुमीयते इत्याहुः तद्गुणेषु प्रसक्त्याहीति । हि यत तस्मिन् भगवति ये आसक्तास्त एव गुणासक्ता भवंत्यतः गुणासक्त्या भगवदासक्तिर्ज्ञाप्यते इति भावः । नन्वासक्ते रुद्बोधस्तु कोकिलकूजनादिना भवति तत्स्वयं भगवता किमर्थं कृत इत्याशंक्य नात्रोद्बोधमात्रं भगवता कृतमपि तु सर्वा सामग्री केवलं प्रभुणा कृतेत्यासक्त्युद्बोधोपि हरिणा कृत इत्याहुः ॥

च.—पानयिसूयवसकंदरकंदमूलैरित्यस्य व्याख्याने तत्राप्यवांतरभेदा बहव इति बहुवचनमिति कंदमूलेष्ववांतरभेदान् बाहुल्यात् तेषां सर्वेषामेव भागवते निवेदनात्तेषां संग्रहार्थं कंदमूलपदयोः कंदानि मूलानि चेति बहुवचनेन विग्रह कार्य इति भावः तया च नात्र समस्तपदगतकंदमूलैरिति बहुवचनाभिप्राय उक्तः किंतु लौकिकविग्रहे कंदमूल पदयोर्बहुवचनांतत्वेन विवक्षितार्थसिद्धिरिति बोधितम् । तया च नानाप्रकारककंदमूलानां समर्पणं हरिदासवर्ये क्रियत इति सिद्धम् । इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यवरश्रीविठ्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामदीक्षि बालकृष्णेन विरचिताष्टादशाध्यायसुबोधिनीयोजना संपूर्णा ॥

## १७३ भागवतगीतावली ।

आ.—प्रथमं नंदोत्सवादि भैरवरागेण

पुत्रमुदारमसूत यशोदा समजनि वल्लभततिरनुमोदा ॥ ध्रु० कोऽप्युपनयति विविधमुपहारं नृत्यति कोपि जनो वद[बहु]वार-कोऽपि मधुरमुपगायति गीतं विकिरति कोऽपि सदधि नवनीतम् ॥

-धातुरचितचित्रवीथिरंभसि परिलीना मालाप्यतिशिथिलवृत्तिरजनि भृंगहीना ॥
श्रीसंनातनसुमणिरत्नमंशुभिरपि चंडं भेजे प्रतिबिंबभावदंभी[भा]तव गंडम् ॥ इति गीतावली सं०

## १७४ क्रोडपत्रराजः-केशवरामः ।

आ.-श्रीदुर्गाशंकरं धीरं श्रीरामस्नेहिनं तथा ॥ मायेश्वरावहं वंदे हेतू विश्वस्य भावनौ ॥
अष्टादशपुराणस्थं श्रीमद्भागवतं तथा ॥ देवीभागवतं चेति विचिकित्सा मनीषिणाम् ॥
आस्तिकः केशवः कोऽपि तत्राह सुधियां मुदे ॥ राद्धान्तं विदुषां बुद्ध्वा जगत्कारणनोदितः ॥
असह्य पित्रोर्जगतोऽन्यतरस्यापि दीनताम् ॥ सोढुमर्हन्तु तत्संतः साहसं मेऽल्पदृङ्मतेः ॥
अं.-केशवप्रेरितेनाशु केशवेन कुयोगिना ॥ वारणस्याऽसीति [वाराणस्यामसितीर्थे] गंगापुष्करसंनिधौ ।
मननायात्मनः पुण्यः सेव्यो भागवतैः सदा इति ॥

## १७५ भागवतविचारः धरणीधरः ।

आ.-यैर्न श्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः ॥ प्राप्तं न तत्त्वं गुरुवक्त्रतो यैस्तेषां वृथा जन्म गतं नराणाम् ॥
अं.-कुतस्त्वादृशवचनवलेन सात्त्विकोपासनं बाध्येत किंच सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेत्यनेन तदितरसर्वधर्माणां त्याज्यत्वोपदेशात् येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः॥ तेपि मामेव कौंतेय परं त्वविधिपूर्वकमित्यनेन तादितरविधीनामप्रसक्तत्वावगमात् परं त्वविधिपूर्वकमित्युक्तेरप्राशस्त्यमवगम्यमानं दुर्निवारमिति संक्षेपः ॥ इति भागवतविचारो धरणीधरपंथकूर्माचलीयकृतः ॥

## १७६ भागवतसिद्धान्तविजयवादः-रामकृष्णभट्टः ।

आ.-श्रीमद्गिरिधराशीश[धीश]पादांबुजरजःकणाः ॥ प्रसीदंतु सदा भक्तस्वांतानंतसुखाब्धयः ॥ १ ॥
अं.-श्रीमद्भागवतोत्कर्षो यथार्थोयं निरूपितः ॥ तेन प्रसीदतां श्रीमत्कृष्णः सत्यार्थरक्षकः ॥ इति०

## १७७ भार्गवीयं पुराणम् ।

आ.-यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् । विघ्नान्निघ्नंति भजतां विष्वक्सेनं तमाश्रये ॥
श्रीशौनकादयः । सर्वधर्मार्थतत्त्वज्ञ सर्वशास्त्रविशारद ॥ तत्त्वार्थविदुषां श्रेष्ठ सूत द्वैपायनप्रिय ॥
अं.-इत्येतदाख्यानमनुत्तमं शुभं योगीश्वराणां महतां मनोहरम्॥भक्त्या नरो यः शृणुयात्पठेद्वा सौभाग्यवान्गच्छति तत्परं पदम्॥
इति श्रीमद्भार्गवे उपपुराणे उत्तरखंडे नरनारायणसंवादे महायोगिमाहात्म्ये चत्वारिंशोऽध्यायः ।

## १७८ वाशिष्ठं लैंगपुराणम् ।

आ.-श्रीमत्कैलासमागम्य वशिष्ठो वेदविन्मुनिः ॥ तपश्चचार सत्कर्मनिरतो नियतेंद्रियः ॥
दिव्यं वर्षसहस्रं तु वायुभक्षोऽग्निमध्यगः ॥ श्रीमत्पंचाक्षरं साक्षाच्छतरुद्रि[द्रीय]मध्यगम् ॥

च.—यत्प्रसादेन विज्ञानं यथावज्जायते नृणाम् ॥ तं वंदे षण्मुखं देवं ज्ञानशक्तिधरं परम् ॥
यस्य प्रसादलेशस्य लवलाभबलेन तु ॥ सर्वसिद्धिप्रयत्नेन तं नमामि विनायकम् ॥
इति श्रीउपपुराणे वाशिष्ठलैंगे द्वादशोऽध्यायः ।

## १७९ विष्णुपुराणसारसंग्रहः सटीकः-टी० श्रीधरः ।

आ.—पराशरं मुनिवरं कृतपूर्वाह्णिकक्रियम् । मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥
त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो ॥ धर्म्मशास्त्राणि सर्वाणि वेदागांनि यथाक्रमम् ॥
टी.—श्रीबिंदुमाधवं वंदे परमानंदविग्रहम् ॥ वाचं विश्वेश्वरं गंगां पराशरमुखान्मुनीन् ॥
श्रीमच्चिन्मुखयोगिमुख्यरचितव्याख्या निरीक्ष्य स्फुटं तन्मार्गेण सुबोधसंग्रहवतीमात्मप्रकाशाभिधाम् ॥
श्रीमद्विष्णुपुराणसारविवृतिं कर्त्ता यतिः श्रीधरस्वामी सद्गुरुपादपद्ममधुपः साध्वः [साधुः] स्वधीशुद्धये ॥

## १८० सांबपुराणम् ।

आ.—नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयाय त्रिगुणात्मधारिणे विरंचिनारायणशंकरात्मने ॥
च.—भास्करेण हि यत्प्रोक्तं सांबाय लवणांभसि ॥ बृहद्बलाय विध्वासैस्तत्सर्वं कथयामि ते ॥
श्रवणकलितसाम्बो भानुदेवप्रसादाद्भवति विजितकामः कामिनीकेलिपालः ॥
करुणविमलमूर्तिर्धूर्तपापप्रचंडो वलितसकलभोगो याति लोकं च विष्णोः ॥
इति श्रीसाम्बपुराणं समाप्तम् ॥

## १८१ कर्णसुधा-वा-मधुरिपुचरितम् ।

आ.—शेषे शेषशिरीषमार्दवमुषि श्रीरर्पयित्वा करौ निद्रालोर्नवविद्रुमाधरसुधास्वादानुबद्धस्पृहा ॥
शैथिल्यात्करयोर्वपुर्मुररिपोः संप्राप्य सापत्रपा दोर्भिः स्वैः परिरभ्य कौस्तुभधृता पीताधरा पातु वः ॥ १ ॥
च.—कविशवते [शतविदिते] प्रणमति विरते हरिपदनवसारसे ॥ मधुरिपुचरितं मधुरिमभरितं विलसतु कविमानसे ॥
इति कर्णसुधा ॥ कृतं न सुकृतं — — — —

## १८२ गीतगोविन्दं सटीकम्-टीकानाम-रसकदम्बकल्लोलिनी
## मू० जयदेवः टी०-भगवद्दासः ।

टी. च.—श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ॥
पराप्सरादिप्रियबन्धुकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥ ९२ ॥
प्रफुल्लभगवज्जनं रसकदम्बकल्लोलिनी प्रफुल्लयतु मोहने भजनतानसंवर्धिनी ॥

समस्तपदचातुरीवलितगीतगोविन्दतः प्रशस्तरसदीपिका मधुरपुञ्जमञ्जूषिका ॥ १ ॥
गीतगोविन्दतः षष्ठ्यन्तं पदं सार्वविभक्तिकतसिविधानात् । इति श्रीमद्वृन्दावनेश्वरीप्रियकरचरणपङ्केरुहमकरंदास्वाद-नपटुचंचरीकसंभाषणमध्वानन्दोद्दोलचलद्धृदयेन श्रीमद्भगवद्दासेन भगवज्जनपरितोषाय विरचितेयं रसकदम्बकल्लोलिनी श्रीमद्रसवेदिभिर्भगवत्प्रियैरानन्दसंदोहसद्दीपिपरमोज्ज्वलरसावगाहिमनसाहर्निशं विचारणीया ॥
इति श्रीगीतगोविन्दस्य रसकदम्बकल्लोलिनी टीका समाप्ता ॥

## १८३ गीतगोविन्दव्याख्या शशिलेखा-कृष्णदत्तः ।

आ.–प्रीतिं वः परमेश्वरः परहितः प्रीतिप्रसन्नः परामाधत्तां घनसारसुन्दरतरश्रीकस्य सा राधिका ॥
गौरी भूषणभूषणीयपदतामन्योन्यशोभार्पणाद्धैमिव प्रतिमासिताश्मजटिता प्राप्नोति यस्याङ्गगा ॥ १ ॥
विशदितशिवपक्षां गीतगोविन्दटीकां रचयति शशिलेखां मैथिलः कृष्णदत्तः ॥
इह न विविधटीकाव्यञ्जितः कृष्णपक्षो विवृत उभयपक्षैकाभिधेयं पदं वा ॥ २ ॥
दोषान्वितापि कुटिलापि विमार्गगापि शुद्ध्यास्पदं शिवपदं कथमप्यवाप्ता ॥
केषां विशेषविदुषामपि मोदमेषामाधास्यति स्फुटपदा भुवि चन्द्रलेखा ॥ ३ ॥
शैवं नाद्रियते सुधीरपि मतं प्रायेऽधुना वैष्णवः शैवो नैव च वैष्णवं निजनिजासद्वासनावासितः ॥
मत्वेत्थं मधुसूदनोपि मुरजित्पक्षे महिम्नः स्तुतिं व्याचख्यौ जयदेवसूक्तिमपि तां शैवे नयाम्यध्वनि ॥ ४ ॥
च.–कृष्णा कालिका तदेकतानो महेशः तस्मिन्नात्मा मनो यस्य शिवभक्तस्येत्यर्थः ॥ ८८ ॥
जिह्वा व्याली मुखबिलतलादुल्लसन्ती दुरुक्तक्ष्वेडं यस्योद्वमति पिशुनस्यार्यनाभिः किमस्य ॥
जिह्वा यस्य प्रथयति गुणानेव वक्त्रेन्दुवासात्पीयूषार्द्रा जगति सुजनस्यार्यनाभिः किमस्य ॥ १ ॥
इति श्रीमैथिलकृष्णदत्तविरचितायां श्रीगीतगोविन्दस्य श्रीशिवपक्षव्याख्यायां द्वादशः सर्गः ॥

## १८४ गीतगोविन्दटीका साहित्यरत्नमाला-कमलाकरः ।

आ.–तव करकमलस्थां स्फाटिकीमक्षमालां नखकिरणविभिन्नां दाडिमीबीजबुद्ध्या ॥
अनुकलमनुकर्षन्येन कीरो निषिद्धः स भवतु मम भूत्यै वाणि ते मन्दहासः ॥ १ ॥..........
पदवाक्यप्रमाणेषु प्रतिवादिविभेदनम् ॥ पितरं रङ्गनाथार्यं प्लालाम्बां च नमाम्यहम् ॥ ५ ॥
श्रीगीतगोविन्दसमुद्रजानि सद्भावरत्नानि रसैकसूत्रे ॥ ग्रथ्नाति शेषः कमलाकरोयं परीक्ष्यतां तानि विदग्धराज्या ॥ ६ ॥
च.–यन्निर्ययंचनैर्विरिञ्चिगिरिजाप्राणेशमुख्यैर्मुहुर्नानाकारविचारसारचतुरैर्नाद्यापि निश्चीयते ॥
यद्धानैर्जयदेवकाव्यघटितैर्मरसूक्तिसंशोधितैराद्यं वस्तु चकास्ति चेतसि परं सारस्य सीमाजुषाम् ॥ १ ॥
मतिप्रसूता गहनार्थशास्त्रैः संवर्धिता सूक्तिकुमारिकेयम् ॥
औचित्यतारुण्यभरोल्लसन्ती कान्तं पतिं प्राप्य यशः प्रसूतम् [ते] ॥ २ ॥
इति श्रीशेषकमलाकरविरचितायां गीतगोविन्दव्याख्यायां साहित्यरत्नमालायां द्वादशः सर्गः ॥ समाप्तोयं ग्रन्थः ॥

## १८५ गीतगोविन्दटीका रसमञ्जरी-शंकरमिश्रः ।

टी. आ.—श्रीगणेशाय नमः ॥ इह खलु निर्विघ्नप्रारिप्सितसमाप्त्यर्थमेतत्काव्यप्रतिपाद्यराधामाधवकेलिस्मरणरूपं मङ्गलमादा
वाचरति—मेघैरित्यादि ॥

च.—एकतानोनन्यवृत्तिः । एकाग्रैकायनावपीत्यमरः ॥

एतत्काव्यविवेचनप्रणयिनी य [गयनाद्य] त्संशयोन्मूलनात्पुण्यं यच्च हरिस्मृतेः प्रतिपदव्याख्यासु मे संचितम् ॥
तेन प्रीतमनास्तनोतु सततं श्रेयो मम श्रीपतिः शश्वद्विद्वदशोच्यताप्रतिभवः [भुवः] श्रीशालिनाथस्य च ॥ १ ॥
इति श्रीमहामहोपाध्यायश्रीमद्दनेश्वरमिश्रात्मजमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीत-
गोविन्दटीकायां रसमञ्जरीनामधेयायां द्वादशः सर्गः ॥

## १८६ गोवर्द्धनसप्तशतीसंक्षिप्तव्याख्या-गङ्गारामभट्टः ।

आ.—श्रीमद्गजाननं नत्वा कार्यसिद्धिकृतं [करं] नृणाम् ॥ गोवर्धनकृतार्याणां टीकां कुर्वे यथामति ॥ १ ॥
विघ्नविघाताय कृतं मंगलं शिष्यार्थमुपनिबध्नाति । पाणिग्रह इति ॥

च.—अमलपदमिति सर्वमवदातम् ॥ ५४ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणतारोपनामगंगारामभट्टविरचिता गोवर्द्धनसप्तशतीसंक्षिप्तव्याख्या समाप्ता ॥

## १८७ गोविन्दलीलामृतम्-रघुनाथभट्टः ।

आ.—श्रीगोविन्दं व्रजानन्दसंदोहामन्दमन्दिरम् ॥ वन्दे वृन्दावनानन्दं श्रीराधासङ्गनन्दिनम् ॥ १ ॥
योऽज्ञानमत्तं भुवनं कृपालुरुल्लाघयन्नप्यकरोत्प्रमत्तम् ॥ स्वप्रेमसंपत्सुधयाऽद्भुतेहं श्रीकृष्णचैतन्यममुं प्रपद्ये ॥ २ ॥
श्रीराधाप्राणबन्धोश्चरणकमलयोः केशशेषाद्यगम्या या साध्या प्रेमसेवा व्रजचरितपरैर्गाढलौल्यैकलभ्या ॥
सा स्याद्व्याप्ताय यातां प्रथयितुमधुना मानसीमस्य सेवां भव्यां रागाध्वपान्थैर्व्रजमनुचरितं नैत्यिकं तस्य नौमि ॥ ३ ॥
कुञ्जं गोष्ठं निशान्ते प्रविशति कुरुते दोहनान्नाशनाद्यां प्रातः सायं च लीलां विहरति सखिभिः संगवे चारयन्गाः ॥
मध्याह्ने चाथ नक्तं विलसति विपिने राधयाद्धापराह्णे गोष्ठं याति प्रदोषे रमयति सुहृदो यः स कृष्णोऽवतान्नः ॥ ४ ॥
संसारामयहार्यपि प्रणयजोन्मादान्ध्यमोहादिकृच्छ्रश्वच्चर्वितमप्यनल्परसदं देहादिहृत्पुष्टिदम् ॥
यत्पीतं श्रुतिवाङ्मनोभिरनिशं तृष्णाप्रदं चाद्भुतं तज्जीयादमृतस्पृहाहरमिदं गोविन्दलीलामृतम् ॥ ५ ॥

च.—श्रीरूपदर्शितदिशा लिखिताष्टकाल्या श्रीराधिकेशकृतकेलिततिर्मयेयम् ॥
सेवास्य योग्यवपुषा निशमन्नचास्या रागाध्वसाधकजनैर्मनसा विधेया ॥ ९४ ॥
पादारविन्दभृङ्गेण श्रीरूपरघुनाथयोः ॥ कृष्णदासेन गोविन्दलीलामृतमिदं चितम् ॥ ९५ ॥
यैरेतत्परिपीयते हृदि लसत्तृष्णातिरेकान्मुहुर्ब्रह्माद्यैरपि दुर्गमं व्रजविधोर्लीलामृतं राधया ॥
वृन्दारण्यविलासिनीकुमुदिनीवृन्दस्य बन्धुर्व्रजे कारुण्यादचिरेण वाञ्छिततमं तेषां तनोतु स्वयम् ॥ ९६ ॥
श्रीचैतन्यपदारविन्दमधुपश्रीरूपसेवाफले दिष्टे श्रीरघुनाथदासकृतिना श्रीजीवसङ्गोद्गते ॥
काव्ये श्रीरघुनाथभट्टवरजे गोविन्दलीलामृते सर्गोयं रजनीविलासवलितः पूर्णस्त्रयोविंशकः ॥ १ ॥

## १८८ गौरिशंकरकीर्तिः-अमरकविः ।

आ.—श्रीः सौख्यं कीर्तिरायुः किल भवति नृणां यत्कृपालोकलेशात्

च.—श्रीगौरीशंकरप्रीत्यै कृतो ग्रंथः सुशोभनः ॥ अमरेणेह कविना गौडविप्रवरेण वै ॥ २४ ॥

जयसिंहपुरस्थेन माधवेंद्रादिसेविना ॥ नववेदवसुक्ष्माभिर्मिते संवत्सरे शुभे ॥ २५ ॥..........

२७ इत्यमरकविकृतौ श्रीगौरीशंकरकीर्तिनामकाव्ये एकादशः सर्गः ॥

## १८९ दशकुमारशेषः-चक्रपाणिदीक्षितः ।

आ.—भजे भवनिषेवितं भवनमेकमुच्चैः श्रियामपारकरुणामयं परमधामरामाश्रितम् ॥

अनन्तचरणं हृदां परिविभाव्य रामायणं तनोति सुखमक्षयं जगति यस्य पारायणम् ॥ १ ॥

देवीमीडे शांभवीं वाङ्मयीं तां वाच्यातीता शब्दचित्रार्थचित्रा ॥

नव्यानव्या यातिभव्या कवीनामाविर्भूता संमदानादधाति ॥ २ ॥

व्याकुर्वाणेऽशेषशेषप्रबंधानास्येनाहुर्यत्र शेषाद्विशेषम् ॥ कांत्या कीर्त्या प्रज्ञया चंद्रमौलिजातं वंदे दीक्षितं चंद्रमौलिम् ॥ ३ ॥

कुशला मतिः किमिया निर्माणे दशकुमारशेषस्य ॥ अन्तेवासिभिरनिशं प्रेरितबुद्धेर्ममात्र निर्मित्सा ॥ ४ ॥

अयानंदपूर्णमानसोऽमानसोमकांतिः सुश्रुतविश्रुतचरित्रोमित्रोदय

च.—सुखान्यनुभवन्सुचिरमाननंद ॥

इति श्रीदीक्षितचक्रपाणिविरचिते दशकुमारशेषे पंचम उच्छ्वासः ॥ ५ ॥

## १९० नलोदयदीपिका-गोविन्दभट्टः ।

आ.—अपारविद्योदधिपारमेतुं सेतुं सुरेन्द्रादिशुभैकहेतुम् ॥ हेरम्बहेतोभि[हेतौ धि]षणाभिलाषं हेरम्बसेवां समुपाश्रयन्तु ॥ १ ॥

प्रायो नलोदयमिदं निपुणैकगम्यं नानारसैकनिलयं यमकातिरम्यम् ॥

व्याख्यां विना न सुखबोधविधाय काव्यं धारः [विधायि काव्यं धीरः] पयस्तरतु कश्चरणेन नाव्यम् ॥ २ ॥

अस्यानवद्यतरपद्यमनोहरस्य व्याख्याकृतेऽहमधिकं प्रयते वरस्य ॥

विश्वस्य मार्गमुपदर्शयतो नरस्य शंभुः स्मृतिं न किमु दर्शयिता नरस्य ॥ ३ ॥

ग्रन्थारम्भे श्रीकृष्णस्मरणरूपमङ्गलमाचरति चतुर्भिः —हृदयेति ॥

च.—ब्राह्मस्यैकगृहं बभूव भगवत्पादारविन्दद्वयोरालम्बेत्रिकुले सुभाषितयु (जु) षां मान्यः स पीताम्बरः ॥

तस्मा——व्यतिभानि भव्यभवताचानुर्यनव्यस्फुर- — — — — — — — — द्बुद्धिरनल्पतपसां श्रीनागनाथाभिधः ॥ १ ॥

— — — — — — — — — प्रथितबहुविद्यापरिचयो महादेवो देवत्रिपुररिपुमाराध्य विधिवत् ॥

फलं लेभे लीलाविलसितकविरत्नौ तनुजनी तयोर्गोविन्दाख्यो व्यरचयदिमां श्रेष्ठपदभाक् ॥ २ ॥

इति श्रीगोविन्दभट्टविरचितायां कालिदासविरचितनलोदयदीपिकायां चतुर्थ आश्वासः ॥

## १९१ फाल्गुनशतकम्-रामचंद्राज्ञो वैद्यः ।

आ.—नमामि लिंगं भगमध्यदेशे विराजमानं मुसलप्रमाणम् ॥ आंदोलितं यस्य सहस्त्रवारं यातं पुनर्यच्च भगस्य पारम् ॥ १ ॥
जंघाद्वयाभ्यंतरमध्यदेशे विराजमानं भगमप्रमाणम् ॥ उलूखलाकारगभीरदेशं सर्वसहातुल्यमभूरिकेशम् ॥ २ ॥
च.—ये शृण्वंति पठंति वैद्यरचितं श्रीरामचंद्राज्ञया न्यायाकारविचारचारुकरणैः कामप्रदं नित्यशः ॥
सर्वानंदकरं मनोहरतरं गद्यैः सुपद्यैस्तथा शृंगाररस्य रसेन पूरिततरैस्ते चाप्नुवंति श्रियम् ॥ १०४ ॥
इति श्रीवैद्यविरचितं फाल्गुनशतकं संपूर्णम् ॥

## १९२ भगवत्प्रसादचरितम्-दामोदरः ।

आ.—श्रीकृष्णनाथ करुणाकर दीनबन्धो त्रातः पितः प्रभु विधेहि दयामुपेहि ॥
श्रुत्वेति कौरवसभागतयाज्ञसेनीशब्दं क्षणागतमशेषपतिं भजामः ॥ १ ॥............
इति सकलमुदन्तं भूपकल्याणरूपं विविधनृपतिदूताः स्वामिनश्चानुहस्तैः ॥
झटिति समभिनिन्युः सोपि कर्तव्यमानी गजरथहयसंघैर्नागसाख्यं प्रतस्थे ॥ ५४ ॥
यन्माता यमुनाधरीकृतसतीत्राता चरित्रैः पिता सत्कीर्तिर्द्विजदेवपूजनपरः श्रीविश्वनाथस्तथा ॥
तेन श्रीनरसिंहचिन्तनफले दामोदरेणोदिते काव्ये श्रीभगवत्प्रसादचरिते सर्गोयमादिर्गतः ॥ १ ॥............"
द्वितीयसर्गश्लोकाः ७२ तृ० ९९ च० ८१ पं० ५२ ष० ५२ स० ११७ अ० ४६ न० १०६ द० ८२
इति श्रीचतुरुदधिपरिखामण्डलमण्डितभूमण्डलमण्डनविद्वन्मुकुटमाणिक्यकविवरश्रीदवडवायोपनाम्नो दादाजीविश्वनाथ-(सुतदामोदर) स्य कृतौ श्रीभगवत्प्रसादचरिते महाकाव्ये कल्याणाङ्के दशमः सर्गः ॥ ए० ११३ द्वा० १०५ त्र० ८२ च० ४४ पं० ४४ षो० ३९ स० ४९ अ० ४० एकोन० ६९"
च.—ते तीर्त्वेति दुरोदराब्धिमटवीवासादिकं बाहुभिः क्रूरग्राहगतैरनच्छमतलस्पर्शं परं भेजिरे ॥
कल्याणं विनिपात्य शत्रुनिचयं शस्त्रैः स्वराज्यं तदा किं वा श्रीभगवत्प्रसादचरिते सिद्धेनवाप्यं नृणाम् ॥ ९३ ॥
यन्माता— — — काव्ये श्रीभगवत्प्रसादचरिते सर्गस्तु विंशो गतः ॥ २० ॥

## १९३ मनोवलंबिका-मुकुंददासः ।

आ.—श्रीरूपवाणीमाधुर्यवृंदा [श्रीरूप हे श्री] वृंदा वनांतरे............
च.—श्रीरूहे श्री रघुनाथदास श्रीकर्णपूराभिध कृष्णदास ॥ युष्मन्मुखांभोजविनिःसृतानि पद्यानि मे ह्यनिश स्फुरंतु ॥
युष्मत्पदांभोजरजोनुवर्तिना मुकुंददासेन मनोवलंबिका ॥ गोविंदलीलामृतदर्शितक्रमात्पद्यानि संगृह्य मया विनिर्मिता ॥
इति मनोवलंबिकायां निशायविलासो नामोऽष्टमो विषयः ॥

## १९४ मृगाङ्कशतकम्-कंकणः ।

आ.—जेतुं त्रिभुवनमखिलं स्फटिकगणेशं तुषारकरविम्बम् ॥ बिल्वदलैरर्चितवांस्तदिह कलङ्कः विशङ्कन्ते ॥ १ ॥
च.—विद्रुदाधतण्डुलपिण्डं लाञ्छनवदलं विधिर्वहति ॥ अहह चिरादिह सूते कमपि कुमारं स्मरं रजनी ॥ १ ॥

इति कविकङ्कणभणितं शतकं तनुतां मृगाङ्कस्य ॥ रुचिमचिरादिव ककुभामुदयो मृगाङ्कस्य ॥
इति श्रीकविकङ्कणभणितं मृगाङ्कशतकं समाप्तम् ॥

## १९५ मेघदूतटीका बालप्रबोधिनी-स्थिरदेवः ।

आ.—कल्याणपूर्णैः करुणाकटाक्षैः काशीपुरे कामपि कामवल्लीम् ॥ सीमानमुच्चैः सुतवत्सलानां समाद्रिये मातरमद्रिकन्याम् ॥ १ ॥
काशीविश्वेशचरणौ प्रणम्याभीष्टसिद्धये ॥ क्रियते मेघदूतस्य टीका बालप्रबोधिनी ॥
तत्रादौ चिकीर्षितस्य काव्यस्य
च.—उद्भासिताखिलपदानिह [पदामिह] मेघदूतकाव्ये प्रवुद्धरसबन्धुरभावभाजि ॥
सज्जीभवद्गुणकथां स्थिरदेवनामा टीकामिमामकृत कीर्तिमिव प्रसन्नाम् ॥ १ ॥
इति श्रीसरस्वतीशृङ्गारहारोपाख्याने महाकाव्ये कविराजकालिदासकृतौ स्थिरदेवकृतिरियं टीका संपूर्णा ॥

## १९६ युधिष्ठिरविजयकाव्यटीका पदबोधिनी-रघुरामः ।

आ.—जयति सिद्धिकरः कमलापतिः सकललोकहिताय धुरंधरः ॥
नम तमेव मनः प्रथमं प्रभुं यदि तवास्ति पिपावयिषा [पियावयिषा] त्मनि ॥ १ ॥
नत्वा शिवं गणेशं च वाग्देवीं च गुरूनपि ॥ क्रियते रघुरामेण बालार्थं पदबोधिनी ॥

## १९७ लक्ष्मीसरस्वतीविवादः-रामानन्दः ।

आ.—ब्रह्मेन्द्रोपेन्द्रमुख्यत्रिदशपरिवृढश्रेणिभास्वत्सुधर्मा सिन्धोरावर्तसान्द्रध्वनिरिव विलसद्गद्यपद्यप्रवाहः ॥
नानालंकारछन्दोगुणगरिमगुणग्रामविश्रामबन्धुः श्रीभारत्योर्विवादः कलयतु सततं शर्म निर्मत्सराणाम् ॥ १ ॥
च.—अब्दे खश्रुतिसागरेन्दु (१७४०) कलिते पक्षे वलक्षेतरे सन्मास्याश्विनके हरेः शुभतिथौ श्रीमद्गुरोर्वासरे ॥
श्रीवाण्योरिह तीर्थराजनगरे सद्वादमस्यद्भुतं रामानन्दसुधीश्चकार विदुषां निर्मत्सराणां मुदे ॥
एतस्मिन्मम गद्यपद्यरचनामाधुर्यमोदप्रदे श्रीवाण्योरितरेतरोक्तिगहने वादे मदीयं बुधाः ॥
स्यादेवानवधानतः खलु यथा स्वेनाध्वना गच्छतां तद्वन्मे स्खलनं तदत्र कृतिभिः क्षन्तव्यमित्यञ्जलिः ॥
इति श्रीमत्सरयूपारीणपण्डितधुरीणमहाकुलीनश्रीमत्त्रिपाठिमधुकरसत्संतानत्रिपाठिरामानन्दशर्मविनिर्मितो लक्ष्मीसरस्वत्योर्विवादः समाप्तः ॥

## १९८ वखतेशरहस्यकाव्यम्-माणिक्यमैथिलः ।

आ.—स जयति वखतेशभूमिपालो हरिरिव संप्रति पुंडरीकनेत्रः ।
च.—संप्रति राजते ॥ ३७ ॥ इति श्रीमाणिक्यमैथिलकृते श्रीवखतेशरहस्ये गृहागमनं नाम सप्तमः सर्गः ॥

## १९९ वाराणसीदर्पणः-सुन्दरः ।

आ.—नत्वा श्रीगुरुपादपद्मयुगलं स्मृत्वा परं श्यामलं

च.—श्रीमद्राघवसूनुसुंदरकृते वाराणसीदर्पणे श्रीमच्छंकरशंकरीपदयुगप्रत्यक्षभावोदधौ ॥

श्रीमद्रुद्रसुसंख्ययाभिगणितः कालेशकंठच्छविर्विश्वेशोत्तमनाम सर्वचरमः काव्ये प्रसादः शिवः ॥ २६ ॥

विश्वेशोत्तममूर्त्तिदेविमहिता[तं] दिव्यैरहोभिर्मुदा सत्यं श्रीरसविश्वनायगणिते चाब्दे गुरौ वासरे ॥

आषाढोत्तममासशुद्धसरले पक्षे तिथिः पंचमी तस्यां राघवसूनुना कृतमिदं वाराणसीदर्पणम् ॥

## २०० विनयसिंहकीर्त्तिरथः-गार्गादीनः ।

आ.—सदरविंदरविं शशिभूषणं गुरुनिदेशबुधं कृतमंगलम् ॥ कविरमंदमुदे प्रतिवासरं द्रुतविलंबितविश्वसृजं भजे ॥ १ ॥

च.—जनयतु चेतसि संमदं कवीनाम् ॥ ३१ ॥

इति श्रीगार्गादीनविरचिते श्रीरावराजविनयसिंहकीर्त्तिरथे काव्ये पंचमः सर्गः ॥

## २०१ व्रजविलासस्तवः ।

आ.—प्रतिष्ठारज्जुभिर्बद्धं कामाद्यैर्वर्त्मघातिभिः ॥ छित्वा ताः संहरंतस्तानघोरः पांतु मां भटाः ॥ १ ॥

च.—मुहुः कुतुकसंभृताः परिपठंति ये वल्गु तत्समं परिकरैर्द्वंद्वं मियुनमत्र पश्यन्ति ते १०७

इति श्रीव्रजविलासस्तवः समाप्तः

## २०२ शंभुमतिविलासः-शंभुमिश्रः ।

आ.—कश्चिद्द्विजो भरतवर्षमिमं भ्रमित्वा

च.—संवत्सरैकनिगमेभशशांकसंख्ये शाकेब्धिचंद्रहयभूमियुते च ज्येष्ठे ॥

कुह्वां रवावमृतभूवनसंनिकर्षे काव्यं हयास्यकृपया परिपूर्त्तिमागात् ॥ १०६ ॥

इति श्रीमन्नारायणचरणनलिनद्विरेफश्रीनिवासाचार्यशिष्यमिश्रशंभुविरचिते शंभुमतिविलासाख्ये महाकाव्ये चार्वाका-दिनिराकरणविप्रमथुराप्रवेशादिवर्णनं नाम चतुर्थः सर्गः ॥ ४ ॥

## २०३ शालिवाहनसप्तशत्याष्टीका-गोविन्दशर्मा ।

आ.—आसीन्मनस्वी पलिचोभवंशे वागीश्वरः श्रोत्रियमंडलीनाम् ॥

मान्यस्य वूजो [नूजो] भवदस्य धन्यो गोविंदशर्मा बहुपुण्यकर्मा ॥ १ ॥

इतोभवदयं महीवलयकामदेवः श्रियां मनोहरमहोदयो निखिलदानदेवद्रुमः ॥

करोति च चतुर्थकां मुनिशतीयटीकामिमां नियुज्य हरिता (त) जं विविधविद्यपीतांबरम् ॥

## २०४ संगीतरघुनन्दनं सटीकम्-विश्वनाथसिंहः ।

टी. आ.—वन्दे तत्पदकमलं यस्य मरन्दः पुनाति जगदखिलम् ॥ उपलं परागलेशश्चेतनतां शीघ्रमानयति ॥ १ ॥
राजेन्द्रनन्दनविलोचनचञ्चरीकसंसेव्यमानवदनाम्बुरुहां सखीभिः ॥
स्वीयप्रभाजितरमा [मां] रुचिभिः परीतां रासेश्वरीं हृदि भजे निमिराजपुत्रीम् ॥ २ ॥.........
सीतारामरहस्यं मां बोधयन्ति हृदम्बुजे ॥ स्थितास्तान्हरिरूपाञ्छ्रीप्रियादासगुरून्भजे ॥ ६ ॥
नत्वा गौरीशपादाब्जं टीका व्यङ्ग्यार्थचन्द्रिका ॥ श्रीरामरसरसिकविनोदाय विधीयते ॥ ७ ॥
मू. आ.—रामप्रेमपयोधिवर्धनविधुः शृङ्गारसारास्पदं संसारार्णवदासतारणतरिर्मायातमोदीपिका ॥
विद्युद्दासुखवृन्दवर्षणकरी कादम्बिनी काप्यसौ मद्धृत्कंजनिवासिनी विजयतां श्रीजानकी सर्वदा ॥ १ ॥..........
विन्ध्ये रिपुगजसिंहो जयसिंहो राजसिंहोऽस्ति ॥ तनुते तस्य तनूजो ग्रन्थं संगीतरघुनन्दनाख्यम् ॥ ८ ॥

## २०५ सभ्याभरणम् सटीकम्-भट्टरामचन्द्रः ।

आ.—स्मरामो रामचंद्रस्य पदपंकजमंजसा ॥ यद्रजोरंजिता लेभे शिलापि गिरमुज्वलाम् ॥ १ ॥
यत्कृपालवलीलाया सखी वाग्देवता स्वयम् ॥ तस्मै श्रीविश्वनाथाय ताताय गुरवे नमः ॥ २ ॥
आख्यातुमिव यः स्वस्माच्चतुर्दशजगज्जनिम् ॥ तावंति मुनये सूत्राण्युक्तवांस्तं नुमः शिवम् ॥ ३ ॥
प्रथमं विदिताम्नायः संज्ञारूपाण्यनेकधा ॥ व्यधत्त वेधा इव यस्तस्मै पाणिनये नमः ॥ ४ ॥
यः पाणिनीयार्थमणीनुक्तांचितादिघर्षणैः ॥ संस्कृतानार्थिसाच्चक्रे तं वार्तिककृतं भजे ॥ ५ ॥
कृपयाऽकृत सुकीर्ति यः स्वादिवदर्थत्रयव्यक्तिम् ॥ भुजगपतेरवतारं प्रणतोऽस्मि पतंजलिं तमहम् ॥ ६ ॥
पाणिनीयार्थकनकैः कलितश्लेषमौक्तिकैः ॥ तन्यते रामचंद्रेण सभ्याभरणमुत्तमम् ॥ ७ ॥
काव्यस्य गुणदोषौ तु नात्र शंक्यौ बुधा यतः ॥ सूक्तिव्याजेन शास्त्रार्थस्मृतयेऽयमुपक्रमः ॥ ८ ॥
रक्षोहानिमिषाविष्कृतकृतधर्मस्थितिर्जगति ॥ व्याकरणागमरहितोऽवतार इव सम्भ्रमो जयति ॥ ९ ॥
व.—अष्टाध्याय्यंतिमं सूत्रं तद्विचारणाय स्वरूपं प्राप्यते तया वस्तुतो ब्रह्मैवसन्ननिर्वाच्यानाद्यविद्याविलासेन जीवतां गतः कोविदः पंडितो मनो यदि संवृतं विषयाभिलाषशून्यं जातं तदा तत्त्वमसीत्यादिवेदांतवाक्यविचारणाय पुनः स्वरूपमखंडानंदमधिगम्य निर्वृतो वीतशोकः को न स्यादित्यर्थः ॥ ४ ॥ इति श्री(क)मलाकरभट्टविश्वनाथसूनुभट्ट-रामचंद्रकृते सभ्याभरणे रामचंद्रपंडितकृततट्टीकायां च प्रकीर्णकनामा नवम उल्लासः ॥ स० ॥

## २०६ हरचरितचिन्तामणिः-राजानकजयरथः ।

आ.—दृप्यद्भेदभुजंगदूषितहरिब्रह्मादि.....कस्यस्वात्मनि पावके मम परा दृष्टिः स्फुरत्वैश्वरी ॥ १ ॥
प.—वनाश्रयणमात्रेण जन्म विच्छिद्यते यदि ॥ तर्हि लोकैः प्रशंस्यन्ते ग्रामपक्षिमृगादयः ॥

## २०७ हंसदूतं सटीकम्-मू० टी० श्रीरूपगोस्वामी ।

मू. आ.—दुकूलं बिभ्राणो दलितहरितालद्युतिहरं जपापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ॥
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः परानन्दाभोगः स्फुरतु हृदि मे कोपि पुरुषः ॥ १ ॥

टी. आ.—दलित: खण्डितो हरितालस्य द्युतिभर: कान्त्यतिशयो येन ।
च. मू.—रसानामाधारैरपरिचितदोषः सुहृदयैर्मुरारातिक्रीडावलिनिविडरूपार्पितगुणा: ॥
प्रबन्धोयं बन्धोरखिलजगतां तस्य सहसा प्रभोरन्तः सान्द्रां प्रमद— — — —पल्लवयितुम् ॥ १४२ ॥
इति श्रीमद्रूपगोस्वामिना विरचितं हंसदूताख्यं महाकाव्यं समाप्तम् ॥

## २०८ हरिविलासकाव्यम्-लोलिम्बराजः ।

आ.—रचयति सहसा यश्चित्रमेतं प्रपञ्चं प्रशमयति च तद्वत्केनचित्कौतुकेन ॥
अविदितमपरैस्तच्चण्डमुण्डादिनानादनुजदलनदक्षं शर्वसर्वस्वमव्यात् ॥ १ ॥
च.—नानागुणैरवनिमण्डलमण्डनस्य श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ॥
त्रैलोक्यकौतुककरं क्रियते स्म काव्यं लोलिम्बराजकविना कविनायकेन ॥ ५६ ॥
इति श्रीमत्सूर्यपण्डितकुलालंकारश्रीहरिहरमहाराजाधिराजोद्द्योतितलोलिम्बराजविरचिते हरिविलासे महाकाव्ये कंसवधोनाम पञ्चमः सर्गः ॥

## २०९ आनन्दवृन्दावनचम्पूः सटीका मू० टी० कर्णपूरकविः ।

टी. आ.—वत्सास्वाद्य मुहुः स्वया रसनया प्रापय्य सत्काव्यतां देयं भक्तजनेषु भाविषु सुरैर्दुष्प्राप्यमेतत्त्वया ॥
इत्याज्ञापयतेव येन निदधे श्रीकर्णपूराननॆ वाल्ये स्वांघ्रिदलामृतं गतिरसौ चैतन्यचंद्रोस्तु नः ॥
नितांतनैसर्गिककृष्णसारलीलाद्वयमुच्चैः पदमात्मनीनम् ॥ श्रीरूपसंमत्यनुकूलमेव पर्वैः श्रितं संश्रयते सुमेधाः ॥
नंदोत्सवादिरासांतां होलादोलादिकाधिकाम् ॥ श्रीकृष्णलीलां जग्रंथ कर्णपूरो महाकविः ॥
एकेन स्तवकेनाहं वृंदारण्यं तदास्पदम् ॥ वाल्यलीलां ततः षड्भिः प्रादुर्भावमुखां हरेः ॥
ततस्तु पंचदशभिर्लीलां कैशोरवर्त्तिनीम् ॥ एवं द्व्यधिकया चम्पूर्विंशत्या स्तवकैः कृता ॥
अथ सोयं कविमुकुटमणिरास्वादितचरणसौरस्यं पुनरपि मनोमधुपराजेनोपभुज्यमानापूर्वं नवनवमाधुर्यसंपत्तिश्री-गवच्चरणकमलमानंदावेशेन वंदमान एव तन्निदेशपरममंगलसुधापरंपरयानिर्णीयमाने प्रत्यूहतापानुद्गमगमकेपि प्रव-सदाचारसंमाननार्थमवश्यं कर्तव्यं मंगलाचरणमप्यनुसंजयाति ॥ वंदे इति
मू. आ.—वंदे कृष्णपदारविंदयुगलं यस्मिन्कुरंगीदृशां
मू. च.—चैतन्यकृष्णकरुणोदितवाग्विभूतिस्तन्मात्रजीवनधनस्य जनस्य पुत्रः ॥
श्रीनाथपादकमलस्मृतिशुद्धबुद्धिश्चंपमिमां रचितवान्कविकर्णपूरः ॥ ६१ ॥
इत्यानंदवृंदावने कैशोरलीलालताविस्तारे दोलोत्सवो नाम द्वाविंशतिः स्तवकः ॥ समाप्तश्चायमानंदवृंदावनाभिधोग्रंथ-
टी. च.—तन्मात्रजीवनधनस्य श्रीशिवानंदसेनस्य ॥ ६१ ॥ इत्यानंदवृंदावनटीकायां सुखवर्तिन्यां द्वाविंशतिः स्तवकसंगमन-
संतः संत शंतमे [संतः संतु शतंसमा] हितहितप्रारंभसंभाविताः सर्वेषामपि किं पुनर्मम नमच्छीर्ष्णः स्वभूष्णधियः
तेनैषां क्षणमीक्षणक्षणमियं टीका न किं लप्स्यते शुद्धिं बुद्धिमतां मतामथ ततः प्रायैव राजिष्यते ॥

## २१० कृष्णलीलाशृङ्गारः-वैद्यनाथः ।

आ.-विविधभूमिकया विबुधोत्सवं समतनोद्य इहाद्भुतलीलया ॥ कलितपीतपटः कुतुकी नटः स सुखमातनुतां भक्तां हरिः ॥१॥
च.-आतन्वाना प्रमोदं सहृदयहृदये सा समुल्लासहेतुः ॥ इति निष्क्रान्ताः सर्वे चतुर्थोंकः ॥ ४ ॥ संपूर्णा चेयम् ॥
तत्सदुपाख्यवैद्यनाथकृता श्रीकृष्णालीलानाम शृंगारनाटकम् ॥

## २११ मुक्ताचरितनाटकम्-कृष्णकविः ।

आ.-कंदर्पकोटिरम्याय स्फुरदिंदीवरत्विषे ॥ जगन्मोहनलीलाय नमो गोपेंद्रसूनवे ॥ १ ॥
च.-आददानस्तृणं दंतैरिदं याचे पुनः पुनः ॥ श्रीमद्रूपपदांभोजधूलिर्भूयां भवे भवे ॥
यस्याज्ञा सुधया प्रबोधितधिया मुक्ताचरित्रैर्मया गुछ [च्छैः] पुष्पभरैर्व्यधायि य इह श्रीरूपसंशिक्षया ॥
जीवाख्यस्य मदेकजीविततनोस्तस्यैव हृक्षट्पदीघ्राणैस्तं परिभूषितं तु तनुतां तत्केलिशीधूत्कधीः ॥
मुक्ताचरितपुष्पौघैर्गुच्छं गुंफितमद्भुतम् ॥ वसंतयतु सत्स्नेहाच्छ्रीमद्रूपगणो रहः ॥
यस्य संगलवतोद्भुता मया मौक्तिकोत्तमकथा प्रचारिता ॥ तस्य कृष्णकविभूपतेर्व्रजे संगतिर्भवतु मे भवे भवे ॥
इति मक्ताचरितं समाप्तम् ॥

## २१२ राधामाधवनाटकम् ।

आ.-राकाकैरवबंधुबंधुरमुखो बन्धूकवर्णाधर-
च.-सतृष्णः श्रीकृष्णो विषयमृगतृष्णां हरतु वः ॥
इति श्रीराधामाधवनामधेयनाटके सानन्दगोविन्दो नाम सप्तमोंकः ॥ समाप्तश्चायं ग्रन्थसंदर्भः ।

## २१३ रामाभ्युदयनाटकम्-रामदेवः ।

आ.-विश्वोल्लासिनिशाविसारितिमिरं दूरं निरस्यादरात्- — — — — —
तदद्य देव श्रीत्रिपुरुषायतनमनुकौमुदीमहोत्सवमिलितं यात्रिकजनमभिनवरूपकाभिनयेन विनोदयितुमिच्छामि ॥
परिक्रम्य नेपथ्याभिमुखमवलोक्य आर्ये इतस्तावत् ॥ प्रविश्य । नटी० ॥
एसह्मि आणवेदु अज्जो को णिओओ अणुचिट्ठिअदु त्ति ॥
सूत्र० आर्ये विदितमेव तावद्भवत्या ।
अस्ति ध्वस्तसमस्तवैरिविपिनप्रोद्यत्प्रतापानलज्वालालीविमलीकृतत्रिभुवनः श्रीरामदेवात्मजः ।
आयुष्मानवनीवनीपकमनःसंकल्पकल्पद्रुमो मेरुः स्मेरयशःप्रसूनपटलप्रोल्लासितोर्वीतलः ॥ ३ ॥
अपि च । रणक्षोणीरंगप्रसृमरविपक्षक्षितिभुजो भुजादंडोदंचत्तरसमरकंडूभरहरः ॥
शरद्राकाकारमणकिरणालीशुचि [कारैर्मणिकिरणजालैःसुवि] लसद्यशः श्रीः श्रीमेरुः कथमिव हि वर्ण्यः कविजनैः ॥ ४ ॥
तेन च प्रबलरिपुकुलजलधिसंशोषणागस्त्येन त्रिविधवीरचूडामणिना महाराजश्रीमेरुदेवेन समादिष्टोस्मि ॥

यथा सरसकविना व्यासश्रीरामदेवेन विरचितमभिनवं रामाभ्युदयं नाम छायानाटकमभिनीयमानं निरूपमानं निरूपयितुमिच्छाम: ।

च.–विलसतु विमल: कोपि वाचां विलास: ॥ ३० 

इति परिक्रम्य निष्क्रांता: सर्वे ॥ द्वितीयोंक: समाप्त: ॥

## २१४ हृदयविनोदाख्यं प्रहसनम्-कविपण्डित: ।

आ.–उद्वेलवारिनिधिमध्यनिमग्नपृथ्वीनिष्कर्षणप्रकटिताद्भुतविक्रमोपि ॥

उन्मानपीठहरणादनुभूतखेद: शर्मानिशं दिशतु मुग्धकुमारमूर्त्ति: ॥ १ ॥

नांद्यंते सूत्रधार:..........

जमदग्निपंक्तिरथशौरिबुंदेलप्रभवेषु राम इति नाम समानम् ।

प्रथितास्त्रयोपि जयनीतिबलैस्त्रिभिरेव चान्य इति कश्चन भेद: ॥ ८ ॥

नटी-अज्जउत्त को तस्स राअसूणो गुणरासिणो संकलेदुं सकुणोदि यस्स रामसाही रामसाहित्ति सद्दो दंडाहदकसाणसद्दं व्व चिरं णज्जावि विरमदि ।

सूत्र० प्रसह्य संग्रामयतो विविक्षन्संग्रामसाहीति पदेन रूढ: ॥ तस्यात्मज: पांडुतनूजकाव्य: (कल्प:) संग्रामनि:शंकमना बभूव ॥ नटी० तदो तदो ॥

सूत्र० पुनरभूद्भारतसिंह इति राजसिंह:

च.–नोदुग्रै: कलिकालदोषनिकरैर्विघ्नं पराभूयतां काम्यं कर्मफलोदयाय विदुषामस्त्वैहिकामुष्मिकम् ॥

राजान: परिपालयंतु वसुधां काव्येषु सत्प्रीतय: साधूनां प्रणिधानमेतु हृदयं साक्षात्परब्रह्मणि ॥

इति निष्क्रान्ता: सर्वे ॥ द्वितीयोंक: ॥

द्व्यंक्यं प्रहसनमेतद्रचितं कविपंडितेन सत्कविना ॥ आषाढकृष्णपक्षे नवम्यां कुजयतायाम् ॥

इति श्रीहृदयविनोदनाख्यं प्रहसनं समाप्तिमगमत् ॥

## २१५ अलंकारकुलप्रदीप:-विश्वनाथ: ।

आ.–ॐनम: सकलगोपवधूनां स्वात्मनि प्रवणितप्रणयाय ॥ घर्मवासरगमावसरोद्यद्वारिवाहरुचिराय (चिराय) ॥ १ ॥

विधाय वाचस्पतये धराया लक्ष्मीधरायाभिमतं प्रणामम् ॥ विश्वेश्वरोर्थं विशदं वितन्वन्करोत्यलंकारकुलप्रदीपम् ॥२॥

च.–पुरातनानप्यधुनातनांश्च महानिबंधानवधार्य सम्यक् ॥ अयं कृतोऽलंकरणप्रदीपो विद्व(त्स)मानैर्बहुमाननीय: ॥

श्रीमन्महीमहिततत्तदसीमधर्मिन्मूर्धन्यताकलनसंगतधन्यताक: ॥

लक्ष्मीधरोयमुदसूत मुदं प्रसूतां विश्वेश्वरस्य कृतिरस्य चिरस्य लोके ॥

## २१६ अलंकारकौस्तुभ: सटीक:-मू० टी० कविकर्णपूरगोस्वामी ।

टी. आ.–अद्वैतप्रकटीकृतो नरहरिप्रेष्ठ: स्वरूपप्रियो नित्यानंदसख: सनातनगति: श्रीरूपहृत्केतन: ॥

लक्ष्मीप्राणपतिर्गदाधररसोल्लासी जगन्नाथभू: सांगोपांगसपार्षद: स जयतां देव: शचीनंदन: ॥

अथ सोयं कविमुकुटमणिः श्रीकविकर्णपूरगोस्वामी स्वकृतश्लोकानां स्वयमेव व्याख्यामाह । ग्रंथारंभ इति ॥ परिभवार्थकजिधातुः सकर्मकः ॥

मू. आ.–ग्रंथारंभे स्वाभीष्टदेवतानामगुणकीर्तनात्मकं मंगलं

मू. च.–इत्यलंकारकौस्तुभे दोषप्रदर्शनो नाम दशमः किरणः ॥

श्रीमतः कर्णपूरस्य चरणाववनिशं भजे ॥ निर्मितः कृष्णकंठार्हो येनालंकारकौस्तुभः ॥

टी.. च.–यत्तु श्यामामृतं तत्पिबामः ॥ १४०० ॥ समाप्तेयं श्रीअलंकारकौस्तुभस्य टीका ॥

## २१७ अलंकारमुक्तावली-विश्वेश्वरः ।

आ..–सन्मूलप्रकृतिः प्रकाशितशतानंदो दधानः क्षमां कृष्णोद्यापि सुमंतुनैकगुरुताशाली न यत्पूज्यताम् ।
सद्वृत्ति दधदात्मभूतनयतामारुंधते यस्य तामाचार्यः प्रथमो गिरां विजयते विद्वान्स लक्ष्मीधरः ॥ १ ॥
नानापक्षविभावनकुतुकमलंकारकौस्तुभे कृत्वा ॥ सुखबोधाय शिशूनां क्रियते मुक्तावली तेषाम् ॥ २ ॥

च..–शश्वत्सभाजनसभाजनभाजनत्वम् ॥ १ ॥
श्रीमन्महीमहिततत्तदसीमधीमन्मूर्धन्यताकलनसंगतधन्यताकः ।
लक्ष्मीधरोयमुदसूत मुदं प्रसूतां विश्वेश्वरस्य कृतिरस्य चिरस्य लोके ॥ २ ॥
इत्यलंकारमुक्तावली समाप्ता ॥

## २१८ काव्यप्रकाशटीका-साहित्यचन्द्रः ।

आ..–पिबतोरपि सुस्मितामृतानि द्रुततृष्णाकुलयोरधिस्नुयु [धृष्णुयू] नौः ।
विलसत्यसितांबुजच्छदाभा तडिदभ्रत्विषयोः कटाक्षवृष्टिः ॥ १ ॥
कुमारसूर्यो यदुवंशपंकजप्रकाशको मुद्रितवैरिकैरवः॥सुहृन्मनस्तोमतमांसि नाशयन्व्रजाजिरांतः समुदेतु सर्वदा ॥ २ ॥
सूर्याभिसोभाग्ये [सूर्याभिख्ये] गोकुलाधीशिसूनौ स्वेष्टां लीलां भूषणैर्वक्तुकामे ।
जातः क्षित्यां भारतैः सूत्रवृंदैर्द्वेष्टि ध्वांतानेव साहित्यचंद्रः ॥ ३ ॥
प्रारिप्सितस्य शास्त्रस्य निर्विघ्नां परिपूर्तिमिच्छन्भरतः सरस्वतीं प्रणमति ॥ नियतिकृतानियमरहिता

च..–शब्दस्य शक्त्याधिक्याच्छाब्दी व्यंजनेति व्यपदेशः ॥.
इति श्रीसाहित्यचंद्रे शब्दनिरूपणं द्वितीयः किरणः ॥

## २१९ काव्यप्रकाशव्याख्या साहित्यकौमुदी कृष्णानन्दिनीटीकसहिता ।

आ.–प्रणम्य कृष्णं सर्वेशं श्रीवत्साद्युक्तिसंश्रयात् ॥ व्याख्यायतेऽतिसंक्षेपात्सेयं साहित्यकौमुदी ॥ १ ॥
सद्भिः पद्यैः कारिकाभारतीर्य्यः शुद्धिं निन्ये तुच्छपद्यैरनच्छाः ॥
साहित्यांभोजन्मसच्चंचरीकः सोयं विद्याभूषणोऽस्मान्पुनीताम् ॥ २ ॥

काव्यरसास्वादनाय वह्निपुराणादिदृष्टां साहित्यप्रक्रियां भरत: संक्षिप्ताभि: कारकाभिर्निबबंध । ता व्याचिख्यासुर्वृत्तिकृ-न्मंगलमाचरति कारुण्यादिति

कारुण्याद्व्रजपतिराशु यस्य भेजे निर्धूताखिलवृजिन: परं प्रमोदम् ॥
चैतन्याकृतिमजितं जितं स्वभक्तैरतंवंदे मधुरिमसागरं मुरारिम् ॥ १ ॥
सूत्राणां भरतमुनीशवर्णितानां वृत्तीनां मितवपुषां कृतौ ममास्याम् ।
लक्ष्याणां हरिगुणशालिनां च सद्यास्कुर्व्वंतु प्रगुणधियो वतावधानम् ॥ २ ॥

निष्प्रत्यूहप्रारीप्सितपरिसमाप्तिकामो मुनि: समुचितां गीर्देवीं प्राक्प्रणामाति ।
नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्राम् ॥ नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥
अत्र विधिकृतविलक्षणविधविधानाज्जयतीति नतिमाक्षिप्य तां प्रति प्रणतोऽस्मीति व्यनक्ति ३ प्रेक्षावत् प्रवृत्तये शास्त्राभिधेयफलं तावदाह ॥

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ॥ सद्य: परानिर्वृतये कांतासम्मिततयोपदेशयुजे ॥
कीर्त्तिर्धनावाप्तिर्देवमनुष्यादिव्यवहारावगतिर्देवतावंदनकृत: क्लेशनाश: सपद्येव रसानुभवसमुद्भूत: परमानंद: सरसतया धर्म्मादिरूपहितोपदेशश्च
काव्यादेव भवतीति सर्व्वथा तत्र प्रयतनीयम् । वेद: खलु शब्दप्राधान्यात् प्रभुसम्मित: पुराणादिश्चार्थप्राधान्यात् सुहृत्सम्मित: शास्ति काव्यं तु शब्दार्थयोर्गुणतयारसांगभूतव्यापारप्राविण्यात्तद्विलक्षणमत: कान्तासम्मितं तादिति ॥ ४ ॥
राधा कुंकुमपीतांगी हरिपीतपटांचिता ॥ धत्ते द्विगुणतां प्रात: पीततां पश्यतालय: ॥
आनंदयति श्यामां रसिकान्नयनानि स्वधामानि च य: ॥ विस्मापकदामोदरलीलोवतु न: स गोविंद: ॥
इति साहित्यकौमुद्यां परिशिष्टालंकारनिरूपणो नामैकादश: परिच्छेद: ॥ ११ ॥

च.—साहित्यकौमुदीव्याख्यां श्रीकृष्णानंदिनीमिमाम् ॥ कलयंतु कृपावंत: संत: कौतूहलाकुला:
इति साहित्यकौमुदीटीकायां श्रीकृष्णानंदिन्यामेकादश: परिच्छेद: ॥

## २२० काव्यकौस्तुभः-अपूर्णम् ।

आ.—कलाभिर्निभृत: श्रीमान्राधया समलंकृत: ॥ दीव्यत्कुवलय: सोयं विधुर्विजयतेतराम् ॥
प्रारीप्सितस्यास्य शास्त्रस्य काव्यांगत्वकाव्यफलमेव फलमिति तावदाह कीर्त्ति: सार्वज्ञ्यमानंदो धनादीनि च काव्यत: सार्वज्ञ्यं देवमानवादिप्राणिचेष्टावगतिरूपम् आनंदो रसानुभवसमुद्भूत: धनं नृपतिप्रसादलक्ष्या [भ्या] हस्त्यश्वादिसंपत् आदिना धर्मकाममोक्षा: तत्र धर्मो भगवद्वंदनादि:

च.—विप्रोयं सर्पवद्दीप्रो दधिबिंदुनिभो विधु: ॥
अत्र जात्या प्रमाणेन च न्यूनता दीर्घायुर्द्रोणिवरकाको वेणीयं यमुनोपमा अत्र जात्या प्रमाणेन ।— — — —

## २२१ नाटकचंद्रिका-रूपगोस्वामी ।

आ.—वीक्ष्य भरतमुनिशास्त्रं रसपूर्वसुधाकरं च रमणीयम् ॥ लक्षणमतिसंक्षेपाद्विलिख्यते नाटकस्येदम् ॥ १ ॥
नातीवसंगतत्वाद्भरतमुनेर्मतविरोधाच्च ॥ साहित्यदर्पणीया न गृहीता प्रक्रिया प्राय: ॥ २ ॥

व.—प्रायो रसेषु सर्वत्र भारती करुणादिषु ॥

इति ध्वनिप्रस्थानपरमाचार्यार्यगुरुश्रीमद्रूपगोस्वामिविरचिता नाटकचंद्रिका समाप्ता ॥

## २२२ पद्यामृतसरोवरः-लक्ष्मणः ।

आ.—शृंगारो गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे बीभत्सोस्थिभिरुत्फणीति भयकृन्मूर्त्याद्भुतस्तुंगया ॥

रौद्रो दक्षविमर्द्दनेन हसकृन्नग्नः प्रशांतश्चिरादित्थं सर्वरसाश्रयः पशुपतिर्भूयात्सतां भूतये ॥ १ ॥

व.—श्रीमान्काश्यपगोत्रजो बुधवरः श्रीरामचंद्रो ह्यसौ विख्यातो भुवि वर्णनीयविभवस्तस्यात्मजेनाधुना ॥

श्रीमल्लक्ष्मणशर्म्मणा विरचितं पद्यामृताढ्यं सरः प्रीत्यै सांबसदाशिवस्य भवतु श्रीमाधवस्यानिशम् ॥ ७९ ॥

इति श्रीमत्केसवारोपाह्वरामचंद्रसूनुलक्ष्मणविरचिते पद्यामृतसरोवरे वैराग्यकथनं नाम चतुश्चत्वारिंशस्तरंगः ॥ ४४ ॥

## २२३ प्रस्तावचिन्तामणिः-चंद्रचूडः ।

आ.—वर्त्तिं चंद्रकलां शिखां दिनमणिं दीपं सुवर्णाचलं रूपं व्यापकमात्मजस्य सहजं स्यादद्भुतं विस्मयात् ॥

देवक्यानकदुंदुभेरुरुजुषः कृष्णस्य नीराजने चित्रं न्यस्तवदास्थितं दिशतु नः श्रेयांसि कंसे जिते ॥ १ ॥

दोस्तंभस्तंभितेभप्रचलितरदनप्रोच्छलच्छोणितौघप्रच्छिन्नांगोगरागाचित इव समरश्रीसमालिंगितेन ॥

चाणूरं चूर्णयित्वा सममपरपुरीदुंदुभीनां निनादैर्भिंदन्कंसस्य कंठं दिशतु मम मुदं वृष्णिवंशावतंसः ॥ २ ॥

व.—चक्रद्वंद्वसमागमाविघटना रत्नाकरा वर्धिता ध्वस्ताः सर्वतमोगुणाः प्रतिहता नक्षत्रकोटिप्रभा ॥

कीर्त्तिः किं च कुमुद्वती विकसिता जाताः प्रसन्ना दिशः प्रीतिं के प्रतिपेदिरे न विबुधास्तद्बालचंद्रोदये ॥

हरिवंशे कृष्णजन्मनि

ढक्काटंकृतिशंखभोंकृतिमिलद्वीणामृदंगध्वनिक्षिप्तक्षुण्णहरिद्रमार्द्रवसनप्रव्यक्तगोपीस्तनम् ॥

नृत्यत्सुंदरिनंदनंदनसमुत्पत्तौ महामंगलो गोपानां दधिकर्द्दमः समभवद्वृन्दावने गोकुले ॥

राजानो रसिका बुधा बहुविधाः शिष्टा विशिष्टा जना भक्ता भागवताः पृथग्जनशतान्यन्येऽपि ये केचन ॥

शिष्टं वेकर (नाम) मौनिकुलजाच्छृण्वंतु कौतूहलं दुर्गानंदनचंद्रचूडविदुषः प्रस्तावचिंतामणिम् ॥

इति श्रीभट्टपुरुषोत्तमात्मजचंद्रचूडकृते प्रस्तावचिन्तामणौ जातिवर्णनं नाम पंचम उच्छ्वासः ॥

## २२४ मधुकेलिवल्ली-गोवर्धनभट्टः ।

आ.—गोविंददेवपदसेवनभूरितर्षान्वर्षाकरान्निजगुरून्व्रजभावसिन्धोः ॥

प्रेमार्त्तिदातृकरुणानरुणायमानान्स्वीयाप्रबोधकुहरे मुहुरेव वन्दे ॥ १ ॥

होलाकादिवसेषु मञ्जुलरसेष्वादेशतो गोकुलाधीशस्यातुलवत्सलस्य नियमं सन्त्यज्य गोचारणे ॥

निःशङ्कं कुलकन्यकाभिरभितः कुर्वन्कलिं कौतुकी राधागर्वजितो हरिर्विजयते वृन्दाटवीचन्द्रमाः ॥ २ ॥

चित्ते को वितनोति गोकुलयुवद्वन्द्वस्य लोकत्रये वक्तुं चित्रचरित्रमत्र मतिमांस्तर्काचितः पंडितः ॥

श्रीरूपामलपादपद्मयुगलश्रद्धालवेनोन्मदो मन्दो ऽहं रचयाम्यहो विलषितं वृन्दाटवीनाथयोः ॥ ३ ॥
च.–नित्यानंद सनातनामल नवद्वीपाभिराम प्रभो भक्तोद्दामविशालकीर्त्तनरताद्वैतामितानंदद ॥
राधाभावविभावितांतरतनो श्रीरूपचिन्तामणे लक्ष्मीप्राण गदाधर प्रिय हरे विश्वंभर त्राहि नः ॥
कृष्णचैतन्यकारुण्यपुण्यावनीरूपसंदर्भकल्पद्रुमालंबिनी ॥ वेल्लिता पंचभिः पल्लवैर्वर्द्धितां केलिवल्ली सतामालवाले हृदि ॥
इति श्रीमधुकेलिवल्ल्यां राधागोविंदसमागमो नाम पंचमः पल्लवः ॥ ५ ॥

## २२५ रसकल्पद्रुमः-चतुर्भुजः ।

आ.–वंदे तत्किमपि ज्योतिरतिचित्रं चिदात्मये ॥ यत्स्मृतेरेव भूयांसि तमांसि हरति द्रुतम् ॥ १ ॥
आदर्शप्रतिबिम्बवत्त्रिगुणभागुत्पत्तिमध्यात्ययं कुर्वन्निर्विकृतिप्रतीतममलैः सत्त्वेन यद्योगिभिः ॥
आस्ते सन्निहितं स्ववच्छ्रुतिसुधीवाचामगम्यं सदा ज्योतिस्तत्परमं नमामि करणव्यापारपारे स्थितम् ॥ २ ॥
नत्वा गुरूनिष्टदेवान्त्रज्यासारं करोम्यहम् ॥ रसकल्पद्रुमं नाम ग्रन्थं ग्रन्थविदांवरम् ॥ ३ ॥
यद्यपि बुधाः पराभिर्त्रज्याभिर्नामतृप्तिमापन्नाः ॥ आस्वादयन्तु चैनं ग्रन्थं ताम्बूलमिव तथापि ॥ ४ ॥
आद्यः सर्वमहीभुजां प्रतिभटध्वान्तैकधर्म्मद्युती राज्यश्रीनववल्लिवेष्टितभुजस्तम्भद्वयः सद्वयः ॥
अष्टाशाकरिकर्णतालजमरुन्मूर्च्छत्प्रतापानलः क्ष्माभृन्मौलिसुलालिताङ्घ्रिरितमाह्लोलेतिनामाऽभवत् ॥ ५ ॥
त्रिभुवनजनगीतोद्दामचापप्रतापश्चरणकमलनम्रोत्सारितानेकतापः ॥
अजनि करवरोचैर्नीसलरकन्धपीठः सुतनुरसकखानः सूनुरस्मात्क्षतारिः ॥ ६ ॥
यद्दानन्तु जगत्प्रसिद्धमभवद्राज्यानि यद्याचका राजानः सुलतानशाहसदृशा ये चापरे मानिनः ॥
यद्भृत्याश्च नृपा नृपास्त्वनुचरा यस्य प्रतापो रविश्चन्द्रो यस्य यशोऽभ्युदेस्यसकखानासीद्गुणैः सोऽद्भुतः ॥ ७ ॥
अस्ति स्वस्तिकरः समस्तजगतीवास्तव्यलोकस्य यो ध्वस्ता त्रस्तसपत्नमस्तकभरो लक्ष्म्यातिवास्तोष्पतिः ॥
शस्तस्तुत्ययशा निरस्ततिमिरस्तोमो मनस्तस्ततः शास्तास्तखाननृपो विहस्तमतिभृच्छस्त्रास्त्रशास्त्रार्णवे ॥ ८ ॥
जानामि दानाय सुवर्णशैलं स्तवाय तावद्वचनानि वेधाः ॥ शायस्तखानस्य यशःप्रतापसमाय सोमद्युमणी ससर्ज्ज ॥ ९ ॥
तस्यानुरञ्जनायैव ग्रन्थं नवरसात्मकम् ॥ चतुर्भुजो रचयति स्वपद्यैश्च परैरपि ॥ १० ॥
अथाऽनुक्रमणीं कुर्वे रसकल्पद्रुमे बुधैः ॥ आदौ देवस्तुतिर्ज्ञेया शृङ्गारे तदनन्तरम् ॥ ११ ॥
सामान्यके कामनीनां वयःसन्धिषुभाषितुम् [सन्धिसुभाषितम्] ॥ स्त्रियाः सामग्र्यशंसा च प्रत्यङ्गानां निरूपणम् ॥ १२ ॥
ततो वियोगशृङ्गारे प्रियप्रस्थानमन्दिरम् ॥ प्रियं प्रति प्रियावाक्यं विरहिण्याश्च वर्णनम् ॥ १३ ॥
परस्परं पत्रलेखः सखीवाक्यं प्रियं प्रति ॥ नायिकायां सखीवाक्यं दूत्यां कान्तावचस्ततः ॥ १४ ॥
नायिकं प्रति मित्रोक्तिस्ततो विरहवर्णनम् ॥ अथ संयोगसंस्कारे दम्पत्योरवलोकनम् ॥ १५ ॥
ज्ञेयं कतिपयैः श्लोकैः खण्डितावर्णनं ततः ॥ ततस्तु मानकथनं प्रसादस्तदनन्तरम् ॥ १६ ॥
अथाऽभिसारकथनं ततस्सूर्यास्तवर्णनम् ॥ सन्ध्याया वर्णनं तद्वच्चक्राख्यानमतः परम् ॥ १७ ॥
तमसो वर्णनं तद्वच्चन्द्रोदयसुभाषितम् ॥ ततः सुरतशंसा च प्रियवाक्यं प्रियां प्रति ॥ १८ ॥

प्रियं प्रति प्रियावाक्यं विज्ञेयं तदनन्तरम् ॥ नवोढासुरतक्रीडा ततः सुरतवर्णनम् ॥ १९ ॥
विपरीतरतं ज्ञेयं सुरतान्तसुभाषितम् ॥ प्रभातवर्णनमथ शृङ्गारो मिश्रितस्ततः ॥ २० ॥
दम्पत्योः प्रीतिकथनं कुलस्त्रीणां निरूपणम् ॥ असतीवर्णनं ज्ञेयं स्वयंदूती ततः स्मृता ॥ २१ ॥
ऋतूनां वर्णनं ज्ञेयमथ वीररसक्रमः ॥ नृपाणां वर्णनं ज्ञानप्रयाणारिपलायनम् ॥ २२ ॥
हयमन्दिरशंसा च नीतिर्ज्ञेया बुधैस्ततः ॥ अथ हास्यरसः ख्यातो दुर्जनस्य विगर्हणा ॥ २३ ॥
कुकवेरपि निन्दा च ज्ञेयोऽद्भुतरसस्ततः ॥ गुणप्रशंसा तत्रैव सत्कवेः कथनं ततः ॥ २४ ॥
सुभाषितप्रशंसा च ततस्तु करुणारसः ॥ रसो भयानकस्तद्वद्बीभत्सरसवर्णनम् ॥ २५ ॥
तत्र याचकदारिद्र्यकृपणानां विगर्हणा ॥ अथ रौद्ररसो ज्ञेयस्ततश्शान्तरसः स्मृतः ॥ २६ ॥
दैवाख्यानं ततः प्रोक्तं सज्जनानां प्रशंसनम् ॥ अथ संसर्गशंसा च सङ्कीर्णाख्यानकं ततः ॥ २७ ॥
अथाऽन्योक्तिरलङ्कारो बुधैरिह विभाव्यताम् ॥ एवं प्रस्तावसङ्ख्या तु पञ्चषष्टिप्रमाणिका ॥ २८ ॥
श्लोकैः सहस्रसंख्याकैर्जातो ग्रन्थो ह्ययं शुभः ॥ बाणाशर्षिशशांकाङ्के वैशाखे पूर्णिमागुरौ ॥
क्षिप्तो हस्तावलग्नः प्रसभमभिहितोऽप्याददानोंशुकान्तं गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ॥
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥ ३० ॥
च.—यन्नाद्दतरस्त्वमलिना मलिनाशयेन किं तेन चम्पक विषादमुरीकरोषि ॥
विश्वाभिरामनवनीरदनीलवेषाः केशाः कुशेशयदृशां कुशलीभवन्तु ॥

## तत्रैव प्रायोऽप्रसिद्धकविनामानि तत्पद्यानि च यथा ॥

| | |
|---|---|
| अचलरुद्रस्य | पाणौ पद्मधिया |
| अनिरुद्धस्य | यूथिययौचित—<br>कमलिनीवन— |
| अविलम्बस्य | ममैव लोचनेव—<br>यदि प्राणा एव |
| ईश्वरदासस्य | वस्त्राकर्षणसं— |
| उग्रग्राहस्य | किं कार्यं प्रतिबोधने |
| कंसनारायणस्य | अधरेक्षणयोः कांत्या<br>बाले तवाधरसुधा—<br>एतदेवं मम पुण्यं |
| कवीन्द्रस्य | दृष्टोयं यदि पू— |
| कुञ्जकुटीरस्य | श्रीकृष्ण तव<br>मुनिर्जयति<br>कस्मै किं कथनीयं |
| कुलपतेः | नारब्धं स्तनपरि—<br>सौमित्रिर्वदति |
| कृष्णानन्दमिश्रस्य | द्राक्षारूक्षैव<br>महिमामहोन्नत— |
| गदाधरस्य | चलद्बलाकादशन— |
| गौडयादवस्य | जन्मावधितनु— |
| जगन्मणे राज्ञः | वनमाली वियोगेव |
| ढक्कारावस्य | देवत्वं पुरुषोत्तम— |
| दशावधानस्य | मत्तं मयूरैश्चकितं |
| ध्रनदेवस्य | धिक्तस्य मंद— |
| नवीनकवीन्द्रस्य | आयासि यासि द— |
| नाथमिश्रस्य | लतां पुष्पवतीं<br>हेमांभोरुहप—<br>दक्षिणवातकपोत—<br>सुखयति दोषा—<br>मध्याह्ने नूनमापोपि<br>निष्कंपास्तरवो |
| पञ्चाननस्य | मध्याह्ने हरितो |

| | |
|---|---|
| परशुरामस्य | सुधारसो धातुः |
| भारतीकवेः | अंगुल्या कः कपाटं<br>कोयं द्वारि हरिः<br>कस्त्वं शूली मृगय |
| भूपतिमिश्रस्य | कुचकुंभांतरे<br>काचित्कराभ्यां कु— |
| मण्डनस्य | एवमेवासि वामाक्षि |
| मतेः | दक्षिणवातः कपोतः<br>किमयं कालिमा<br>नाधराद्विगलिता<br>पाणिभ्यां चल<br>परिचितरसना |
| मधुरवल्लेः | रक्ताशोककृशोदरी—<br>दुर्जनविभव—<br>बधिरस्येव शु—<br>दिव्यचक्षुरहं<br>मित्र तत्रभवता<br>निःक्षिप्तं कबरी—<br>कुवलयनयना |
| महामनुष्यस्य | कारणोत्पन्नकोपे |
| मोहनमिश्रस्य | यद्दोर्दोर्लक्ष्मीस्ते |
| रघुपतेः | घनतरघन— |
| रन्तिदेवस्य | कर्पूरमुपहसंती<br>किरणलहरीभिः |
| रामचन्द्रसरस्वत्याः | पश्चादुपागत्य मया<br>प्रासादे सा दिशि २<br>भग्नं धनुः पुरभिदो<br>अकस्मादागारे |
| रामरामस्य | मा कदापि भवनात्<br>मां लक्ष्य दर्शनोत्कंठा<br>काचिन्नृपार्ता वनिता<br>न प्रेम मन्ये प्रचुरं<br>हेमकुंभमिव तुंग—<br>मयि प्रभातप्रतिकूल—<br>अलसयति गात्रं |

| | |
|---|---|
| रुचेः | आश्लेषशेषा रतिः<br>सुरतव्यत्ययसमये<br>बालचन्द्ररुचिरं<br>संवरणाय वधूटी |
| लक्ष्म्यायाः | अयमहो रजनी— |
| वसन्तस्य | पुलकितकठोर—<br>न्यस्तानि शंख—<br>गम्भीरनीरस्थित—<br>उत्पन्नो घटचक्र— |
| वाणीरसालस्य | रूपे मदनसमानो |
| वाहिनीपतेः | अस्मद्विघूर्णामनिला—<br>अस्वाध्यायः पिकानां |
| विश्वंभरस्य | आयातः शरदाहो |
| विद्यायाः | अन्यासु तासु |
| विद्यानिधेः | समुत्कीर्णे तन्व्या |
| शालाखानस्य | करान्प्रसार्य—<br>वस्तुतः शुद्ध आत्मा<br>गंतव्यान्नाविक—<br>किंशुकव्याजतो<br>नीरादेव जनुः<br>क्षारांबुमधु— |
| संजयाकविराजस्य | असंमुखालोकन— |
| सर्वदासस्य | प्रावृड्वधू—<br>अंबरं स्तिमित—<br>शीलादिव संत्रस्तं |
| स्वस्थानमिश्रस्य | सितं वसनमर्पितं<br>मनस्विनि तपस्विनी<br>मंदं निधेहि चरणौ<br>द्वित्रैः केलिसरोरुहं<br>अनाहूतैर्वैरस्य |
| हरिपतिभट्टस्य | कविर्वाचस्पतिः |
| होरीन्द्रस्य | जनसदसि तयाव—<br>अपूर्वं चौर्यमभ्यस्तं<br>इह केन कुले |

## २२६ रसतरङ्गिण्याष्टीका-सेतुप्रबन्धः-जीवराजः ।

-अखंडानंदांगः कथमपि न निर्वासनधियां परिच्छेद्यो वेद्यः परमुपनिषद्भागनिवहैः ॥
अपि प्रादुर्भावे सति जगति यः स्वात्ममबिकद्रसोऽयं ब्रह्मात्मा भुवि भवतु भव्याय भवताम् ॥ १ ॥
व्रजराजसूरिजन्माप्यधिगततन्मात्रचिंतनाचिदालिः ॥ कश्चिज्जीवराजशर्मा निर्माति तरंगिणीसेतुम् ॥ २ ॥
ये शीलयिष्यंति समाहितात्मना सेतुप्रबंधाख्यमदीयटिप्पणम् ॥
ते संतरिष्यंति विनापि च श्रमैः संतस्ततो भानुतरंगिणीरसात् ॥ ३ ॥
संतः परेषां गुणजालगृध्नवो बद्धास्ततो मोचयितुं निजात्मनः ॥
न शक्नुवंति स्म बलेन यंत्रिता शिचा निपक्ता इव केकिपत्रिणः ॥ ४ ॥
सगुणं प्रतिखंडयंत आरात्प्रयतंते ननु निर्गुणाभिपत्त्यै ॥ सुधियोप्यतथापि तानजस्त्रं सगुणानेव भजंत्यहो विचित्रम् ॥५॥
गुणिनं भजतश्चिरादुरोजौ गुणिनं चैव तनू नितंबबिंबम् ॥ जघनं च तमेव तेन मन्ये गुरवो वै गुणिनं भजंत्यजस्त्रम् ॥६॥
ईर्ष्यालवो येन्यदुराग्रहेण न संगृहीष्यंति मदीयसेतुम् ॥ यास्यंत्यमी तत्त्वविवेकवंचनां बुधा महालंकरणैरिव द्विपाः ॥ ७ ॥
ये केपि वै मूढधियो हि मामकं सेतुप्रबंधं विदुषां विनोदनम् ॥
संभावयिष्यंति न जातु किं ततः क्लीबोज्झिता नैति विगीतिमंगना ॥ ८ ॥
सेतुं परित्यज्य विमूढबुद्धयो नौकादिभिः क्षुद्रविसारसाधनैः ॥
तर्तुं समिच्छंति यतंति चापि ये चक्षुष्मदंधा इति तेपि मे मतिः ॥ ९ ॥
इमां बत तरंगिणीं रसमयीं गभीरांतरां दुरंतविषयाभिधैरथ तिमिंगिलैः संकुलाम् ॥
वृतां विविधसंशयैर्विषधरैर्विना सेतुना कथं बुधमतं राजाः [बुधमतंगजाः] प्रतितरंतु नौकाशतैः ॥ १० ॥

## २२७ रसतरङ्गिणीटीका-रसिकरञ्जिनी-वेणीदत्तः ।

-नमो नवतमःस्तोमतोमरोत्तमकांतये ॥
-श्रीमन्नारायणातपत्र [श्रीनारायणतातपुत्र] नृहरेर्भक्तो धरामंडले विसमृत्तो [विख्यातो] महिदासभट्ट इति यस्ततसृज-न्यात्मज [यस्तस्यायमप्यात्मजः] वेणीदत्तकवींद्रशेखरवरः सत्तर्कवागीश्वरस्तस्येयं कृतिरुज्ज्वला वितनुतां मोदं सतां सर्वदा ॥ ३ ॥
इति श्रीतर्कवागीशभट्टाचार्यवेणीदत्तकृता रसतरंगिणीव्याख्या रसिकरंजिनी समाप्ता ॥

## २२८ रसप्रदीपः-प्रभाकरः ।

-स्वबिंबमबाकुचक्र [मंबाकुचकुं] भंबिंबे विलोकमानं प्रतिलोकमानम् ॥
प्रचंड षुं[शुं]डं परितः क्षिपतं हेरंबमालंबनमाश्र यभृः [यामः] ॥ १ ॥
कलयतु कल्याणचयं रघुकुलतिलकः कुलोपास्यः ॥ व्य [य] स्य प्रसादलेशात्कपिभिर कुपर [कूपार] लंघनं विहितम् ॥२॥
पुरतः प्रविलोक्य भग्नचापं परतः कामपि कामकार्मुकज्याम् ॥

पुलकांचितपीनबाहुदंडं रघुबालं कलये दशास्यकालम् ॥ ३ ॥
गुरुतरदुरितौघं द्रमये [ध्वंसये] दिदिरेशस्तदनु दरममंदं मंदयेदंधकारि: ॥
तदनु मतिमनल्पां कल्पयेत्कल्पवल्ली भजनपरजनानां सारदा सारदा न: ॥ ४ ॥
अभूत्कुलकनंदन: प्रथितवंशदुग्धांबुधौ सुधाकर इवाकर: किल कला (कला) परस्य य: ॥
रमारमणभावनो भुवनविदुवृंदारक वृजृध्वजृभु [वृषध्वज] पुरंदरो विबुधभट्टरामेश्वर: ॥ ५ ॥
तस्मादजायत जगत्रयगीतकीर्तै: श्रीभट्टमाधवबुधो बुधवृंदवंद्य: ॥
सद्य: समुद्यदनवद्यसगद्यविद्याविद्योतमानधिषणो धिषणोपमेय: ॥ ६ ॥
सहस्रेणास्यानां फणिपतिरभूद्येन न समं यदा वक्तुं शक्तस्तदवधि स पातालमभजत् ॥
पराभूतेर्भीत: सरसिजभवस्तिष्ठति ततो निलीन: कंसारेर्गहनतरनाभीसरसिजे ॥ ७ ॥
भाट्टे भट्ट इवापर: कणभुज: शास्त्रे कणाद: स्वयं साक्षादक्षपदो मतेक्षचरण: पातंजले प्रांजल: ॥
ख्यात: सांख्यमते चिरं गुरुमते सिद्धांतदीक्षागुरुर्ज्यायांस्तत्तनुजो विभाति भुवने श्रीविश्वनाथ: कृत: [ती] ॥ ८ ॥
तत: कनीयान्रघुनाथनामा विद्वत्सु वंद्योस्य सुतश्चकास्ति ॥ तत: कनीयानहमस्मि जात: प्रभाकरो राघवपादसेव: ॥ ९ ॥
विश्वनाथचरणांबुजभक्ति प्रदा [प्राप्त] सन्मतिरुमापतिभक्त: ॥
चापलेन तनेवे [तनुते] रसिकानां प्रीतये किमपि कौतुकमेतत् ॥ १० ॥
श्रीविश्वनाथविबुधास्यसुधांशुभिर्यद्वाणीसुधाभिरभित: सुचिरं प्रासिक्ते ॥
न स्यात्कथं सरसचंद्रकता च चंद्रकांताश्मवन्मम कठोरतरेपि चित्ते ॥ ११ ॥
करवाणि वाणि तवपादपंकजप्रणतिं शिरोनिहितपाणि चारुणि ॥
रुचिरां चिरन्मयि निवेहि देवि तामममृतप्रवाहमधुरां वचोभुराम् ॥ १२ ॥
प्रवृत्तो उग्राहि [दुर्ग्राहं] ध्वनिरसविचारार्णवमहं विगाढुं यन्मूढस्तदिह सुमहासाहसविधौ ॥
निराधारस्याराद भिमतविधौ काल्पलतिका जगन्मातस्त्वावृन्तचरणांचिते च [तस्तावत्तवचरणांचैतव] शरणम् ॥ १३ ॥
अश्रुतेपीह साहित्यदर्शने साहसं मम ॥ निर्वाहयंतु निपुणा गुरुपादरज:कणा: ॥ १४ ॥
ग्रंथांतराद्विशेषो य: स्यादस्मिन्नसौ तु गुणगृद्ध्ये ॥ अवधार्यतां रसज्ञैरज्ञैरितरैर्नरैर्मम किम् ॥ १५ ॥

इह तावत्काव्यस्यानेकप्रयोजनप्रयोजकत्वेपि रससंवेदनजन्यं सुखमेव मुख्यं प्रयोजनं तत्र च जातिविशेष: स्वर्गादि वदहृष्टयोगीकार्य: रससंवित्तिश्च पटुतरश्रवणादिवासनासंस्कृतचेतसां योगिनां परमात्मसंवित्तिरिव तत्तदंगविद्याभ्या साहितवासनासंस्कृतमनसां सहृदयानामेव भवतीत्यत्रानुभव एव प्रमाणं तत्र तावद्रस: काव्यात्प्रतीयत इति काव्य लक्षणं निरूप्यते । तच्च तददोषौ क्वापीति प्रश [सूत्र] कारेणोक्तं तत्रैतद्विचार्यते ।
अदोषावित्यनेन यत्किंचिद्दोषाभावो विवक्षित: यावद्दोषाभावो वा

ब.—विस्तरेण चेयं वृत्तिरस्माभिरलंकाररहस्ये प्रसाधितेत्युपरम्यते इति शिवम् ॥
श्रीमत्पुरारिपुरभेदनवासपूतश्रीरामचंद्रपदसारसचंचरीक: ॥
श्रीविश्वनाथविबुधप्रतिपन्नविद्य: श्रीमान्प्रभाकर इमं व्यतनोत्प्रबंधम् ॥ १ ॥
भवतु कृतिरियं विदेहपुत्रीपरिवृढपादपयोजयोर्मदीया ॥

कठिनविपिनभूमिरेणुखेदक्षपणपटुः सरसामृतोर्मिधारा ॥ २ ॥
व्योमाकूपारभूमीशगणिते खरवत्सरे ॥ एकोनविंशवर्षेण प्रबंधोयं कृतो मया ॥ ३ ॥
दोषापहाररुचिरो विमलो रससंचितः कोपि ॥ विलसतु रसप्रदीपो यावत्कल्पं जगत्त्रितये ॥ ४ ॥
इति श्रीमद्विद्वद्वृंदारकवृंदवंदनीयपादारविंदद्वंद्वभूसुरपुरंदरजगद्गुरुमहामहोपाध्यायभट्टमाधवतनूजनिभट्टभट्टारकोन्नीते रसप्रदीपे व्यंजनानिरूपणं नाम तृतीयालोकः ॥ समाप्तोयं ग्रंथः ॥

## २२९ वृत्तिवार्त्तिकम् ।

आ.–विश्वं प्रकाशयंतो व्यापारैर्लक्षणाभिधाध्वनितैः ॥ नयनैरिव हरमूर्त्तिर्विबुधोपास्या सरस्वती जयति ॥ १ ॥
वृत्तयः काव्यसरणावलंकारप्रबंधभूमिः ॥ अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ॥ २ ॥
तत्र क्वचित्क्वचिद्वृद्धैर्विशेषा न स्फुटीकृताः ॥ नतिष्टं [स्पष्टं] कथितुमस्माभिः क्रियते वृत्तिवार्तिकम् ॥ ३ ॥
तत्र शक्त्या प्रतिपादकत्वमभिधा सा च त्रिधा

अं.–क्वचिदपि सारोपलक्षणा न स्यादिति वाच्यम् इष्टापत्तेः ॥
इति वृत्तिवार्तिके लक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः ॥ २ ॥

## २३० शृंगारमाला-सुखलालमिश्रः ।

आ.–अरुणिमरविनखचंद्रं पावकभौमं बुधमणिभिः ॥ सुरुचिसुमहिमगुरुकविवंद्यं मंदगमवतु पदपंकजं देव्याः ॥ १ ॥

अं.–संसारसर्पमुखमर्दनतार्क्ष्यरूपा विज्ञानतापटलपाटितमोहकूपाः ॥
येषां कटाक्षकलिताः फलिता लसंति गंगेशमिश्रगुरवः सततं जयंति ॥ ३३ ॥
अथ कविवंशवर्णनम् ॥ यनीपप्रस्थात्य [वनीपकस्थात्] रतस्तु मार्गो षट्क्रोशमध्ये हि घटोत्कचस्य ॥
ग्रामो घरौंडेति प्रसिद्धनामा पूर्वं स्थितास्तत्र पुरा मदीयाः ॥ ३४ ॥
श्रीविष्णुदत्तः स्वकुलाब्जभानुर्नारायणस्तत्तनुजो बभूव ॥ कौशल्यगोत्रो यजुषामधीती माध्यंदिनीयो द्विजगौडजोसी ॥ ३५ ॥
तस्यात्मजोस्मादगमत्तु काश्यां षड्दर्शनी वैरिमपुत्रमंत्री ॥ दामोदरो वैद्यकग्रंथकर्ता श्रीरामकृष्णस्तदपत्यमासीत् ॥ ३६ ॥
तुलसीमाधवगंगारामाख्यास्तत्तनूद्भवाश्चासन् ॥ माधवरामसुपुत्रो हृदयराम इति सुगीयते तनुजैः ॥ ३७ ॥
साहित्यं रसग्रंथकृद्बुधवरस्तस्यांगजातः कविर्बाबूराय इति प्रसिद्धिमगमद्वासी पुरे चार्गले ॥
तत्पुत्रेण मया कृता रसमयी माला रसोपासका जप्ता प्रापयितुं गुणैरपि युता कल्पा रसब्रह्मणि ॥ ३८ ॥
सुखलालेन सुकविना रचिता शृंगारमणिमयी माला ॥ कंठे सा रसिकानां सगुणसुवर्णा विलासमातनुताम् ॥ ३९ ॥
सुधांशुव्योमवर्स्विदौ वर्षे ज्येष्ठासिते रसे ॥ शुभा शृंगारमालेयं रविपुष्ये सुगुंफिता ॥ ४० ॥
इति श्रीमत्साहित्यशास्त्रानुभवरसिकगौडविप्रवरबाबूरायमिश्रसूनुसुखलालमिश्रेण विरचितायां शृंगारमालायां संकीर्णवर्णनं नाम तृतीयं विरचनम् ॥ ३ ॥

## २३१ शृंगारमण्डनम्-विठ्ठलेश्वरः ।

आ.—कयया कयय स्वामिन्यामे कथं [स्वामिन्कथं] वै नवसंगमः—

च.—इति श्रीमद्गोपीजनचरणपंकेरुहयुगानुयुगाभिख्यप्रेमामृतजलधिमग्नाभिरानशम् ॥
बभूवेदं पूर्णं स्मितजितसुधाभिर्विरचितं निकुंजे शृङ्गाराभिधरसवरे मंडनमिदम् ॥
इति श्रीविठ्ठलेश्वरविरचिते शृङ्गारमंडने दशम उल्लासः ॥

## २३२ शृंगारसरसी-भावमिश्रः ।

आ.—गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारम् ॥ गुरुमवगमनप्रदमिष्टकरीमिष्टदेवतां वंदे ॥ १ ॥

च.—चंद्रश्चारुमरीचिवीचिनिचयैर्यावापृथिव्योस्तमःस्तोमं हंत समस्तमस्तमनयत्तद्रोदसी राजते ॥
मन्ये वारिधरावरोधवियदुन्मुक्तं शरत्पूर्णिमाचंद्रं चुंबितमृक्षमौक्तिकगणैर्वृद्धो हि दुग्धोदधिः ॥
इति श्रीभावमिश्रकविविरचितशृंगारसरसी संपूर्णा ॥

## २३३ शृंगारामृतलहरी-सामराजदीक्षितः ।

आ.—सिंधुसुताकुचकुंकुमपाटलवक्षःस्थलं किमपि ॥ उपवीणितं च निगमैः सटाजटालं महः कलये ॥ १ ॥
नरहरिबिंदुपुरंदरजनुषा विदुषाय सामराजेन ॥ शृंगारामृतलहरी विरच्यते रसिकजीवातुः ॥ २ ॥

च.—अनुभावव्यभिचारिभावाश्च ग्रंथांतरेषूह्याः इह ग्रंथगौरवान्न लिखिताः ॥
इति श्रीकविकुलतिलकनरहरिबिंदुपुरंदरकुलोत्तंसश्रीसामराजदीक्षितविरचिता शृंगारामृतलहरी संपूर्णा ॥

## २३४ सरस्वतीकण्ठाभरणविवरणम्-जगद्धरः ।

आ.—इदानीमुभयालंकारविवेचनाय चतुर्थं परिच्छेदमारभते शब्देभ्य इति धातूभयालंक्रियास्त्विवादिभ्यः शब्देभ्यो विशिष्ट उपमादिरूपोऽर्थो ज्ञाप्यते ता उभयालंक्रियाः स्युः

च.—चतुर्विंशतिरिति इत्यनेन प्रकारेण चतुर्विंशतिरेता उपमादयः काव्यालंकृतय उक्ता इत्यन्वयः अजहल्लिंगतात्र । उभयेति शब्दार्थाश्रिता इत्यर्थः ॥
रत्नं रत्नधरोऽजनिष्ट गुणिनामाद्योऽनवद्यः सतां सा शुद्धा दमयंतिकापि सुषुवे नैयायिकं यं सुतम् ॥
तस्य श्रीशजगद्धरस्य कविनुर्वाणीगुणालंकृतेष्टीकायामुभयप्रकाशनपरिच्छेदश्चतुर्थो गतः ॥
इति महामहोपाध्यायधर्म्माधिकरणिकश्रीजगद्धरविरचिते सरस्वतीकंठाभरणविवरणे चतुर्थः परिच्छेदः

## २३५ साहित्यसुधासिन्धुः-विश्वनाथः ।

आ.—उत्तालतालस्फुरदंघ्रिपातप्रजातपातालभुजंगकंपम् ॥ अभ्रांतविभ्रांतकपर्दजालविस्तरततालं कलये नटं तम् ॥ १ ॥
उत्तालांघ्रिप्रपातस्फुटितवसुमतीरंध्रनीरंध्रनिर्यत्पातालांभःस्रवंतीस्नपनसिमिसिमाकारिलालाटनेत्रम् ॥

ऊर्ध्वव्याधूतभोगीश्वरवररचितायासनिश्वासरिंगद्गंगाकल्लोलजालं कलयतु विभवं धूर्जटेर्नाट्यलीला ॥ २ ॥
चंद्रचूडप्रियापांगसंदोहानंदनिर्भरः ॥ विदधाति कविः कोपि सुधासिंधुं तरंगितम् ॥ ३ ॥
इह खलु सामाजिकपरीक्षितमेव काव्यं स्वर्गापवर्गादिजनकमिति तत्परीक्षार्थमयमारंभः । अत एवोक्तं काव्यप्रकाशे काव्यं यशसे इति । अत एवान्यत्र अदोषं गुणवत्काव्यमलंकारैरलंकृतम् ॥ रसान्वितं कविः कुर्वन् कीर्तिं स्वर्गं च विंदतीति तत्रादौ काव्यस्य लक्षणमाह ॥ जायते परमानंदो ब्रह्मानंदसहोदरः ॥ यस्य श्रवणमात्रेण तद्वाक्यं काव्यमुच्यते ॥
च.–उत्प्रेक्षायां ध्रुवादय एव शब्दाः संभावनं वक्तुमर्हंति न तु यथाशब्दोपि । तत्र तदुपादानं दोषः । उदाहरणं स्वयमवधेयम् । समाप्तमिदं काव्यलक्षणमित्यलं पल्लवितेन ।
यावत्पाटीरपंकद्रवमधुरसुधापूरसेकैस्त्रिलोकीमुच्चैः प्रीणाति विप्रप्रणतिनुतपदः पार्वणः शीतभानुः ॥
वेगादंभोजजृंभावितरणरसिका भानवो भांति यद्वद्भानोस्तावद्विधत्तामयमपि च सुधासिंधुरानंदकंदम् ॥
घूर्णल्लोचनमुच्छलद्विहसितं प्रभ्रष्टसीरं ललल्लालाजालमकालरोषमुदयन्निद्रामनिद्रश्रियम् ॥
जृंभारंभमिलन्मिलिंदपटलीवर्माविचाराकुलं कालिंदीजलकेलिलंपटमहं तालांकमेकं भजे ॥
मौलौ गंगांबुधाराकुवलयपटलीमंडिता शूलपाणेः कौंटीभृंगीकदंबव्यतिकरमधुरा मालिका कंधरायाम् ॥
कर्पूरक्षोदचंचन्मृगमदपटलीपंकसंकाशमूर्तिर्वक्षःपीठे पतंती क्षितिधरतनयानेत्रशोभावताद्वः ॥
आस्ते धारासुराख्यं नगरमतिलसत्केशवोद्दामधामप्रभ्राजत्कीर्त्तिपूरं विलसति स विधुर्यस्य गोदावरी सा ॥
तत्रस्योऽनंतदेवात्मज इह वसतिं मुक्तिपुर्य्यां स चक्रे [त्रिमल्लश्चक्रे] तस्यांगजस्योल्लसति कृतिरियं विश्वनाथाभिधस्य ॥
प्रबलकर्कशतर्कविचारणोल्लसितकाव्यसुलक्षणलक्षिता ॥ त्रिमरदेवतनूजविलासिनां मतिमतां वितनोतु मनोमुदम् ॥
इति श्रीत्रिमल्लदेवतनयविश्वनाथविरचिते साहित्यसुधासिंधौ अर्था – – – – – – नामाष्टमस्तरंगः ॥ समाप्तोयं ग्रंथः ॥ कृतिरयं विश्वनाथस्य ॥
कीर्तिशेषं गते तैस्तैर्गुणैर्विक्रमभूभुजि ॥ ग्रहांभोधिरसज्योतिर्मिते संवत्सरक्रमे ॥ १ ॥
एकादश्यां गुरौ स्वीयः सुधासिंधुर्विलेखितः ॥ पत्तने चंद्रचूडस्य विश्वनाथेन धीमता ॥ २ ॥

## २३६ काव्यलक्ष्मीप्रकाशः-शिवरामः ।

आ.–यद्भालनेत्रशोभाप्त्यै गोपीचन्दननिर्मितम् ॥ स्वीचक्रे तिलकं कृष्णः स मां पातु त्रिलोचनः ॥ १ ॥
च.–काव्यानि पंच नुतयोपि च पंचसंख्याः टीकाश्च सप्तदश चैक उणादिकोशः ॥
भूपालभूषणमथो रसरत्नहारो विद्याविलास इत [ति] पूर्वसरत्नलाद्याः [द्यः–] ॥ २ ॥
ग्रंथान्मया विरचितान्परिशीलयंतु शीलान्विताः सुमनसो [मनसो] मुदे मे ॥
यद्वद्विशोधितमनल्परुचा समेतं जांबूनदं भवति मूल्यविशेषलभ्यम् ॥ २१ ॥
परिश्रमो व्याकरणे काव्यादावपि यः कृतः ॥ सव्या [सा] दिगियं तस्य शिवरामेण दर्शिता ॥ २२ ॥
इति श्रीशिवरामकृतिः काव्यलक्ष्मीप्रकाशः संपूर्णः ॥

## २३७ छन्दःकौस्तुभः सभाष्यः-मू०-राधादामोदरः-भा०-विद्याभूषणः ।

मू. आ.–छन्दोभिर्विततांङ्गः कवयो यस्यानुकीर्तयन्ति गुणान् ॥ स जयति गोकुलवनिताजितान्तरः श्यामसुन्दरो भगवान् ॥ १ ॥
भा. भा.–अर्चितनयनानन्दो राधादामोदरो गुरुर्जीयात् ॥ विवृणोमि यस्य कृपया छन्दःकौस्तुभमहं मितवाक् ॥ १ ॥

22

मू. च.—द्विजकुलतिलकः श्रीमान्राधादामोदरो हरेः प्रेष्ठः ॥ स्वर्णैः सूत्रैर्ग्रथितं छन्दःकौस्तुभमिमं व्यतनोत् ॥ १४ ॥
वेदर्तुपक्षसङ्ख्याताश्छन्दसां वृत्तयोत्र याः ॥ लिखिताः सन्ति ताः सन्तः कलयन्तु कृपाकुलाः ॥ १५ ॥
भा. च.—श्रीराधादामोदरशिष्यो विद्या (दि) भूषणो नाम्ना ॥ छन्दःकौस्तुभशास्त्रे भाष्यमिदं सम्प्रति व्यदधात् ॥ १६ ॥
इति श्रीविद्याभूषणविरचिते छन्दःकौस्तुभभाष्ये मात्राप्रस्तारविवरणं नवमी प्रभा ॥ समाप्तोयं ग्रन्थः ॥ १७ ॥

## २३८ छन्दःपीयूषः-जगन्नाथः ।

आ.—न्यायव्याकरणादिशास्त्रमखिलं संक्षुण्णमेवास्ति हि प्रायः प्राक्तननूतनैः सुकृतिभिश्छन्दस्तु नैवेत्यतः ॥
श्रीकण्ठस्मरणादवाप्य सुमतिं प्रीत्यै मया धीमतां त्सू [ यत्सू ] त्रं गुरु तत्कृतं लघु पुनस्तस्याथ सारं ब्रुवे ॥ १ ॥
सालङ्कारगुणं विदोषमपि यच्छब्दार्थयुग्मं बुधास्तत्काव्यं यश अघ [आद्य] नेकफलकं कार्यं तं [तया] धीमताम् ॥
छन्दःशास्त्रनिबंधना खलु भवेत्तत्रोपयुक्ता यतिच्छन्दोभङ्गविहीनवाक्यरचनानेकप्रकारप्रथा ॥ २ ॥
सूत्रं संग्रहवाक्यमात्रमिह वै कर्तुं न कः शक्नुयात्तस्मिल्लाघवतोनुवृत्तिरचना स्पष्टा परं कौशलम् ॥
मात्सर्यं परिहाय तत्सुमतिभिर्द्रष्टव्यमत्रादरात्तच्चाप्यन्तरनुप्रविश्य विपुलस्यार्थस्य यद्वर्णनम् ॥ ३ ॥
शुद्धस्वानुभवप्रसिद्धविषयेप्येतन्मुनिर्नात्रवीदेतद्वै मुनिरत्रवीदिति जडाः शुद्धा निबद्धाग्रहाः ॥
स्युः पञ्च द्विगुणा दशेति कथने किं मुन्यमुन्योर्भिदा यः सद्वस्तु वदेत्तमेव सुमतिं विज्ञा मुनिं मन्वते ॥ ४ ॥
ज्ञाता दानदयादमा निजनिजाभिप्रायसादायकात्प्राजापत्यवरैर्नरासुरैः [सुरवरैः] स्रष्टुर्दमोत्रोक्तितः ॥
तस्मात्स्वाशयपाशवर्त्तिनि जने कस्मै किमाख्यायतां बालक्रीडनतो जगज्जनयिता तुष्येन्मनुष्येषु कः ॥ ५ ॥
पूर्वाचार्यकृतच्छंदःशास्त्रेणापरितुष्यन्मिश्रजगन्नाथस्तत्सूत्राणि प्राणैषीत् । तत्रेदमादिमं शास्त्रारम्भसूत्रं प्रेक्षावतः प्रवर्त्तयितुम् ॥
अयच्छन्दोनुशासनम् ॥
च.—शिष्टप्रयुक्तं यदतिप्रसिद्धं छंदश्च वृत्तं च तदुक्तमत्र ॥ ग्रन्थस्य भीत्या बहुवस्तिरस्य कृतो हि सोन्यत्र तदिच्छुतुष्टये ॥ १ ॥
श्रीरामं तनयं यमिष्टविनयं विद्याधरस्यात्मजाल्लेभे श्रीहरिकृष्णदेवदुहिता साध्वी सुभद्राभिधा ॥
गोपालीदयितेन तेन हि जगन्नाथेन संलेख्वि [ठि] ता— — — — — — — — —

## २३९ छन्दोदीपिका-कुमारमणिभट्टः ।

आ.—सुन्दरमरविन्दद्युतिवृन्दारकवृन्दवन्द्य सुखकन्दम् ॥ शिरसा मुकुन्द स्र [चरण] द्वन्दं वन्दामहेऽमन्दम् (?) ॥ १ ॥
वाजपेयिजयगोविन्दानुजपुरुषोत्तमस्य चरणौ वन्दे ॥ आचार्यस्य कविचाराडनजस्य यशो बहु विततं धरणौ ॥ २ ॥
माधवपण्डितराजं रुद्रणशिष्टं मनीषिबलभद्रम् ॥ मधुसूदनकविपण्डितमुख्यान्प्रणमामि पूर्वभवान् ॥ ३ ॥
हरिवंशजं चतुर्भुजपौत्रं बुधरुद्रणस्य नप्तारम् ॥ श्रीमत्पितामहमहं — — — — — — — नौमि ॥ ४ ॥
कृत्वा पूज्यपितृव्यवेदमणिमत्यग्रप्रणामं ततस्तातश्रीहरिवल्लभस्य चरणौ नत्वा तथान्यान्गुरून् ॥
ग्रन्थांश [ञ्छ] म्भुहलायुधप्रभृतिभिः श्रीवाजपेय्यादिभिः सृष्टान् वीक्ष्य वदामि वृत्तरचनामाचार्यसूत्रक्रमात् ॥ ५ ॥
च.—श्रीवत्सगोत्रजनिना कुमारमणिना निजेष्टतुष्टा [ष्ट्य] र्थम् ॥ अनुजस्य वासुदेवस्यानुमते सङ्ग्रहोऽग्राहि ॥ १ ॥

नात्र काचन विचारचातुरी नैव कापि रसवस्तुमाधुरी ॥ बालबोधकृतये कृतं मया शोधयन्तु सुधिया [यो] दयामया: ॥ २ ॥
अब्धेण वेदाङ्कयुतेन युक्ते वर्षे पयोराशिशशाङ्कशक्ते ॥ १७६०
जातं तथा भाद्रवलक्षपक्षे मास्य [भास्व] तिथौ पूर्णमिदं शुभर्त्ते [र्क्षे] ॥ ३ ॥
इति श्रीभट्टहरिवल्लभात्मजेन भट्टकुमारमणिना प्रकाशितायां छन्दोदिपिकायां गद्यप्रकरणं नामाऽष्टम: प्रकाश: ॥

## २४० छन्दोमुक्तावली-शम्भुराम: ।

त.—ध्यात्वा नागेश्वरेशानं नत्वाचार्य्यपरंपराम् ॥ छंदोमुक्तावलीं कुर्वे विद्वज्जनमनोरमाम् ॥ १ ॥

.—गोत्रेऽभूत्कश्यपस्य द्विजवरतिलको ज्ञातिसन्नाहमोच: सीतारामोस्य सूनुर्हरिगुरुकरुणामत्रक: शंभुराम: ॥
छंदोमुक्तावलीयं हयवदनगले ख [स्व] र्पिता तेन भक्त्या विद्वन्मोदं वितन्वत्यतति मतिमतां वृत्तबोधं करोतु ॥ १ ॥
यदत्र सौष्ठवं किंचिद्गुरोरेव (च) मे नहि ॥ असौष्टवं चेत्तच्छोध्यं विद्वद्भिर्गतमत्सरै: ॥ २ ॥
कृतांजलिपुटो भूत्वा प्रार्थयामि द्विजानिति ॥ माभूद्व्यर्थ: प्रयासो मे युष्माकं कृपयानघा: ॥ ३ ॥
छंदोमुक्तावलीकंठो हयग्रीव(:)प्रसादकृत् ॥ ददातु सुदृढां भक्तिं पाठकेभ्य: स्वदायिनीम् ॥ ४ ॥
इति श्रीनिवासार्यशिष्येण शंभुराममिश्रेण विरचिताच्छंदोमुक्तावली समाप्ता ॥

## २४१ वाणीभूषणम्-दामोदर: ।

त.—राजत्कुंजरराजकृत्ति विमेलादंचद्दुकूलावृति भास्वद्भोगिफणामणिप्रविलसन्मुक्तामणिग्रामाणि ॥
पादांभोजभुजंगफूत्कृति रणन्मंजीरमंजुद्युति श्रेयो व: शिवशैलराजसुतयोर्देयादभिन्नं वपु: ॥ १ ॥
सत्तीह [सन्तीह] यद्यपि महाकविसंप्रणीतग्रंथा(स्तथा)पि मम बालिशताविलास: ॥
संपूर्णशारदविधावुदयं प्रपन्ने किन्नाम नाभ्युदयमंचति तारकापि ॥ २ ॥
अलसधिय: प्राकृतमधिसुधिय: केचिद्भवंतीह [ह] ॥ कृतिरेषा मम तेषामातनुतामीषदपि तोषम् ॥ ३ ॥
दीर्घघोषकुलोद्भूतदामोदर इति श्रुत: ॥ छंदसां लक्षणं तेन सोदाहरणमुच्यते ॥ ४ ॥

व.—मात्रावृत्तमिह प्रोक्तं चत्वारिंशत्रयाधिकम् ॥ त्रयोदशाधिकशतंवर्णवृत्तमिदं शुभम् ॥ १ ॥
इति श्रीदामोदरविरचितं वाणीभूषणं समाप्तम् ॥

## २४२ वृत्तरत्नाकर: सटिप्पण:-टि० क्षेमहंस: ।

.—पव्वेक: पव्वेकनामा द्विजोत्तम: अभूत् ।

.—छन्द: अभिरामं मनोरमम् ॥ इति वृत्तरत्नकराख्ये छन्दसि वाचनाचार्यक्षेमहंसविरचिते समासत्वाय
टिप्पणके षट्प्रत्ययाध्याय: समाप्त: ॥
वाचनाचार्यश्रीसुखनिधानगणिगजेन्द्राणां पं० सकलकीर्तिना लिपीकृतं झिञ्झुपुरे भद्रं शुभं भवतु ॥

## २४३ वृत्तरत्नाकरः सटीकः-मू० केदारभट्टः टी० जगन्नाथमिश्रः ।

टी. आ.—जयति धाम निकाममनोहरं किमपि बालतमालसमद्युति ॥
वहति काचन काञ्चनवल्लरी यदुपकण्ठमकुण्ठमहाश्रियम् ॥ १ ॥
वृत्तरत्नाकरे व्याख्या भूरिभिः सूरिभिः कृताः ॥ यथामति तथापीह निगूढार्थाय रच्यते ॥ २ ॥
व्यर्थं शास्त्रान्तरार्योक्तिमुदाहरणविस्तरम् ॥ व्याख्यान्तरनिरासं च हित्वा सिद्धान्त उच्यते ॥ ३ ॥
छन्दःशास्त्रस्य सिद्धान्ताः पूर्वैर्नाधिगता हि ये ॥ तानिह प्रेक्षतां कश्चिद्विपश्चिद्वीतमत्सरः ॥ ४ ॥
अकृतमतिदुष्प्रवेशे प्रत्ययगहने निगूढार्थे ॥ छन्दःशास्त्रसरस्वति सरस्वति त्वत्कृपावलम्बोऽहम् ॥ ५ ॥
अभिमतार्थसिद्धिसम्भावितप्रतिबन्धकप्रशमाय कृतं तत्क्षमेष्टदेवताकर्मकनतिलक्षणं मङ्गलं शिष्यशिक्षार्थमध्येतृणामनु-
षङ्गतो मङ्गलसिद्धयर्थं चोपनिबध्य ग्रन्थारम्भं प्रतिजानानः प्रेक्षावत्प्रवृत्त्यपेक्षितमनुबन्धचतुष्टयं दर्शयति । सुखेत्यादिना
श्लोकत्रयेण ॥

टी. च.—अतिरोहितार्थमन्यदिति ॥
सुभद्रया श्रीहरिकृष्णपुत्र्या रामेण विद्याधरसूनुना च ॥ यो लब्धजन्मा जगदादिनाथः स वृत्तरत्नाकरवार्तिकं व्यधात् ॥१॥
वेदरामवसुभूमिमितासु विक्रमार्कत इतासु शरत्सु ॥ बाहुलस्य बहुलेतरपक्षे धूर्जटेः पुरि विनिर्मितमेतत् ॥ २ ॥
यज्ञा [ज्ञ] आदरतोकारि वाणीभूषणभूषणम् ॥ तज्जवाणीप्रसादस्य फलमेतद्धि वार्तिकम् ॥ ३ ॥
वृत्तरत्नाकरावेशलब्धं वार्तिकमौक्तिकम् ॥ तदर्पणेन प्रीतोऽस्तु भगवान्भक्तवत्सलः ॥ ४ ॥
नातिमानितया हेयं बुधा वार्तिकमौक्तिकम् ॥ बहुलोहा नवाप्यर्थसाधकं वो भविष्यति ॥ ५ ॥
वृत्तरत्नाकरान्तःस्थरत्नानामुपलब्धये ॥ पाषाणरचितः सेतुर्हेतुर्नाम कथं भवेत् ॥ ६ ॥
रत्नाकरस्यातितरां विवृद्धेश्चन्द्रोदयो हेतुरिह प्रसिद्धः ॥ नूनं तदन्तःस्थितरत्नलब्धै [ब्ध्यै] न वार्तिकात्कारणमन्यदस्तु ॥७॥
योवेदयद्ब्रह्महिरण्यगर्भं यतः प्रवृत्तिः प्रसृता पुराणी ॥ तेनैव देवेन कृतोस्ति लुप्तश्छन्दःप्रपञ्चस्य पुनः प्रकाशः ॥ ८ ॥
जीवेनानेनात्मनानुप्रविश्य यो वै देवो व्याकरोन्नामरूपे ॥ द्रष्टा दृश्यं दर्शनं चेति मायाविस्तारोयं यस्य तस्मै नमोऽस्तु ॥९॥
यो वै जाग्रत्स्वप्नसुप्त्येकसाक्षी तद्धर्मास्पृक्शुद्धबोधस्तुरीयः ॥
लक्ष्यो नान्तःप्रज्ञ इत्यादिवाचा तस्मै देवायास्तु नित्यं प्रणामः ॥ १० ॥
इति जगन्नाथ इतिश्रुतेन मिश्रेण रामांघ्रिनिषेवकेण ॥ सद्वृत्तरत्नाकरवार्तिकेसौ समाप्तिमध्याय इयाय षष्ठः ॥ ११ ॥
इति चतुर्थम्प्रकरणम् ॥ इति वृत्तरत्नाकरवार्तिके प्रत्ययनिरूपणं षष्ठोऽध्यायः ॥
इति श्रीमिश्रजगन्नाथकृतवृत्तरत्नाकरव्याख्या वार्तिकाख्या समाप्ता ॥ श्रीः ॥

## २४४ वृत्तरत्नाकरः सटीकः मू० केदारभट्टः टी० श्रीकण्ठः ।

टी. आ.—नत्वा गिरिशं गिरिजासमेतं विनायकेनाध्युषितं ततश्च ॥ प्रज्ञानरूपेण निजेन वृत्तरत्नाकराख्यं विवृणोति छन्दः ॥१॥

टी. च.—इदानीं वृत्तिकारो वृत्तिस्वरूपपूर्वकमात्मनो नाम कथयति ॥
विस्पष्टा च पदन्यासे श्रोतृसन्देहवल्लभा ॥ वृत्तरत्नाकरव्याख्या कृता श्रीकण्ठसूरिणा ॥ १ ॥

कृत्वा वृत्तिमिमां पुण्यां यदि भावं [पुण्यंयदेवा] वर्जितं मया ॥ तेनोल्लसन्तु लोकानामतीव मतयोऽमलाः ॥ २ ॥
इति श्रीकण्ठपण्डितविरचितायां वृत्तरत्नाकरच्छन्दोवृत्तौ षट्प्रत्ययविधानो नाम षष्ठोध्यायः समाप्तिमगमत् ।

## २४५ वृत्तरत्नाकरः सटीकः-मू० केदारभट्टः टी० सोमचन्द्रः ।

टी. आ.—यत्पादाम्बनखांशुराजिररुणा नम्रालिके राजते तत्कालागतसम्पदः पदततिः सद्यावकाङ्कनकला [किल] ॥
तं नत्वा जयमङ्गलैकवसतिं सङ्कल्पकल्पद्रुमं श्रीमत्पार्श्वजिनेश्वरं मदगजं मोहांघ्रिपोन्मूलनम् ॥ १ ॥
गुरोः प्रसादादधिगम्य वृत्तरत्नाकरच्छन्दस उद्यमेन ॥ सारं मया किञ्चिदयास्य वृत्तिर्विधीयते मुग्धसुबोधहेतोः ॥ २ ॥
मयात्र शास्त्रान्तरदर्शनेन प्रोद्भूतनव्यार्थविशेषबोधात् ॥ व्याख्यायते केवलमेव सूत्रं पुरातनोदाहरणावली तु ॥ ३ ॥
टी. च.—सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तावधिकार एषः ॥ प्रस्तारनष्टादिकवर्णनोऽत्र सोमोदितायामजनिष्ट षष्ठः ॥ १ ॥
वादिश्रीदेवसूरेर्गणगगनविधोर्बिभ्रतः शारदाया नाम प्रत्यक्षपूर्वं सुजयपदभृतो मङ्गलाह्वस्य सूरेः ॥
पादद्वन्द्वारविन्दे बुधमधुपहिते भृङ्गभङ्गिं दधानो वृत्तिं सोमाभिरामामकृत कृतिमतां वृत्तरत्नाकरस्य ॥ २ ॥
प्रमादादौत्सुक्यात्क्वचिदनवबोधेन यदि वा ममैतस्यां वृत्तौ सुहृदयजनाः कोमलमतेः ॥
अवद्यं चेत्किञ्चिद्भवति भवतामञ्जलिरयं प्रसादं कृत्वा तत्प्रणयमतिभिः शोध्यमखिलम् ॥ ३ ॥
यावच्चन्द्रमसश्छलेन विलसद्दीप्रप्रदीपाञ्चिते रम्येऽनुक्षि [क्ष] पमन्तरिक्षफलके बद्धोन्मदं खेलति ॥
तारासारदुरोदरेण निखिलं दिक्कामिनीमण्डलं जीयात्तावदियं मनोहरपदा वृत्तिः प्रसादात्सताम् ॥ ४ ॥
श्रीविक्रमनृपकाले नन्दकरकपीटयोनिभूसङ्ख्ये संवत् १३२९ समजनिरजोत्सवदिने वृत्तिरियं मुग्धबोधकरी ॥ ५ ॥
सर्वाग्रं ग्रन्थाङ्के रुद्रमितशतानि नवतियुक्तानि ॥ अत्रानुष्टुब्गणनायोगाज्जातानि किञ्चिदधिकानि ॥ ६ ॥
समाप्तेयं सोमचन्द्रकृता वृत्तरत्नाकरबृहद्वृत्तिः ॥

## २४६ गीतगौरीशसंगीतम्-भानुदत्तमिश्रः ।

आ.—संध्यानृत्यविधौ भुजंगमपतेर्गीतामृतं शृण्वतः प्रत्यक्षिस्खलितप्रमोदसलिलस्तोमे तनौ सर्पति ॥
मौलेरुत्पथगा किमु त्रिपथगा जातेति जातागसो देवस्य त्रिपुरांतकस्य चलितं न्यालोकितं पातु नः ॥ १ ॥
भानोर्गीतिः सुधास्फीतिः शंभोर्डमरुडिंडिमिः ॥ विदुषां रसनारंगभूमिर्भाराति नृत्यताम् ॥ २ ॥
च.—इति श्रीमिश्रभानुदत्तविरचिते गीतगौरीशसंगीते महाकाव्ये दशमःसर्गः ॥ १० ॥

## २४७ नन्दिकेश्वरकाशिका सटीका मू०-नन्दिकेश्वरः टी०-अभिमन्युः ।

मू. आ.—नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ॥ उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ १ ॥
टी. आ.—नमः शिवाय देवाय सर्वज्ञाय परात्मने ॥ यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत् ॥ १ ॥
श्रीशं गुरुं कुमारं च शैवतत्त्वविशारदम् ॥ प्रणम्य नन्दिकेशादींश्शिवभक्तान्मुहुर्मुहुः ॥ २ ॥
काशिकामादिसूत्राणां नन्दिकेशकृतां शुभाम् ॥ लोकोपकारिणीं दिव्यां व्याकरोमि यथामति ॥ ३ ॥

इह खलु सकललोकनायकः परमेश्वरः परमशिवः सनकसनन्दनसनत्कुमारादीन्व्यतीतृन्नन्दिकेशपतञ्जलिव्याघ्रपादव-शिष्टादींश्चोद्धर्तुकामो ढक्कानिनादव्याजेन चतुर्दशसूत्र्यात्मकं तत्त्वमुपदिदेश । तदनु सर्वे मुनीन्द्रवर्याश्चिरकालमाश्रि-तानामस्माकं चतुर्दशसूत्र्यात्मकं तत्त्वमुपदिदेशेति मत्वास्य सूत्रजालतत्त्वार्थं नन्दिकेश्वरो जानातीति नन्दिकेश्वरं प्रणिपत्य पृष्टवन्तः । तेषु पृष्टवत्सु स षड्विंशतिकारिकारूपेण तत्त्वं सूत्राणामुपदेष्टुमिच्छन्निदमाचष्ट—नृत्तेति ॥

मू. च.—तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ॥ अहमात्मा परो हल् स्यादिति शंभुस्तिरोदधे ॥ २६ ॥
इति नन्दिकेश्वरकृतकाशिका ॥

टी. च.—सर्वतत्त्वजनकः स्वयं तत्त्वातीतः इति ज्ञापनार्थमेतत्सूत्रं चकारेत्याह तत्त्वातीत इति ॥ सर्वानुग्रहविग्रहः साक्षी तत्त्वातीतो हल् स्यादिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां तत्त्वमुपदिशंस्तिरोदधे इत्यर्थः । हकारः शिववर्णः स्यादिति शैवागमस्थितिरिति शिवम् ॥ इति उपमन्युकृता नन्दिकेश्वरकाशिकायास्तत्त्वविमार्शिनी संपूर्णा ॥

## २४८ उणादिटीका ।

आ.—विधाय गुरुपादयोः प्रणतिमार्तदुःखच्छिदोर्यथामति विरच्यते विवरणं ह्यनाद्यकृतिः (ह्युणाद्याकृतेः) ॥
समस्तबुधसद्दृशा प्रथितिमेतदेतु त्वरा परोपकृतिहेतुकं यदि समस्तमोदप्रदम् ॥ १ ॥ कारुरिति ॥

## २४९ कातन्त्रमन्त्रप्रकाशः-कर्मधरः ।

आ.—शेषाशेषफणामणिव्यतिकरे कान्ताकृतिं बिम्बितां पश्यन्ती रहसि स्थितापि परिषद्भ्रान्त्या यियासुर्मुहुः ॥
या प्रौढापि नवं समागमरसं भावैः समातन्वती श्लिष्टा गाढमुरःस्थलेन हरिणा लक्ष्मीः श्रिये सास्तु वः ॥ १ ॥
त्रिलोचनख्यातमभिन्नदुर्गं सर्वं नमस्कृत्य विविक्तविद्यम् ॥ कातन्त्रमन्त्रार्थविनिश्चयार्थमयं प्रयत्नः क्रियते शिशूनाम् ॥ २ ॥
दुर्गस्त्वमुन्नीय सपञ्जिकाया वृत्तेर्विवेके विजयः प्रवृत्तः ॥ विवेचयंस्तद्वचनानि वाग्मी स्वयं पुनर्दुर्गतमो बभूव ॥ ३
ततस्ततां युक्तिभिरुक्तिमुक्ताविविक्तपङ्क्तिं क्वचिदप्यमुख्यम् ॥ संयोजयिष्ये निजगीर्गुणेन मतां हृदि श्रीमतिसंश्रयाय ॥ ४
त्रिलोचनाचार्यवचःप्रसादाद्दुर्गस्य वृत्तिः सुगमा यदीयम् ॥ क्वचित्क्वचिन्मे वचसोवकाशः शिलोञ्छवृत्त्या घटते तथापि ॥ ५
अभूत्किलाम्भोरुहभूप्रसूते कायस्थवंशे धरणीव तारे ॥ विश्वोपकारव्रततरक्षणेन श्रीमेघनामा धृतमेघधामा ॥ ६ ॥
महोपकारोत्र महोदयश्च यशश्च भूवल्लभवल्लभत्त्वम् ॥ इत्याहृतोसौ (बहु) वैद्यविद्यामनेकविद्याधिगमे कृतेपि ॥ ७ ॥
जातस्तत्तनयस्त्रिलोचन इति ख्यातस्त्रिवेदी विदामाधारो (गदनिग्रहात्रि) भुवनप्रख्यातकीर्तिव्रजः ॥
त्रैवर्गी समुपासनामभिदधच्चित्तं त्रिनेत्रे दधद्यः शास्त्रेण वृथा दयादधिकया [दयाधिकतया] स्वं नाम सार्थं व्यधात् ॥ ८
तस्यात्मजः समभवत्कुलशीलशाली वोधैकविद्यो— — — — — — — —
भक्त्या गदाधरपदाधरवर्तिमूर्धा नाम्ना गदाधर इति प्रथितप्रकर्षः ॥ ९ ॥
येनातुरतरदेहादधरयता सपदि विषमगदं जातानि ॥ — — — — —वैद्यसमूहे प्रगीतसद्यशसा ॥ १० ॥
पुत्रस्तस्याजनि — — — — — — — — संप्रदाता—व्याख्या—पृथगपिवहन्भूधरो धीरधैर्यः ॥
योभूत्स्थैर्यव्यथितजनितोल्लाघतासंविधानाद्धर्मोद्रेकादपि च जनयन्न लयं नाम विश्वे ॥ ११ ॥
अमुष्यादुद्भूतो मय इव वपुष्मान्नियतिमान्सुधाधामेवाब्धेर्जगति भवनायस्तुतकयः ॥

पितृभ्यामाराध्य त्रिभुवनगुरु (श्चाप्य) धिगतस्ततस्तस्मादासात्प्रथितपृथुकीर्तिर्दिशि दिशि ॥ १२ ॥
आकृतिनाप्ततत्त्व [नाप्ततत्त्वश्च] धन्वन्तरिसमक्रमः ॥ यशोधनो यः सुखिनीश्चक्रे तात्कालिकाः प्रजाः ॥ १३ ॥
विद्यां विश्वजनीनां परम्परीणां वहन्नपि प्रगुणाम् ॥ शब्दागमसदलंकृतिसाहित्यैकाश्रयो योभूत् ॥ १४ ॥
साहिश्रीमहमूत्ततो वसुमतीचक्रैकशक्राद्गुणग्रामैस्तोषितचेतसोधिगतवान्सत्कारपूर्वां श्रियम् ॥
– – – – – – – – सुरसरित्कूलेकरे पत्तने भेजे यस्त्रिगणं विभज्य समया भक्त्या सुमित्रान्वितः ॥ १५ ॥
तत्तनयः श्रितविनयो विधृतनयः सुकृतविसंशयस्थिरधीः ॥ अभ्युन्नतनिजवंशप्रदीप इव देवनाथोभूत् ॥ १६ ॥
पुण्यश्रियां तत्फलमाशिषां वा सच्छोत्रियाणां परितोषितानाम्॥श्रीभावनाथेन सु(तस्यलेभेवयोधिकेन द्युतिमत्सुजन्म)॥१७॥
।जितेन्द्रियोसौ भविता पदच्युतैर्नृपैरपि स्वस्थितयेऽर्थनीयः॥ देवाज्ञया तैरिति निर्मितेन यो देवनाथत्वमियाय नाम्ना ॥१८॥
गुणैरनूनैः स्ववशीकृतस्य हुसेनसाहेः सचिवत्वमेत्य ॥ गवां द्विजानामपि यः शरण्यो भग्नान्प्रतिष्ठापयति स्म राज्ञः॥१९॥
यस्तन्वन्प्रतिपल्लं दिशि दिशि सरसीः शुचीरपः सृजाति॥ पथि पथि भक्तिविशेषैः परिपूर्णावध्यपां[र्णोवाप्रपा]व्यतनोत्॥२०॥
आरामैरभिरामान्ग्रामान्यः पात्रसात्कृतवान् ॥ सुचिरं सत्रमतानीद्वाराणस्यादितीर्थेषु ॥ २१ ॥
गवां सहस्रं (य) द्दतं श्रोत्रियैरुप (भु) ज्यते ॥ दत्त्वा प्रत्याददानस्तु सूर्योस्तं याति किं ह्रिया ॥ २२ ॥
बलिप्रभृतिभिर्दत्ता विष्णवे मृ (न्म) यी मही ॥ सैव स्वर्णमयी रोमप्रश [हेमप्रस्थ] शैलवनान्विता ॥ २३ ॥
ब्रह्माण्डं यो व्यतरदखिलं श्रोत्रियेभ्यो विभज्य स्थायीभावादिव य – – – – तोयद्यशोगण्डमैच्छत् ॥
हैमं शैलं सुरविटपिनं कामधेनुं च दत्त्वा तत्स्वामित्वादिव शतमखं प्रोचुरन्ये प्रतीष्ठम् ॥ २४ ॥
यष्पद्वारोपात्रे[यस्यद्वारोपान्ते]भूपा निजपदविरहगलितगुरुगर्वास्तिष्ठन्तं स्वं राज्यं लब्ध्वा यदुचितविरचितपरिचितहर्षाः॥
जायन्ते किंवान्यद्येन क्वचन वचनमथ न वितथमुक्तं शत्रूणामप्यन्तः कालं मधुरमकटु बहु विनियुक्तम् ॥ २५ ॥
गोमूत्रिकाबन्धोयम्॥ देवनाथो लसत्कीर्त्या स्तृणाति जगतां त्रयम्॥ अवभृथोच्छ्रसन्मूर्त्या प्रीणाति जगतामयम्॥ २६ ॥
पुत्रा यदीयाः षडमी पवित्रचरित्रचित्रीयितविश्वभागाः॥ सौभाग्यभाग्योपचयैरनूनाःसत्कीर्तिमूर्तिस्थितिनीतिभाजः ॥२७॥
शिवनाथो रघुनाथो रघुरिव वंशोन्नतेः कर्ता ॥ सोम इवातिद्युतिमान्ख्यातः श्रीसोमनाथश्च ॥ २८ ॥
श्रीवारनाथोपि रणे प्रवीरो धन्यो वदान्यः सुकृती कृती वा॥ श्रीवादिनाथश्च तयादिनायो वृत्ताद्यनायस्मृतिचारुचित्तौ ॥२९॥
स देवनाथः स्फुटमेव यस्य यश्चाप्यमी नन्दनकल्पवृक्षाः ।
श्रीराघवाद्य (द्याः) मणिमण्डिताङ्गाः शाखाभृतोभीप्सितमुत्सृजन्ति ॥ ३० ॥
भ्रातुः कनिष्ठस्य पदेभिषिक्तो यद्गोपिनाथोपि परोपशान्त्यै ॥ - -
ततोपि यो व्यञ्जितधीर्मघोनः सख्यं न नाम्ना भुवि कर्मणापि ॥ ३१ ॥
पुत्रपौत्रीणभावेपि योभ्यमित्रीणतां रणे ॥ दधद्विद्यासु पारीणोप्यभूदध्ययनप्रियः ॥ ३२ ॥
कलापके व्याकरणे गभीरे संदेहसंदोहमपोहयिष्यन्॥ निवध[निबन्ध]मेतं बहुयुक्त्युपेतं सोचीकरत्कर्मधरेण तेन ॥ ३३ ॥
यशोधरायणो योसौ लक्ष्मीधरसुतः (कविः) ॥ यः कृती याज्ञरूपेयः श्रोत्रपेयवचोवृतः ॥ ३४ ॥
यशोधरलक्ष्मीधरयोश्च निजकीर्तिपद्यान्यद्यापि श्रूयन्ते –
श्रीरुद्रसिंहस्य निदेशवर्ती यशोधरः शाब्दिकचक्रवर्ती॥ कवित्ववक्तृत्वकलानिवासी जागर्ति भूमौ नवकालिदासः॥ ३५ ॥
द्राक्षादआ (क्षा) नकआ (क्षा) मनुभवितुमलं काकला काकलीनां

कौमरये कोकिलानां विधुरुचिरवचिर्द्राङ्मुधाभूत्सुधाण (पि) ॥
वीणा प्रावीण्यहीना मधुरिमधुरया हापि हैयङ्गवीनं यस्या याशोधरी सा जगति विजयते भारती भारतिभ्याम् ॥ ३६ ॥
मधुरिमगुणगर्भवैदर्भसंदर्भसर्वस्वगो: कलितसकलशब्दमर्मागम: शर्ववर्मा न किम् ॥
रसमयमृदुगद्यपद्यानवद्य: स लक्ष्मीधर: प्रभवति वरवैरित्रगोधिसर्गोन्निसर्गार्चित: ॥ ३७ ॥
वाररुचं परिशिष्टं टीकामपि वार्धमानिकोपेताम् ॥ विद्यानन्दप्रभृतीन्समीक्ष्य चिरमेष यत्नो मे ॥ ३८ ॥
हे धीरा: शृणुतावधाय विदधे नत्वाञ्जलिं मूर्धनि तत्कालस्यमपास्य हास्यमिह संधेयं निबन्धे मन: ॥
किं वा किं विनयोत्करेण यदि व: कातन्त्रमोमुष्णुता तत्सेव्यो भवितायमेव यदि वा स्वार्चोपि[स्वार्थोऽपि]मा लभ्यते॥३९॥
द्वयमेतदसंबद्धं खलता सुमनस्विता ॥ किंतु संभाव्यते क्वापि खलता सुमनस्विता ॥ ४० ॥
तत्र प्रथमं तावच्छिष्टजनमन:परितुष्टयेऽभीष्टतमकर्मनिर्वाहकादृष्टसृष्टये वेष्टदेवतां वाचनिकशास्त्रप्रस्तावाद्वचनेन पूर्वार्धेन नमस्कृत्वापरार्धेन प्रेक्षापूर्वकारिप्रवृत्त्यङ्गभूतं संबन्धं प्रयोजनं चाभिधित्सुर्भगवान् वृत्तिकारोन्यदीयमपि दृष्टानुभावतया पद्यमिदमलेखि–देवदेवमित्यादि ॥

तन्त्रं सूत्रं ईषत् तन्त्रं कातन्त्रमिति ॥ वर्द्धमानमतं तु लक्ष्यते ॥ इति दुर्गपाद: ॥ प्रबोधकारोऽप्याह ॥ विजयानन्देन॥ इति त्रिलोचना: ॥ व्याख्यानस्य जयादित्यादिकृतकातन्त्रसंबन्धित्वनिराकरणार्थं विशेषणमाह–शार्ववर्मिकमिति ॥ शर्ववर्मणाचार्येणानुवादरूपेण कृतमिति ॥ किंतु व्याख्यानस्य शार्ववर्मिकत्वव्यपदेशार्थमिदम्। तेन 'कातन्त्रम्' 'शार्ववर्मिकम्' कुमारप्रसादात्प्रवृत्तत्वात् 'कौमारम्' तथा वरुणेन कलापेन प्रोक्तं 'कालापम्' इति चतस्रोऽस्य व्याकरणस्य संज्ञा: अजायन्त ॥ गौडीयास्तु 'कलाप' इति मन्यन्ते। 'यतो' बर्हिबर्हमवष्टभ्याचार्येणास्य नामचिकीर्षया पृष्ट: कुमार: कलापसंज्ञामेवास्मै दिदेश इति किंवदन्ती ॥ यदाह पृथ्वीधर:–कलापेन परम्परासंबन्धात्कलापकं व्याकरणमुच्यते इति ॥.........

किं नाम संस्कृतत्वमिति चेत्, देवभाषितत्वम्॥ गाइ–घोडा–हाथि–प्रभृतयश्च न देवशब्दा इति ॥ यदाहुरलंकारकृत:– 'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभि:' इति ॥ अत्र किल मिलितनिखिलविद्वज्जनायां मीमांसितसकलशास्त्रार्थतत्त्वायां परिषदि शलिवाहनाभिधानमवनीश्वरं बोधयितुं कृतप्रतिज्ञेन शर्ववर्मणाचार्येणाराधित: प्रसादीकृतात्मदर्शनो भगवान्कुमारो निजव्याकरणज्ञानमाविर्भावयितुं श्लोकपादरूपमिदमुद्देशसूत्रमवोचत्–सिद्धो वर्णसमाम्नाय:' इति ॥ परिभाषेयम् वर्णसमाम्नायस्य व्यवस्थापकत्वादिति दामोदरमिश्रा: ॥.........

इमैश्च वाक्यैश्च शुभैश्च रम्यै: प्रभातकाले नृपमन्दिरस्थ: ॥ श्रीविक्रमादित्यविबोधनाय काम्पिल्लनाग: स्तवनं करोति॥१॥ यदाह कुलचंद्र:–अधिकारो विधि: संज्ञा निषेधो नियमस्तथा ॥ परिभाषा च शास्त्रज्ञा: षड्विधं शास्त्रलक्षणम् ॥ २ ॥ दशधेत्यपि कश्चित्–अतिदेशोनुवादश्च विभाषा च निपातनम् ॥ सार्धमेतैश्चतुर्भिश्च दशधा सूत्रलक्षणम् ॥ भोजदेवोऽपि यदाह ॥.........

इति करकुलालंकरणश्रीदेवनाथसमादिष्टकर्मधरविरचिते कातन्त्रमन्त्रप्रकाशे प्रथम: संधि: समाप्त: ॥.........
चान्द्रकाशिकादौ पठ्यते ॥.........यदाह श्रीपतिदत्त: ॥ तथा च कालिदास:–न मामवति सद्वीपा रत्नसूरपि मेदिनी इति॥
इति करणकुलालंकरणश्रीदेवनाथसमादिष्टपण्डितश्रीकर्मधरविरचिते कातन्त्रमन्त्रप्रकाशे द्वितीय: संधि: समाप्त: ॥

व.–अनूङिति किम्—पङ्गूत्वं पङ्गूता करभोरुत्वं करभोरुता ॥ – – – – – – –

## २५० क्रियाकलापः-विजयानन्दः ।

आ.—जयति चतुर्दशभुवनाधिपत्यलक्ष्मीविभूषितोत्सङ्गः ॥ भक्तैकपक्षपाती कृपार्णवः श्रीमहादेवः ॥ १ ॥
अस्खलितखेलगतिना विद्यानन्देन सत्प्रबन्धेषु ॥ धातुप्रयोगकदलीवनमनघं रोप्यते तदिदम् ॥ २ ॥
च.—सामरस्यादपि धातूनामनन्तं क नाम पर्यन्ते ॥ अभिधानशास्त्रदृष्ट्या भेदादेव स्वयं योज्या ॥ ६७ ॥
पूर्वं पूर्वकविप्रणीतविविधग्रन्थेषु दृष्टान्ततो निर्णीता हृदये निरूप्य निपुणं ये धातुपारायणम् ॥
धातूनां तनुधीरपि व्यरचयत्तेषामिमं संग्रहं विद्यानन्दकविर्विशुद्धहृदयः कायस्थवंशोद्भवः ॥ ६८ ॥
व्युत्पत्तिवर्त्मन्यकृतप्रवेशैः शास्त्रे जडैर्नेदमुपेक्षणीयम् ॥ धात्वर्थतन्मात्रनिरूपणेन यतो मतिर्मोहमुपैति तेषाम् ॥६० ॥
इमां प्रत्यक्षपीयूषसमृद्धिमधुराक्रियाम् ॥ समस्ताः सन्तु धीराणामुपयोगादिकक्रियाः ॥ ७० ॥
इति सारस्वतोज्जा [द्गा] रकारकायस्थकुलाचर [ल] विजयानन्दकृतौ क्रियाकलापे चतुर्थोध्यायः ॥

## २५१ जैनेन्द्रव्याकरणं सटीकम्-मू० देवनन्द्याचार्यः-टी० गुणनन्दिः ।

आ.—जगत्त्रितयनाथाय नमो जन्मप्रमाथिने ॥ नयप्रमाणवाग्रश्मिध्वस्तध्वान्ताय शान्तये ॥ १ ॥
प्रत्याहारस्यादाविष्टदेवतास्तुतिवचनं मङ्गलार्थमुपात्तम्—
च.—इति पञ्चवस्तुके (पञ्चमम्) आख्यातवस्तु समाप्तम् ॥
सूत्रस्तम्भसमुद्धृतं प्रविलसन्न्यासोरुरत्नक्षितिश्रीमद्वृत्तिकपाटसंपुटयुतं भाष्यौघशय्यातलम् ॥
टीकामालमिहारुरुक्षुरुचितं जैनेन्द्रशब्दागमप्रासादं पृथुपञ्चवस्तुकमिदं सोपानमारोहतात् ॥ १ ॥
कृतिरियं देवनन्द्याचार्यस्य परवादिमथनस्य ॥
सत्संधिं दधती समासमभितः ख्यातार्थनाम्नी — — — —
सैषा श्रीगुणनन्दितानितवपुः शब्दार्णवं निर्णयं नावत्यश्रमतो विवक्षुमनसां साक्षात्स्वयं प्रक्रिया ॥ २ ॥
इति श्रीमज्जैनेन्द्रशब्दागमाब्धिस — — — — — पञ्चवस्तुकप्रक्रियामणिमाला समाप्ता ॥

## २५२ जैनेन्द्रव्याकरणमहावृत्तिः-अभयनन्दिः ।

आ.—देवदेवं जिनं नत्वा सर्वसत्त्वाभयप्रदम् ॥ शब्दशास्त्रस्य सूत्राणां महावृत्तिर्विरच्यते ॥ १ ॥
यच्छब्दलक्षणमसुव्रजपारमन्यैरव्यक्तमुक्तमभिधानविधौ दरिद्रैः ॥
तत्सर्वलोकहृदयप्रियचारुवाक्यैर्व्यक्तीकरोत्यभयनन्दिमुनिः समस्तम् ॥ २ ॥
शिष्टाचारपरिपालनार्थमादाविष्टदेवतानमस्कारलक्षणं मङ्गलमिदमाहाचार्यः—
लक्ष्मीरात्यन्तिकी यस्य निरवद्यावभासते ॥ देवनन्दितपूजेशे नमस्तस्मै स्वयंभुवे ॥ १ ॥
च.—चतुष्टयं समन्तभद्रस्य ॥ १२४ ॥ 'झयो हः' इत्यादि चतुष्टयं समन्तभद्राचार्यस्य मते भवति नान्येषाम् ॥
तथैवोदाहृतम् ॥ इत्यभयनन्दिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ पञ्चमाध्यायस्य चतुर्थः पादः समाप्तः ॥

## २५३ परिभाषेन्दुशेखरव्याख्या-परिभाषार्थमञ्जरी-भीमः ।

आ.—परिभाषारसास्वादबद्धोदारधियामुना ॥ भीमेन रचिता सेयं परिभाषार्थमञ्जरी ॥ १ ॥

च.—इति श्रीमल्लेकरोपनामकमाधवाचार्यतनयभीमप्रणीता परिभाषार्थमञ्जरी समाप्ता ॥

## २५४ परिभाषेन्दुशेखरव्याख्या गदा-वैद्यनाथः ।

आ.—ब्रह्मादयो यस्य न पारमाप्नुयाद्ब्रह्माद्युतं मरतकदेशगामिनी ॥
बामार्धदेहापि न चण्डिकाप ध्यायामि देवं सनकादिबन्धुकम् ॥ १ ॥
वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ॥ विवृतिं परिभाषेन्दुशेखरे तनुते गदाम् ॥ २ ॥

## २५५ परिभाषेन्दुशेखरटीका-चित्प्रभा-ब्रह्मानन्दसरस्वती ।

आ.—विद्याधीशं त्रिनेत्रं विमलमतिसुतं जन्मस्थित्यन्तकारि— — — — — — — — — — निखिलजनिमतां यश्च पूज्यः सुरेशैः॥
आनन्दाब्धिं महेशः सकलकृतिनतो दुर्गमो बोधहीनैः सत्यज्ञानस्वरूपो विगतपरिमितिस्त्वं नुमो—गिरीशम् ॥ १ ॥
यस्याम्नायोभिधत्ते चकितमतिशयं निष्कलङ्कोऽप्यबाधो यस्य स्मृत्या भवाब्धिं तरति गतिमलः शुद्धसंवित्कृतात्मा ॥
तं श्रीकृष्णं दयेशं निगमनुतिचरं बन्धनं प्राणराशेर्ध्यायंध्यायं नमामश्चरितकलुषहस्त [दोः] स्रग्धरं वेणुमन्तम् ॥ २ ॥
यां शक्तिं समुपासते हि विबुधा देवेन्द्ररुद्रादयो यस्या धीशसहस्रतुण्डफणिभृच्छक्तो न वक्तुं गुणान् ॥
यस्या वेदवचांसि तत्त्वमनलं शक्तानि वक्तुं स्वतरतां ध्यायेन्मुनिगृङ्गशैलनिरतां प्राप्त्यातिभाग्यावलिम् ॥ ३ ॥
चितदुरितसमूहहं गणेशं जितमुनिधीरमुनीशवन्द्यपादम् ॥
जनिनिलयसुसंगसंनिधानाद्विपदमपाकुरुते नुमो हि यत्नम् ॥ ४ ॥
चित्प्रभानामिकाव्याख्यां परिभाषेन्दुशेखरे ॥ बालानामुपकराय कुर्वे भाष्यप्रदर्शिकाम् ॥ ५ ॥

च.—ब्रह्मानन्दं विमलमचलं — — — — परेशं विश्वाधारं विगतजनुषं धूर्तहन्तं धुरीणम् ॥
ध्यानध्येयं विविधमुनिभिर्वैद्यनाथं विनायं व्याख्या स्वेपा स्वकृतवचनैः कारितेयं कुकेतम् ॥ १ ॥
इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दानन्दभगवत्पादपूज्यशिष्यतारकब्रह्मानन्दसरस्वतीविरचिता चित्प्रभानाम्नी परिभाषेन्दुशेखरव्याख्या समाप्तिमगमत् ॥

## २५६ परिभाषेन्दुशेखरदोषोद्धारः-मन्नूदेवः ।

आ.—नत्वा गणपतिं देवं नृसिंहं कमलायुतम् ॥ तातं शंभुं प्रसूं दुर्गां कृष्णदेवं तथाग्रजम् ॥ १ ॥
शास्त्रप्रवर्त्तकाचार्यान्पाणिनिप्रभृतीन्मुनीन् ॥ बालंभट्टाभिधं पायगुण्डोपाख्यं परं गुरुम् ॥ २ ॥
दोषा ये पण्डितंमन्यैः परिभाषेन्दुशेखरे ॥ दत्तास्तान्सम्यगुद्धर्तुं मन्नूदेवेन चिन्त्यते ॥ ३ ॥

च.—बाधकान्येव निपातनानि ॥ इतिश्रीमन्नूदेवेन विरचितः परिभाषेन्दुशेखरदोषोद्धारः समाप्तः ॥

## २५७ परिभाषाप्रदीपार्चिः-उदयंकरः ।

आ.—अमन्दहृदयानन्दनिदानं शिवयोश्चिरम् ॥ नमस्करोति हेरम्बं निघ्नप्रत्यूहफलाप्तये ॥ १ ॥
वल्लकीपुस्तककरां पुण्डरीकासनस्थिताम् ॥ शारदां नीरकुन्देन्दुधवलां भावयेतराम् ॥ २ ॥
कृत्वा पाणिनिसूत्राणामिति वृत्त्यर्थसंग्रहम् ॥ परिभाषाप्रदीपार्चिस्तत्रोपायो निरूप्यते ॥ ३ ॥
तत्र तावत्परिभाषात्वं नाम लिङ्गवत्त्वे सति संदिग्धार्थनियामकत्वम् ॥
परिभाषाप्रदीपार्चिष्युदयंकरदर्शिते ॥ प्रथमो व्याकृतोध्यायः संगतः संमतः सताम् ॥ १ ॥
न तुष्यन्ति मितोक्त्यैके परे मूढा बहूक्तिषु ॥ करवाणि ततो वाणि सकलावर्जनेञ्जलिम् ॥ २ ॥

व.—बृहद्विवरणानुसारिणस्त्वन्तरङ्गपारिभाषाया अनित्यत्वे इदमेवैकं ज्ञापकमङ्गीकृत्येमामकृतव्यूहपरिभाषां नाजानान्तर्य-परिभाषामन्तरङ्गानपि विधीन्वहिरङ्गो ल्यब्बाधते इत्येतां च परिभाषामकर्तव्यां मन्यन्ते । तत्सर्वमग्रे विवेचयिष्यामः ॥
परिभाषाप्रदीपार्चिष्युदयंकरदर्शिते ॥ द्वितीयो व्याकृतोध्यायः संगतः संमतः सताम् ॥ १ ॥
न तुष्यन्ति मितोक्त्यैके परे मूढा बहूक्तिषु ॥ करवाणि ततो वाणि सकलावर्जनेञ्जलिम् ॥

## २५८ परिभाषाभास्करः-भास्करः ।

आ.—आखण्डलादिसुरमण्डलमण्डनं तमुद्दण्डकोकविरहानलदण्डचण्डम् ॥
ईडेहमत्र बहुबोधितपद्मकाण्डं मार्तण्डमन्धतमसं प्रति कालदण्डम् ॥ १ ॥
श्रीगुरून्पितरौ नत्वाग्निहोत्री भास्कराभिधः ॥ भास्करं परिभाषाणां तनुते बालवृद्धये ॥ २ ॥
युक्तायुक्ताभिसंबन्धं भूयो भूयो विद्वद्वृन्दम् ॥ नामं नामं याचे मन्दो मान्यं चेदं शोध्यं सम्यक् ॥ ३ ॥
मृद्वी मृद्वीकया तुल्या खैरैरिव खलैर्यदि ॥ नाद्दतेयं कृतिस्तस्मादस्माकं हानिरस्ति किम् ॥ ४ ॥
तत्र तावद् 'भाष व्यक्तायां वाचि' इत्यस्मात् परितो भाष्यत इति व्युत्पत्तेः ॥

च.—न परिभाषावशादनिष्टापादनं सांप्रतमिति सकलेष्टसिद्धिः ॥
परिभाषाकमलिनीर्युक्तिरुग्भिर्विकाशयन् ॥ भास्करः पण्डितालीनां नतंसा [तताना] नन्दमव्ययम् ॥ १ ॥
अम्बिकेश्वरपुरीकृतवासादग्निहोत्रिकुलनीरधिचन्द्रात् ॥ पुण्यपूर्णपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः ॥ २ ॥
वेदवाक्यनिचयावचयेन प्रेक्षितो विधिरिवेह बुधौघैः ॥ लोकगीतविमलायतकीर्तिः सोपि सज्जनमणिर्जयति स्म ॥ ३ ॥
तस्मादुद्भूतकीर्तिः कृतसुकृतभरान्मन्त्रतन्त्रस्वतन्त्रः साधूनामग्रगण्योपरदलनविधौ मानवानां शरण्यः ॥
काशीक्षेत्राधिवासी हतकठिनतरारातिषड्वर्गदम्भः श्रीमन्तापाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ॥ ४ ॥
तनयइह [इह] तदीयो धीरविद्भास्कराख्यः— — — — — (प्रचूरतरम) तीनामाशयं भावयित्वा ॥
परमितपरिभाषा भास्कराचार्ययत [ऽ] सुरतरविपादे सच्चिदानन्दरूपा ॥ ५ ॥
सोमतीर्थावासुकृतं— — — —वानि किंचन ॥ मन्ये गुरुकृपा कल्पलतिकैवादिकारणम् ॥ ६ ॥
इति श्रीमत्कासियाजि— — — — —न्वयिसंभवाग्निहोत्रिकुलतिलकायमानहरिभट्टसूनुश्रीमदापाजिभट्टसूनुभास्कर-विरचितपरिभाषाभास्करः समाप्तिमगमत् ॥

## २५९ प्रयोगविवेकः सटिप्पणः-वररुचिः ।

आ.—प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः ॥ संज्ञया षड्विधं भेदास्त्रयोविंशतिधा पुनः ॥ १ ॥
तत्र पञ्चविधः कर्ता कर्म सप्तविधं भवेत् ॥ करणं द्विविधं चैव संप्रदानं त्रिधा मतम् ॥ २ ॥
अपादानं द्विधा चैव तथाधारश्चतुर्विधः ॥ करोति कारकं सर्वं तत्त्वगतन्यविवक्षया ॥ ३ ॥
तत्र कर्तर्यभिहिते प्रथमैव विधीयते ॥ तृतीया वाथवा षष्ठी स्मृतानभिहिते द्विधा ॥ ४ ॥
तथा कर्मण्यभिहिते विभक्तिं विद्धि पूर्विकाम् ॥ अनुक्ते प्रथमां हित्वा पञ्चमीं सप्तमीं तथा ॥ ५ ॥
च.—वर्त्तमाने तु निर्देशे वर्तेते शतृशानचौ ॥ तव्यसत्संज्ञकाभ्यां च समासो न तु सिध्यति ॥ २५ ॥
ग्रन्थनाशभयाज्जन्तोः श्लोकानां पञ्चविंशतिः ॥ परार्थभावं निर्वोढुं प्रभये [वे] यं भवे भवे ॥ २६ ॥
इति श्रीवररुचिकृते प्रयोगविवेकसंग्रहे कारकचक्रं समाप्तम् ॥
टि. आ.—यो यथाविहितं शब्दप्रयोगं ज्ञातुमिच्छति तेनादितः कारकं ज्ञेयमिति ॥
टि. च.—प्रयोगलाभ [घ] चातुर्य्ययशोभिलाषिणां कारुण्यविलसितचेतसां प्रवृत्तिरिति तत्र दर्शनार्थमित्यर्थः ॥
इति श्रीवररुचिविरचिते प्रयोगविवेके संग्रहे तृतीयः पटलः ॥

## २६० उपसर्गादिविचारः-रामेश्वरः ।

आ.—सुधाब्धिमध्ये मणिमुख्यमण्डिते द्वीपे शरन्नेतमयेथ मञ्चके ॥ कामेश्वराङ्के निवसद्भिर्भूत्यै ममास्तु किंचिन्महसां वरिष्ठम् ॥१॥
तातं त्रिभुवनतिलकं नत्वा रामेश्वरः प्रसूं चाथो ॥ उपसर्गादिविचारं कुरुते विदुषां प्रमोदसंसिद्ध्यै ॥ २ ॥
प्रादिगणपठिताः क्रियायोग उपसर्गसंज्ञां लभन्ते—
३ पत्रे गदाधरभट्टाचार्यैरुक्तत्वात् ॥
६ पत्रे तथा त्रिलोचनदासेनापि कातन्त्रवृत्तिपञ्चिकायाम् ॥
७ पत्रे अत एव शब्दकौस्तुभे—भट्टोजिदीक्षितैर्दत्तम् ॥
१६ पत्रे अत एव हरिरामतर्कालंकारभट्टाचार्यैः ॥
च.—अब्राह्मण इत्यत्राभावो बुध्यते नारोप इति सिद्धम् ॥ वस्वङ्गशैलभू १७६८ इति नञर्थः समाप्तः ॥

## २६१ उपसर्गार्थदीपिका-हरिदत्तः ।

आ.—कृष्णं वन्दे श्रेयस्कामः ॥ १ ॥
सरस्वतीं नौमि सरस्वतीच्छुः सारस्वते तत्र सरस्वतीह ॥
रसाभिमग्नाः कवयो महान्तो यन्नोतीर्पति [त्तितीर्षति] तदत्र चित्रम् ॥ २ ॥
च.—गम्भीरभावा भान्तीयं भूरिभावुकमानिनी ॥ कृतिर्भूयाद्भगवतोर्भवयोः संमदाय मे ॥ २८८ ॥
परमानन्दसंदोहदायिनी मोहदायिनी ॥ चकास्तु रचना सेयमुपसर्गार्थदीपिका ॥ २८९ ॥
इत्युपसर्गार्थदीपिका ॥
वेदाङ्कभूपतिशक उपसर्गार्थदीपिकाम् ॥ निरमासी दिषदिशि दैवज्ञहरिदत्तभुक् ॥ २९० ॥

## २६२ लघूपसर्गदीपिका समूला ।

मू. आ.—प्रपरापसमन्ववनिर्दुरभिव्याधिसूदतिनिप्रतिपर्यपयः ॥ उपआङिति विंशतिरेष सखे उपसर्गगणःकथितः कविभिः॥१॥
टी. आ.—श्रीगणेशाय नमः ॥ प्रउपसर्गः पञ्चदशस्वर्थेषु ॥ नियोगे प्रयुक्तः । वियोगे प्रोषितः ॥
मू. च.—स्पर्द्धेच्छाप्तिषु बन्धने च निलये वाक्ये समीपग्रहे अन्तर्भावनिवृत्तिविस्मयभयादानोर्ध्वकर्माशिषि ॥
कृच्छ्रे साग्रनिमन्त्रणाभिविधिषु श्लेषाभिमुख्येपि चाङ्निर्देशावधिविक्रियासु शकने स्थानादिकर्मण्यपि ॥ २० ॥
टी. च.—आविष् प्राकश्ये । आविष्करोति ॥ इति लघूपसर्गदीपिका समाप्तेयम् ॥

## २६३ अभेदमण्डनम्-कृष्णशास्त्री ।

आ.—श्रीगणेशाय नमः ॥ अथाभेदवादः प्रपञ्च्यते ॥ अत्राहुः—अभेदस्य संबंधत्वविशेषिणो विरोधिनो नव्यवैयाकरणाः ॥
च.—इति विभावयन्तु सदसद्विचारनिपुणा विद्वांसः इत्यलं विस्तरभयाद्विरम्यते ॥

## २६४ कारकनिरूपणम्-त्रिलोकनाथः ।

आ.—श्रीगणेशाय नमः ॥ अथ कारकाणि निरूप्यन्ते ।
कर्ता कर्म च करणं संप्रदानं तथैव च ॥ अपादानाधिकरणमित्याहुः कारकाणि षट् ॥ १ ॥
तत्र क्रियानिष्पादकत्वं कर्त्रादीनां षण्णाम् ॥
च.—इत्यादिकमपरमप्यूहनीयमिति दिक् ॥
श्रीमत्रिलोकनाथेन वैद्यनाथाङ्गजन्मना ॥ वादार्थश्रान्तमतिना पूरिता सप्तमी शुभा ॥
इति षट्(कार)कनिरूपणम् ॥

## २६५ पूर्वपक्षावली-होरिलः ।

आ.—नमस्कृत्य शिवं साम्बं गणनायकसंयुतम् ॥ लभन्ते यत्प्रसादेन लोकाः सर्वमनोरथम् ॥ १ ॥
पुण्यग्रामसभायां तु व्याकृतौ मम संनिधौ ॥ पूर्वपक्षाः कृता लोकैः पण्डितैर्हि ससाधय [समाधये] ॥ २ ॥
लिख्यन्ते ते मया यत्नैरुपकाराय धीमताम् ॥ छात्राणां सुकृतैः पद्यैः श्रीमद्धोरिलशर्मणा ॥ ३ ॥
यत्तु धातोस्तन्निमित्तस्यैवेति ॥
९ पत्रे शेखरग्रन्थोपि भाष्यविरुद्धः ॥
च.—उपसर्गसंज्ञकानामभ्यासात्प्रागिति नादोषात् ॥
इति श्रीभट्टोजिदीक्षितेन (!) कृता पूर्वपक्षावली समाप्ता ॥

## २६६ वाक्यपदीयव्याख्या-पुण्यराजः ।

च.—आचार्यवसुराजेन न्यायमार्गं विचिन्त्य च ॥ प्रणीतो विविवचायं मम व्याकरणागमः ॥
मयापि गुरुनिर्दिष्टाद्भाष्यान्नायवि [याद] लुप्तये ॥ काण्डत्रयक्रमेणायं निबन्धः परिकीर्तितः ॥

ग्रन्थकारेण ग्रन्थेऽस्मिन्स्वस्मिन्गुर्वागमः स्फुटम् ॥ इत्येवं वाक्यकाण्डस्य प्रमेयविषयाः स्मृताः ॥
संगतिः कीर्तिता लघ्वी समासेन निराकुला ॥
विद्वज्जनानां यः खलु सर्वत्र गीयते तत उपसृत्य विरचिता राजानकशूरवर्मनाम्नैव ॥
शशाङ्कशिष्याच्छ्रुत्वैतद्वाक्यकाण्डं समासतः ॥ पुण्यराजेन तस्योक्ता संगतिः कारिकाश्रिता ॥
गुरवे भर्तृहरये शब्दब्रह्मविदे नमः ॥ सर्वसिद्धान्तसंदोहसारामृतमयाय च ॥
इति श्रीपुण्यराजकृता वाक्यपदीयद्वितीयकाण्डटीका समाप्ता ॥

## २६७ वादचूडामणिः-मौनिकृष्णः ।

आ.—शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ इति वात्सल्यवान्विभ्रत्तद्रूपं पातु माधवः ॥ १ ॥
कोलाहलोत्र कुधियां न प्रत्यूहो विवेकिनाम् ॥ कलिदोषो रमानाथदासमीष्टे न वीक्षितुम् ॥ २ ॥
आख्यातस्य कृतौ शक्तिः ।

च.—आकांक्षाविरहाचेरयलं प्रपञ्चेन ॥ श्रीः ॥ इति श्रीमन्मौनिकृष्णभट्टकृतौ वादचूडामणिः समाप्तः ॥

## २६८ वैयाकरणभूषणसारव्याख्या काशिका-हरिरामः ।

आ.—वन्दे गणपतिचरणौ विघ्नध्वान्तालिवारणोद्योतौ ॥ वन्द्यौ सुरगणसंघैः सर्वाभीष्टफलदातारौ ॥ १ ॥
भैरवीं शङ्करीं नत्वा सिद्धेशां लोकमातरम् ॥ व्याख्यां भूषणसारस्य काशिकां तनुते हरिः ॥ २ ॥
मुनित्रयं सर्वजनोपकारकं प्रणौमि विद्यार्णवपात्रभूतान् ॥ गुरूंश्च तातं विबुधेन्द्रवन्द्यं यशःप्रकाशं जननीं च देवीम् ॥ ३ ॥

च.—केशवाङ्गजविप्रस्य हरिरामस्य निर्मितौ ॥ पूर्णो भूषणटीकायां धात्वाख्यातार्थनिर्णयः ॥ १ ॥
इति श्रीमद्वैयाकरणभूषणटीकायां कालोपनामकहरिरामविरचितायां धात्वाख्यातसामान्यार्थनिरूपणं समाप्तम् ॥
इति श्रीकालोपनामककेशवदीक्षितात्मजहरिरामविरचितायां वैयाकरणभूषणसारव्याख्यायां सुबर्थनिर्णयः ॥

## २६९ शब्दबोधाख्यं व्याकरणम्-विरजानन्दः ।

आ.—स्वरनतसुरगणमुकुटजटितबहुनानोच्चावचमणिनिकरैः ॥ चित्रकान्तिमदशेषदुरितभयनाशि देवचरणं वन्दे ॥ १ ॥
कमठवीरवरस्य महीपतेरलवराद्युपलक्षितमीवताम् ॥ विनयसिंहमहायशसः कृतौ क्रियत एष सुशब्दजबोधकृत् ॥ २ ॥
स्वल्पायासाद्बहुशब्दान्बोधयत्यवलोकनात् ॥ ततो ग्रन्थस्य नामास्य शब्दबोध इतीर्यते ॥ ३ ॥
संकेतो योऽनुभूत्युक्तो यश्च भगवत्पाणिनेः ॥ प्रयोगसिद्धावनयोर्य ऋज्वर्थः स गृह्यते ॥ ४ ॥
न पाठातिशयः प्रायो न चाप्यर्थातिशय्यते ॥ तस्माद्ध्यानयेत्यादौ घद्वित्वादि ह्युपेक्षते ॥ ५ ॥
ये व्युत्पत्तिं समीहन्ते सावकाशा न विस्तरे ॥ ते पठन्त्विममेवायानुमोदन्तां च सज्जनाः ॥ ६ ॥
अइउण् । ऋलृक् ।

अ.—अनुगितोनेकाचो न । नदीतरा ॥

राज्ञां ख्यातिमतां हि कच्छपतया श्रीर्यत्र संराजते श्रीमानालवरो द्विषां स विजयी शार्दूलविक्रीडितम् ॥

तस्य श्रीविनयेशभूपतिलकस्याज्ञावशादुद्धृत: सारो व्याकरणस्य तेन भगवाञ्श्रीशंकर: प्रीयताम् ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगौरीशंकरशिष्यश्रीविरजानन्दकृत: शब्दबोधो नाम व्याकरणं संक्षेपसंग्रह: ॥

## २७० शब्दसारो व्युत्पत्तिचिन्तामणिव्याख्यासहित:-यतीश: ।

टी. आ.—ॐतत्सत् ॥ जयन्ति त्रिजगच्छ्रीमद्यतीशपदरेणव: ॥ सर्वोत्कर्षैकनिष्कर्षवर्षिण्य: कामधेनव: ॥ १ ॥

इह सकललोकानुग्रहविग्रहोऽस्मद्गुरु: श्रीमद्यतीशाभिधान: सर्वशास्त्रविषयझटितिव्युत्पत्तिहेतवे तत्सारमुद्दिधीर्षुरादौ व्याकरणसारमुद्धरन्मङ्गलमाचरति—तामिति ॥

तां भवानीं भवानीतक्लेशनाशविशारदाम् ॥ शारदां शारदाम्भोजसितसिंहासनां नुम: ॥ १ ॥

च.—स्मारकोपपदे धातोर्भूते लृट् वर्तमानवत् ॥ वर्तमानस्य सामीप्ये भूते वापि भविष्यति ॥ ६६ ॥

टी. च.—भविष्यत्येव लिङ् । न लटि हन्तीति पलायते ॥

इति विद्वच्छिरोमणिश्रीमदन्वर्थयतीशाभिधामिस[धास्म]द्गुरुविनिर्मितशब्दसारटीकायां व्युत्पत्तिचिन्तामणीवाख्यातवृत्ति: सम्पूर्णा ॥

## २७१ संस्कृतमञ्जरी-उद्धवदास: ।

आ.—अथ संस्कृतमञ्जरी लिख्यते ॥

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ॥ योगीन्द्रमीशं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥ १ ॥

लक्ष्मीनारायणं नत्वा कुर्वे संस्कृतमञ्जरीम् ॥ गृह्णन्तु पण्डिता: सर्वे बालव्युत्पत्तिसिद्धये ॥ २ ॥

च.—व्याकरणं विनाप्यत्र बालबोध: प्रजायते ॥ तस्मात्क्षाम्यन्तु कवयो मम जाड्यन्तु सर्वदा ॥ १ ॥

वैष्णवोद्धवदासेन कृतां संस्कृतमञ्जरीम् ॥ गृह्णन्तु पण्डिता: सर्वे बालव्युत्पत्तिसिद्धये ॥ २ ॥

इति श्रीश्रीनिवासाचार्यशरणागतश्रीराघवदासशिष्यश्रीउद्धवदासवैष्णवकृती बालसंस्कृतमञ्जरी सम्पूर्णा ॥

## २७२ सारस्वतभाष्यम्-काशीनाथ: ।

आ.—समस्तविघ्नहर्तारं नमस्कृत्य महेश्वरम् ॥ भाष्यं सारस्वतस्येदं बालबोधाय क्रियते [बोधाय तन्यते] ॥ १ ॥

च.—सर्वलोकोपकाराय काशीनाथेन भाषितम् ॥ भाष्यं सारस्वतस्येदं पण्डितै: परिसेव्यताम् ॥ १ ॥

इति श्रीकाशीनाथकृतसारस्वतभाष्ये कृत्प्रक्रिया समाप्ता ॥

## २७३ सिद्धान्तकौमुदीव्याख्यानं रत्नार्णव:-कृष्णमित्र: ।

आ.—जगतीं दुर्गतिभीतां मार्गापेतां तमोष्ट [मिस्र] तामेताम् ॥ साध्वनुशासनयुक्तां घटयन्पशुपति: पायात् ॥ १ ॥

च.—इति श्रीदेवीदत्तात्मजरामसेवकतनूद्भवाचार्यकृष्णमित्रकृते रत्नार्णवे संज्ञाप्रकरणं समाप्तिमगमत्

## २७४ सिद्धान्तकौमुदीव्याख्यानं सिद्धान्तरत्नाकराख्यम्-रामकृष्णः ।

आ.—विश्वेशं सच्चिदानन्दं लक्ष्मीकान्तमजं विभुम् ॥ प्रणम्याथ मुनीन्नत्वा पाणिन्यादींस्तथा गुरून् ॥ १ ॥
वेदशास्त्रार्थनिष्णातं तातं तिरुमलाभिधम् ॥ शेषाशेषार्थसिद्धान्तकौमुदीमतिगह्वराम् ॥ २ ॥
व्याचिख्यासुर्विधास्येहं रामकृष्णो यथागमम् ॥ वैयाकरणसिद्धान्तरत्नाकरमिमं सुधीः ॥ ३ ॥
च.—युक्तिमाधुर्ययुक्ते [श्री शोभनीये नवे] तुले ॥ द्विरुक्तप्रक्रिया प्राभूद्वेङ्कटेशप्रसादतः ॥ १ ॥
फणीन्द्रभाष्यादि विभाव्य यत्नतः सिद्धान्तरत्नाकरमर्थविस्तृतम् ॥ श्रीरामकृष्णोरचयद्विपश्चित्तेनेष्ट शंभुह(रिसं)प्रसीदताम् ।
शेषाशेषार्थसिद्धान्तकौमुदीमतिगह्वराम् ॥ व्याचिख्यासुर्महाशेषं याचेयं यातु विस्तताम् ॥ ३ ॥
सोयं रत्नाकरं पित्रोस्त्रिर्मलाख्यान्नपूर्णयोः ॥ भूत्यर्थमतनोद्रामकृष्णो गोविन्दमानसः ॥ ४ ॥
इति श्रीमद्वयेङ्कटाद्रिभट्टात्मजतिर्मलभट्टात्मजरामकृष्णभट्टकर्तृके सिद्धान्तकौमुदीव्याख्याने वैयाकरणसिद्धान्तरत्नाकरे पूर्वार्धं समाप्तम् ॥
चन्द्रर्षिभूमीषुयुवा [ता] ख्यवत्सरे कौबेरदिग्भाजि रवौ मधौ सिते ॥
श्रीरामकृष्णः प्रतिपत्तियौ बुधे रत्नाकरं पूर्णमचीकरद्वरम् ॥ १ ॥

## २७५ सिद्धान्तकौमुदीव्याख्यानं सिद्धान्तटिप्पणम्-जयकौरः ।

आ.—प्रणम्य मातरं देवीं श्रीजयकौरसंज्ञया [का] ॥ पाणिनीयं मतं दृष्ट्वा कुर्वे सिद्धान्तटिप्पणम् ॥ १ ॥
च.—यद्यपि तस्येदं तत्र भव इतिसूत्राभ्यां गतार्थता तथापि ठगादीनपवादान्वक्तुमिमावर्थौ — — — — —

## २७६ सिद्धान्तचन्द्रिकाव्याख्या-लोकेशकरः ।

आ.—प्रणम्य जगतां नाथं महेशं साम्बमव्ययम् ॥ सिद्धान्तचन्द्रिकाव्याख्या क्रियते तत्त्वदीपिका ॥ १ ॥
च.—लोकेशकरसंज्ञेन श्रीक्षेमकरसूनुना ॥ मुदे भूयादुमाशंभ्वोर्विहिता तत्त्वदीपिका ॥ १ ॥
चन्द्रवेदहयभूमिसंयुते वत्सरे नभसि मासि शोभने ॥ शुक्लपक्षदशमीतिथावियं दीपिका विबुधदीपिका कृता ॥ २ ॥
श्रीचन्द्रि[ण्डि]कायाश्चरणारविन्दप्रसादतो यल्लघुदीपिकाभूत् ॥ ततो मनीषापि भवत्वमुष्या अध्येतुरध्यापनहेतुराशु ॥३॥
इति श्रीमद्रामकरपौत्रश्रीक्षेमंकरसूनुलोकेशकरविरचिता सिद्धान्ताचन्द्रिकाव्याख्या तत्त्वदीपिका ॥

## २७७ सिद्धान्तरत्नम्-जिनेन्दुः ।

आ.—श्रीमद्गुरुपदाम्भोजं नत्वा शब्दार्थसिद्धये ॥ सरस्वत्युक्तसूत्राणां कुर्वे सिद्धान्तरत्नकम् ॥ १ ॥
अइउऋऌ समानाः ॥
च.—इति कृत्प्रक्रिया ॥
श्रीसागरेन्दुयत्यद[पत्पद्म]प्रसादेन जिनेन्दुना ॥ सम्यक्सिद्धान्तरत्नाख्यं कृतं शब्दानुशासनम् ॥ १ ॥
प्रयुक्ताः प्रायशः प्राज्ञैर्ये च योगार्थबोधकाः ॥ शब्दाश्च संग्रहस्तेषामनन्तः शब्दवारिधिः ॥ २ ॥
इति श्रीसिद्धान्तरत्ने शब्दानुशासने कृदन्तवृत्तिः परिपूर्तिमगात् ॥